

आज़ादी का अमृत महोत्सव

संस्कृतभाषा पाठ्यपुस्तकम्

वेदभूषणपञ्चमवर्षम् / पूर्वमध्यमा द्वितीयवर्षम् / कक्षा दशमी

महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।
तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय॥

मातृवत्परदारेषु परद्रव्येषु लोष्टवत्।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः॥

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः।

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।

गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।


यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।

सहसा विदधीत न क्रियाम्।

विद्याधनं सर्वधनप्रधानम्।

हितं मनोहारि च दुर्लभं वचः।

अहो दुरन्ता बलवद्विरोधिता।
















महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

संस्कृतभाषा

पाठ्यपुस्तकम्

वेदभूषणपञ्चमवर्षम् / पूर्वमध्यमा द्वितीयवर्षम् / कक्षा दशमी

महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड

(भारतसर्वकारस्य शिक्षामन्त्रालयेन संस्थापिता मानिता च)

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् ,उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालय:)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in

मार्गदर्शकः : प्रतिष्ठानस्य माननीयः सचिवः प्रो. विरूपाक्षः वि. जड्डीपालो महाभागः

विशेषज्ञाः : .....

लेखकगणः : श्री शेषराज रेग्मी, श्री यतिराज सापकोटा, श्री सुकान्त प्रामाणिक

आवरणं सज्जा च : .....

चित्राङ्कनम् : .....

यान्त्रिकसहयोगः : .....

अक्षरविन्यासः : .....

© महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

मूल्यम् : .....

संस्करणम् : .....

प्रकाशिताः प्रतिकृतयः : .....

पत्रस्य उपयोगः : ८० जी.एस.एम. पत्रे मुद्रितम्

प्रकाशकः : महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्
(भारतसर्वकार-शिक्षामन्त्रालस्य स्वायत्तशासि संस्थानम्)
email : msrvvpujn@gmail.com,
Web : msrvvp.ac.in
दूरभाषा (०७३४) २५१००७८

प्रस्तावना

(2020 राष्ट्रियशिक्षानीतेः आलोके)

राष्ट्रियवेदविद्याप्रतिष्ठानस्य स्थापनां भारतसर्वकार-शिक्षामन्त्रालयः (उच्चतरशिक्षाविभागः) माननीयस्य शिक्षामन्त्रिणः (तदानीन्तन-मानवसंसाधन-विकासमन्त्रिणः) अध्यक्षतायां नवदेहल्यां 1987 वर्षे जनवरीमासस्य 20 दिनाङ्के 1860 सोसायटीपञ्जीकरणाधिनियमान्तर्गततया अकरोत्। भारतसर्वकारः वेदानां श्रुतिपरम्परायाः संरक्षणाय, संवर्धनाय, विकासाय, प्रचाराय, प्रसाराय च प्रतिष्ठानस्य स्थापनायाः संकल्पनां 6-3/85-SKT-IV पत्र-संख्यया 30-03-1987 दिनाङ्के भारत-राजपत्रेऽधिसूचनया प्राकाशयत्। संस्थापना-स्मरणपत्रे सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय, वैज्ञानिकरीत्या वेदार्थानां व्याख्यानाय च दायित्वं वेदविद्याप्रतिष्ठानाय प्रदत्तम् आसीत्। 1993 तमे वर्षे मई-मासे राष्ट्रियवेदविद्याप्रतिष्ठानस्य उज्जयिन्यां स्थानान्तरणानन्तरं प्रतिष्ठानस्य नाम महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् इति परिवर्तितम् अभूत्। सम्प्रति प्रतिष्ठानमिदं मध्यप्रदेशसर्वकारेण प्रदत्तायां 23.6 एकड-भूमौ महाकालमन्दिरात् 6 किलोमीटरदूरे उज्जयिनी-नगर्याम् प्रतिष्ठितम् अस्ति।

1986 राष्ट्रियशिक्षानीतौ, 1992 संशोधितशिक्षानीतौ, 1992 कार्यप्रणाल्यां- (प्रोग्राम ऑफ एक्शन) च वैदिकशिक्षायाः संवर्धनार्थं राष्ट्रियवेदविद्याप्रतिष्ठानाय अखिलभारतस्तरीयम् उत्तरदायित्वं प्रदत्तम् अस्ति। भारतस्य प्राचीनज्ञानभाण्डागारस्य, ज्ञानविज्ञानकोषस्य, मौखिकपरम्पराणां शिक्षाप्रदानाय च गुरुशिष्य-परम्परानुरूपं पारम्परिकगुरूणां नियोजनोद्देश्यं 1992 शिक्षानीतेः कार्यप्रणाल्यां (प्रोग्राम ऑफ एक्शन) उल्लिखितमासीत्।

राष्ट्रस्य आकाङ्क्षानुरूपं, राष्ट्रियस्तरे वेदस्य संस्कृतस्य च शिक्षणार्थं, मानकीकृतपरीक्षार्थं च बोर्ड-इत्यस्य स्थापनायाः पक्षे राष्ट्रियसहमतेः, जनादेशस्य, शिक्षणनीतेः, विशिष्टोद्देश्यानां कार्यान्वयन-व्यूहस्य चानुरूपं भारतसर्वकारस्य शिक्षामन्त्रिणाम् अध्यक्षतायां महासभायाः शासिपरिषदश्च समावेशे "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृत-शिक्षाबोर्ड्" इत्यस्य स्थापना 2019 तमे वर्षे अभवत्। प्रतिष्ठानस्य नियमावल्यनुरूपं वेदसंस्कृतशिक्षाबोर्ड् अपि वैवेदशिक्षाया एकः

भागः, तथा प्रतिष्ठानस्योद्देश्यानां पूर्तये नियमेषु संकल्पना च कृता वर्तते। "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य कृते भारतसर्वकारात् भारतीयविश्वविद्यलयसंघात्, केन्द्रीयमाध्यमिकशिक्षाबोर्ड् इत्यस्मात्, राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदः च मान्यता प्राप्ता वर्तते।

भारतसर्वकारस्य शिक्षामन्त्रालयेन 2015 तमे वर्षे श्री एन्. गोपालस्वामी, ऐ.ए.एस् (प्रधान-निर्वाचनायुक्तचरः)-महोदयस्य आध्यक्ष्ये संरचितया समित्या "संस्कृतस्य विकासाय दूरदृष्टिः पथप्रदर्शनं च-दशवर्षाणां परिप्रेक्षायां योजना" इत्यनया अनुशंसितं यत् उच्चतरमाध्यमिकस्तरपर्यन्तं वेदसंस्कृतविषयकशिक्षणस्य पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय "वेद-संस्कृतशिक्षाबोर्ड्" इत्यस्य झटिति स्थापना आवश्य करणीया। प्राथमिकस्तरे वेदस्य संस्कृतस्य चाध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं च भवेत् । आधुनिकशिक्षाबोर्ड-व्यवस्थायां पाठ्यमानानाम् आधुनिक-विषयणाम् अपि वेद-संस्कृतपाठशालासु सम्यक् मिलित्वा अध्यापनम् आवश्यकम्। साम्प्रतिकसमाजस्य आवश्यकतानां संपूर्तये, प्राचीनज्ञानस्य सम्यक् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति च समितेः अनुशंसा आसीत् ।

संस्कृतस्य आधुनिकविषयाणां च सुमेलनेन स्तरानुगुणं पाठ्यसामग्र्याः विकासपुरस्सरं सस्वरवेदपाठे कौशलसंवर्धनस्य, वेदकण्ठस्थीकरणे, वेदमन्त्रोच्चारणे च अखिलभारतस्तरे मानकीकरणस्यावश्यकता वर्तते । यतो हि वेदच्छात्रा अन्ततोगत्वा वेदभाष्याणाम् अध्ययने, वेदार्थचिन्तने समर्था भवेयुः। वेद-संस्कृत-छात्राणां वृत्तिप्राप्ति-लक्ष्यं मनसि निधाय मुख्यधारायाम् अपि भावि अध्ययनं सुशकं भवेत्। समुचितस्तरे वेदविकृतिपाठानामध्ययने ध्यानं दात्तव्यम् इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती। वेदानां सस्वरपाठः आभारतं सर्वत्र राज्येषु समानरूपेण नास्ति इति हेतोः समितेः सदस्यैः चिन्ता प्रकाशिता। अतः वेदानां सस्वरपाठस्य शैल्यादीनां, शिक्षणपद्धतेश्च क्षेत्रीयविविधतानामुपरि हस्तक्षेपम् अकृत्वा

विद्यामानायाः स्थितेः समाधानाय, समीकरणाय शीघ्रं समुचितव्यवस्था प्रतिष्ठानेन करणीया इति च वेदपाठशालानां सम्बन्धे समितिः संस्तुतवती ।

वेदः संस्कृतं चेति द्वयम् अविभक्तम्, एकम् अपरस्य उपोद्बलकं च वर्तते। परं तु आभारतं समेषां वेदपाठशालानां संस्कृतपाठशालानां च परीक्षा-मान्यतायाः, सम्बद्धतायाः च समस्या चिरकालात् सम्मुखं वर्तते, एतदर्थं वेद-संस्कृतयोः परीक्षादिविषये सहैव राष्ट्रस्तरे वेदसंस्कृतबोर्ड् इत्यस्य स्थापना भवेत्। समितिः एतदपि संस्तुतवती यत् बोर्ड-माध्यमेन आयोजयिष्यमाणा परीक्षा विधिसम्मता सर्वकारेण मानिता च भवेत्, शिक्षाया आधुनिकबोर्ड् प्रणाल्या तुल्या च भवेत्। समित्या एवमपि अनुशंसा कृता यत् "महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्" "महर्षिसान्दीपनि-राष्ट्रियवेदसंस्कृतविद्यापरिषद्" इति परीक्षा बोर्ड् संज्ञया उद्घोषितं मानितं च भवेत्, एतस्य मुख्यालयः उज्जयिनी भवेत्। परीक्षाबोर्ड् कार्याणि अतिरिच्य अद्यावधि प्रचलितानां वेदप्रसार-प्रचार-संवर्धन-कार्यक्रमाणाम् अन्येषां वेदाध्ययन-संवर्धन-गतिविधीनाञ्च सञ्चालनं प्रतिष्ठानस्य पक्षतः एव यथापूर्वं भवेत् इति समितिः संस्तुतवती ।

वेदशिक्षायाः संचालनं, संवर्धनं, प्रचारः च भारतस्य गौरवशालिज्ञानपरम्पराया एकं सुविस्तृतं व्यापकं च अध्ययनमस्ति । वेदाध्ययने (संहिताः, विकृतिपाठाः, स्वराणां सम्यक् प्रयोगः ज्ञानादयश्च) सस्वरपाठकौशलम्, मन्त्रोच्चारणम्, संस्कृतज्ञानप्रणाल्याः बहुस्तरीया श्रुतिपरम्परा सम्मिलिता भवति। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य पाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं नीतेः दृष्टौ आधुनिकविषयाः यथा-संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः इत्यादयः विषयाः नीतिनिर्धारकनिकायेषु वैदिकशिक्षाया उपरि राष्ट्रियसम्मत्यनुरूपम् उपलब्धसमयाधारेण पाठ्यक्रमानुरूपम् अध्येयाः विषयाः समावेशिताः। रा.शि.नी. 2020 इत्यस्य अनुसरणाय प्रतिष्ठानेन प्रवर्तिता अध्ययनस्येयं विशिष्टा

पाठ्यक्रमयोजना भारतीयज्ञानप्रणाल्याः पाठ्यक्रमसामग्रीषु आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते।

प्रतिष्ठानस्य बोर्ड्-सम्बद्धानां पाठशालानां, गुरुशिष्य-इकाई-इत्यादीनां, गुरुकुलानां च पाठ्यक्रमस्य आधारभूतः मुख्यः विषयः भवति सम्पूर्णवेदशाखाया कण्ठस्थीकरणेन सह सस्वराध्ययनम्। तेन सह नियमानुरूपं संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) इत्यादयः पञ्चान्यूनं यथाचयनं विषया भवन्ति।

इतिहासविद्भिः विदितो विषयो वर्तते यत् महर्षेः पतञ्जलेः काले ऋग्वेदस्य 21 शाखाः, यजुर्वेदस्य 101 शाखाः, सामवेदस्य 1000 शाखाः, अथर्ववेदस्य च 9 शाखाः चेति वेदानां 1131 शाखा आसन्। याते काले बह्वीनां वेदशाखानाम् अध्येतृपरम्परायाः लोपात् बह्व्यः शाखाः कालकवलिता अभूवन्, सम्प्रति केवलं 10 शाखाः अवशिष्यन्ते, तेषु ऋग्वेदस्य एका, यजुर्वेदस्य चतस्रः, सामवेदस्य तिस्रः, अथर्ववेदस्य च द्वे शाखे सस्वरपाठपरम्परायां समुपलभ्यन्ते। एतासामुपरि एव भारतीयज्ञानप्रणाली आश्रिता वर्तते। एतासां 10 शाखानां कण्ठस्थीकरणेन सस्वर-पाठेषु प्रवीणाः पण्डिताः ये वेदपाठपरम्परां वेदज्ञानपरम्पराञ्च पूर्णरूपेण प्राचीनपद्धत्या च संरक्षितवन्तः ते विरला एव तथा अध्येतारोऽपि न्यूनमात्रया एव सन्ति । यावत् श्रुतिपरम्परानुसारेण कण्ठस्थीकरणपूर्वकं वेदशिक्षाम् आश्रित्य मूलरूपेण चिन्तनं न क्रियते, दृष्टिः न दीयते तावत् वेदशिक्षाव्यवस्था सुदृढा न भवति। सामान्यविद्यालयीयाध्ययने वेदस्य सस्वरपरम्पराया अध्येयविषयत्वेन अध्यापनं न भवति, न तु विद्यालयीयपाठ्यक्रमे वेदपाठ्यक्रमसमायोजनाय सञ्चालनाय वा विशेषज्ञता सामान्यबोर्ड्-मध्ये वर्तते। केवलं मुद्रितवेदपुस्तकवाचनं पारम्परिकं वेदाध्ययनं नैव भवति। अत एव एषा स्थितिः वर्तते।

वेदछात्राः ये श्रुतिपरम्परया सस्वरं वेदं गुरुमुखात् परम्परया अधियन्ति, ते सुदूरे ग्रामेषु नगरेषु वा स्थितेषु वेदगुरुकुलेषु, आश्रमेषु, पाठशालासु वा निवसन्ति, पठन्ति च। वेदाध्ययनाय वेदविद्यार्थिनः प्रतिवर्षम् अन्यूनं 1900-2100 होराः उपयुञ्जते। ते आधुनिक-

विद्यालयीयशिक्षणप्रणालेः समयात् द्विगुणितं समयं वेदाध्ययनाय उपयुञ्जते। वैदिकछात्राः गुरोः सम्मुखम् उपविश्य शब्दशः वेदोच्चारणशिक्षणं प्रमुवन्ति, वेदस्य एकैकं शाखायां स्वाध्यायविधया सस्वरम् उच्चारणेन सह कण्ठस्थीकरणमपि अवश्यं कुर्वन्ति। आधुनिकान् च विषयान् यथासामर्थ्यम् अधियन्ति।

अत्रेदं ज्ञातव्यं भवति यत् वेदाध्ययनस्य, वेदमन्त्राणां पाठविधेः, गुरुशिष्ययोर्मध्ये प्रचलितायाः अनूचानायाः वेदानां श्रुति-परम्परायाः, पाठपरम्परायाः एव कारणात् वेदानां श्रुतिप्रचालितं मौखिकप्रसारणं मानवताया अमूर्तसांस्कृतिकनिधिरूपेण विश्वसंस्थायाः यूनेस्को (UNESCO) इत्यस्य मौखिकसांस्कृतिकनिधेः सूच्यां मानितं विद्यते। अतः वैदिकशिक्षायाः प्राचीनताम् अखण्डतां च चिरकालं स्थापयितुं योग्या फलप्रदात्री कार्यनीतिः आवश्यकी वर्तते। अतः प्रतिष्ठानं, प्रतिष्ठानस्य बोर्ड् च 2020 राष्ट्रियशिक्षानीतौ निर्दिष्टैः कौशलविषयैः, व्यावसायिकविषयैः,आधुनिकविषयैः च सह यथा- संस्कृतम्, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, सङ्गणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, इत्यादिभिः मिलित्वा विशिष्टं सस्वर-वेदपाठ्यक्रमं सर्वासु उपलब्धशाखासु सञ्चालयति, स पाठ्यक्रमः सर्वकारेण मानितः, सर्वकारेण मानितं बोर्ड्-प्रमाणपत्रं च प्रदीयते।

वेदितव्ये परा अपरा चेति द्वे विद्ये अधीत्य मानवः सुखीभवति। अस्मिन् प्रपञ्चे अधीता विद्या अविद्या च सुखेन जीवनयापनार्थं मनुष्यान् समर्थान् करोति, परलोके मुक्तियोग्यान् च विधत्ते। वेदे वर्णितानां भौतिकानां विषयाणां ज्ञानं, भौतिकज्ञानस्य साहाय्यशाखाः, भौतिकरुच्यनुगुणाः विषयाः च अपरा विद्येति नाम्ना कथ्यन्ते। उपनिषत्सु प्रतिपादितम् आत्मचिन्तनम् आत्मनः अन्वेषणं च परा विद्येति नाम्ना कथ्यते। प्राचीनभारते प्रसिद्धाः, वेदाः सहयोगिन्यः ज्ञानविषयिण्यः विद्याः चतुर्दश (14) वर्तन्ते। ता यथा- चत्वारः वेदाः, षड्वेदाङ्गानि, पुराणानि, न्यायः, मीमांसा, धर्मशास्त्रं च । चतुर्दशभिः विद्याभिः सह आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रम् (स्थापत्यवेदः वा) इति चतुरः उपवेदान् संयोज्य 18 विद्याः वर्तन्ते। सहस्त्रशः वर्षेभ्यः अत्र भरतखण्डे भारतभूमौ सर्वेषां ज्ञानानां, विज्ञानानां, शिक्षणस्य च भाषा

संस्कृतभाषा आसीत्, यतो हि अस्मिन् भरतखण्डे भारतमहाद्वीपे भारतभूखण्डे दीर्घकालं यावत् एकमात्रं भाषितभाषा संस्कृतभाषा एव आसीत्। तस्मात् तदा वेदार्थानां सुलभतया ज्ञानाय जनाः समर्थाः एव आसन्।

प्राचीनस्य तक्षशिला-विश्वविद्यालयस्य विषये वयं सर्वे शृणुमः एव। तत्र अष्टादश (18)-शिल्पानां, प्रौद्योगिकविषयाणां च अध्ययनम् अध्यापनं च प्राचलत्, आनुभविकं प्रयोगपूर्वकं शिक्षणं प्राचलत् इति च वयं जानीमः एव। छान्दोग्योपनिषदि[1] केषुचित् नीतिशास्त्रग्रन्थेषु च एतासां विद्यानां विवरणं लभ्यते। तदनीन्तनाः ते 18 व्यावसायिकपाठ्यविषया अद्यापि अध्ययनयोग्यविषया इति ज्ञायन्ते । ते यथा- 1. गायनसङ्गीतम् 2. वाद्यसङ्गीतम् 3. नृत्यम् 4. चित्रकला 5. लेखशास्त्रम् 6. अभियान्त्रिकी 7. मूर्तिकला 8. प्रसूतितन्त्रम् 9. वाणिज्यम्, 10. गणितम् 11. आयुर्वेदः, चिकित्सा 12. कृषिः 13. रथनिर्माणम्, परिवहनम् 14. राज्यशासनम्, प्रशासनिकप्रशिक्षणम्, 15. धनुर्विद्या, दुर्गनिर्माणम्, सैन्यकला च, 16. विविध-वस्तुनिर्माणम्, उत्पादनं च , 17. सर्पविद्या 18. गुप्तनिधेरन्वेषणम् । उपर्युक्तासु कलासु शिल्पेषु च अभियान्त्रिक्याः शिक्षणाय, कौशलसम्पादनाय च प्राचीनकाले प्रशिशिक्षुप्रणाली विकसिता आसीत्।

समग्रे विश्वे प्राचीनसभ्यतासु सर्वदौ गण्यमानायां भारतीयसभ्यतायां शास्त्राणां, ज्ञानस्य, विज्ञानस्य, प्रौद्योगिक्याः च शिक्षणस्य विशाला सुदृढा च परम्परा वर्तते । भारतं प्राचीनकालादेव ऋषीणां, ज्ञानिनां, विदुषां वैज्ञानिकानां च भूमिः अपि वर्तते। अनुसन्धानैः इदं ज्ञातं यत् भारतं विद्यानाम् (विद्या आध्यात्मिकं ज्ञानम् , अविद्या भौतिकं ज्ञानम्) अध्ययने अध्यापने च विश्वगुरुः आसीत् भविष्यति च, समग्रे प्रपञ्चे भारतं सक्रियं योगदानं च सर्वेषु क्षेत्रेषु प्रादात्, ददाति च। प्राचीनकालादेव भारतस्य नानभागेषु आधुनिकविश्वविद्यालयेन तुल्यानां बृहतां शिक्षणकेन्द्राणां गुरुकुलानां च स्थापना अभवत्, तत्र सहस्राधिकाः विद्यार्थिनः नानास्थानेभ्यः नानादेशेभ्यः च आगच्छन्ति स्म। प्राचीनै ऋषिभिः अन्विष्टाः ज्ञान-विज्ञान-प्रौद्योगिक्यभियान्त्रिक्यादीनाम्

[1] नाम वा ऋग्वेदो यजुर्वदः, सामवेदः, आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्त्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नाम---। छान्दोग्ये 7.1.4

अध्ययनपद्धतयः, प्रयोगात् परीक्षणविधानानि, सिद्धान्ताः च अनेकेषु विषयेषु विश्व-ज्ञानस्य मूलसिद्धान्तान् स्थापयामासुः, चिन्तनस्य उत्साः च अभूवन्, खगोलविज्ञाने, भौतिक्यां, रसायनविज्ञाने, गणिते, चिकित्साविज्ञाने, प्रौद्योगिक्यां, ध्वन्यनुसन्धाने, व्याकरणे एवम् अन्यत्र च तादृशेषु विविधेषु विषयेषु सिद्धान्तप्रतिपादने प्राचीनकालादेव भारतस्य योगदानम् अतीव महत्त्वपूर्णं वर्तते इति अनुसन्धानेन आविश्वं प्रथितमेव । अतः भव्यस्य भारतस्य नागरिकाः बालकाः बालिकाः च अवश्यमेव ऋषिप्रदत्तं मूलं वैदिकं ज्ञानं प्राप्नुयुः गौरवमनुभूय भारतभाग्यं चिन्तयेयुः, रचयेयुः च । भारत-संसद्भवनस्य मुख्यद्वारि उट्टङ्कितं "वसुधैव कुटुम्बकम्" इति, विविधेषु अवसरेषु गणमान्यैः संवैधानिकप्राधिकरणैः उद्धृतानां वेदमन्त्राणामर्थज्ञानं वेदाध्ययनेन, वेदमन्त्रार्थचिन्तनेन एव सम्भवति। वेदेषु, सम्पूर्णे वैदिकसाहित्ये च सत्, चित्, आनन्द-तत्त्वचिन्तनं समेषां प्राणिनाम् अन्तर्णिहितयाः समानताया उपरि बलं प्रददाति।

वेदाः वैज्ञानिकज्ञानस्य स्रोतांसि वर्तन्ते। अतः बह्वीनाम् आधुनिकसमस्यानां समाधानाय वेदमूलकानां भारतीयज्ञानस्रोतसां श्रद्धया पुनः पुनः अन्वेषणम् आवश्यकम्। वेदानां पाठं, वैदिकज्ञानसामग्रीं, वैदिकदर्शनं वा आध्यात्मिकज्ञानस्य वैज्ञानिकज्ञानस्य च रूपेण यावत् वयं छात्रान् न बोधयामः तावत् आधुनिकभारतस्य अपेक्षा-पूर्त्यर्थं वेदे निहितानां विविधानां ज्ञान-विज्ञान-विचाराणां देशे सर्वत्र, विश्वस्तरे च प्रसारः पूर्णरूपेण नैव भविष्यति।

वेदाध्यापनं वेदशिक्षा वा (वेदपाठः, मौखिकी, श्रुतिपरम्परा वा, वेदज्ञानपरम्परा) केवलं धार्मिक- शिक्षामात्रं नैव । वेदानामध्ययनं नाम धर्मविषयकमेव निर्देशमात्रम् इति कथनं सर्वथा अनुचितमेव। वेदः धार्मिकवाङ्मयमात्रम् एव न, वेदेषु केवलं धार्मिकसिद्धान्तमात्रम् एव न प्रतिपादितम्, अपितु वेदाः ज्ञानविज्ञानकोषाः सन्ति, तत्र ज्ञानं विज्ञानं च वर्तते । मानवजीवनसाफल्याय, आनन्दाय च आवश्यकानां समेषां ज्ञानानां कोषरूपः वेदः, स वेदः सर्वज्ञाननिधिः । अतः वेदशिक्षणं वेदाध्ययनं वा धार्मिकशिक्षणम्, धार्मिकनिर्देशः इति वा चिन्तनं सर्वथा युक्तियुक्तं न विद्यते।

2004 वर्षस्य 6736 नागरिक-प्रतिवेदनसंख्यान्वितम् अभियोगम् (AIR 2013: 15 SCC 677) अनुलक्ष्य 03-07-2013 दिनाङ्के प्रकाशिते माननीयसर्वोच्चन्यायालयस्य निर्णये स्पष्टं यत् वेदाः केवलं धार्मिकग्रन्थाः नैव सन्ति, वेदेषु गणितं, खगोलविज्ञानं, ऋतुविज्ञानं, रसायनविज्ञानं, द्रवचालिकी (हाइड्रोलिक्स) भौतिकविज्ञानं, प्रौद्योगिकी, कृषिः, दर्शनं, योगः, शिक्षा, काव्यशास्त्रं, व्याकरणं, भाषाविज्ञानम् इत्यादयः विषयाः सम्मिलिताः सन्ति इति।

2020 राष्ट्रियशिक्षानीतेः अनुसरणपूर्वकं प्रतिष्ठानस्य, बोर्ड् इत्यस्य च माध्यमेन वेदशिक्षणम्-

2020 राष्ट्रियशिक्षानीतौ भारतीयज्ञानप्रणाली नाम्ना संस्कृतज्ञानप्रणाली संज्ञिता अस्ति। तत्र भारतीयज्ञान-प्रणाल्याः महत्त्वं, पाठ्यक्रमे तस्याः समावेशः, विविधविषयाणां संयोजने नम्या दृष्टिः स्पष्टं शिक्षानीतौ प्रकाशिता अस्ति। कलायाः, वाणिज्यस्य, मानविक्याः च छात्रा विज्ञानविषयाध्ययनाय समर्था भविष्यन्ति, प्रौद्योगिकीछात्राः विज्ञानछात्राश्च कलादिविषयान् अध्येतुमर्हन्ति। अध्येतारः सर्वे इच्छानुगुणं व्यावसायिकं, व्यावहारिकं च कौशलं (सॉफ्ट स्किल्स) प्राप्नुयुः इति। कलासु, विज्ञानेषु, इतरेषु क्षेत्रेषु च भारतस्य गौरवशालिनी परम्परा अनया शिक्षणव्यवस्थया संवर्धयितुं शक्यते। भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिरियं निर्मिता।

भारतस्य शास्त्रीयभाषाणां साहित्यानां च महत्त्वं, प्रासङ्गिकता, सुन्दरता च उपेक्षितुं न शक्यते। संस्कृतं नाम संविधानस्याष्टमानुसूच्यां निर्दिष्टा एका महत्त्वपूर्णा आधुनिकी भाषा वर्तते। समग्रं लैटिन-ग्रीकसाहित्यं च संस्कृतसाहित्येन गुणे परिमाणे च तुलनायां कथमपि समानतां न प्राप्नोति। संस्कृतसाहित्ये गणितम्, दर्शनम्, व्याकरणम्, संगीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कथा आख्यायिका, कविता इति वाङ्मयविधानां विशालः कोषः वर्तते, स संस्कृतज्ञानप्रणालीरूपेण ज्ञायते। संस्कृतज्ञानप्रणाली न केवलं विश्वज्ञाननिधेः पोषणाय संरक्षणाय च भवेत् अपि तु संस्कृतज्ञानप्रणाली अनुसन्धानैः संवर्धनीया, नवीनैः चिन्तनैः संस्कृतज्ञानप्रणाली अस्माकं शिक्षाप्रणाल्यां सम्यक् उपयुक्ता च भवेत्। विगतेषु बहुषु सहस्राब्देषु विविध-विषयक-विद्वज्जनैः विविधासु सामाजिकपृष्ठभूमिषु कार्याणि कुर्वद्भिः विस्तृतजीवनदर्शनेन

सह संस्कृतज्ञानप्रणाल्या वाङ्मयसर्वस्वं प्ररोपितं निर्मितं च अस्ति। संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठयिष्यन्ते। अस्याः प्रणाल्या उपयोगः विशिष्टरूपेण ध्वनिरूपेण उच्चारणेन च वर्तते। माध्यमिकस्तरे संस्कृतविषयान् संस्कृतमाध्यमेन पाठयितुं, संस्कृताध्ययनम् आनन्दप्रदं कर्तुं संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन (एस्. एस्. एस्.) भविष्यति। वेदानां श्रुतिपरम्परायां मौखिकपरम्परायां वा ध्वन्यात्मकम् उच्चारणं प्रवर्तते, वेदशिक्षायाः आधारः सस्वरोच्चारणं, ध्वन्यात्मकोच्चारणं च वर्तते।

कलाविज्ञानयोः पाठ्यक्रम-पाठ्येतरक्रिययोः शैक्षणिक-व्यावसायिकधारयोश्च मध्ये परस्परं स्पष्टो भेदो न कृतः शिक्षानीत्याम्, एतेषां सम्मिश्रणं पाठ्यचर्यायां भवितुमर्हति। समेषां विषयाणाम् अन्तस्सम्बन्धम् एकताम् अखण्डतां च सुनिश्चित्य अध्ययनाय बहुविषयकः आधारः शिक्षानीत्यां निर्मितः अस्ति, तेन च विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि बलं प्रदत्तमस्ति। नैतिकता, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, परेषां कृते सम्मानः, स्वच्छता, शिष्टाचारः, लोकतान्त्रिकी भावना, सेवाभावना, सार्वजनीनसम्पदां सम्मानः, वैज्ञानिकचिन्तनं, स्वतन्त्रता, उत्तरदायित्वं, नानाविचारवादः, समानता, न्यायः इति भावानाम् उपरि बलं प्रदत्तमस्ति।

2020 राष्ट्रियशिक्षानीतेः 4.23 बिन्दु-संख्यायां अनिवार्यतया अध्येयविषयाणां, कौशलसंवर्धनस्य, शिक्षाक्रमस्य च विषये निर्देशो वर्तते। विद्यार्थिनाम् इच्छानुगणं अध्येयविषयाणां चयनविकल्पाः अधिकतया नमनीयाः भवेयुः, पाठ्यक्रमाः नमनीयाः स्युः । अपि च अधुना झटिति परिवर्तिनि विश्वे विद्यार्थिनः उत्तमाः, यशस्विनः, सफलाः, उद्योगशीलाः, उद्योगयोग्याः, उत्पादकशीलाश्च भवेयुः चेत् केचन अध्येयज्ञानविषयाः कौशलविषयाः अनिवार्याः करणीयाः, वृत्तिसामर्थ्यप्राप्तिः च अनिवार्या विद्यते, छात्रहितदृष्ट्या तत् महत्त्वपूर्णं च।

वैज्ञानिकः चिन्तनस्वभावः, प्रमाणाधारितं चिन्तनं, रचनात्मिकी नवीनता च, सौन्दर्यशास्त्रं कलायाः च भावना, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, स्वास्थ्यं संपोषणं च, शारीरिकशिक्षा, दैहिकसामर्थ्यं स्वास्थ्यं क्रीडा च, सहयोगः

सामूहिककार्यम्, समस्यायाः समाधानं तार्किकं चिन्तनं, व्यावसायिकाभिप्रकाशः कौशलं च, तन्त्रज्ञानप्रयोगकौशलं, संख्यासाक्षरता, कूटचिह्नसंज्ञानं, संगणकीयं चिन्तनं, नैतिकता, नैतिक-तार्किकक्रिया, मानवीयानां संविधानीयानां मूल्यानां ज्ञानम् अभ्यासश्च, स्त्रीपुंस-संवेदनशीलता, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, भारतस्य ज्ञानम्, पर्यावरणसम्बद्धा जागरा, तत्र जलसंसाधन-संरक्षणम्, स्वच्छता, समकालिकविषयाः स्थानीयविषयाश्च, देशेन, राज्यैः, प्रपञ्चेन वा सम्मुखीक्रियमाणानां विषयाणां ज्ञानं, नानाभाषासु कौशलेन सह अत्रोक्तानां कौशलानामपि अध्येयविषयेषु समायोजनं विद्यते । बालकानां भाषाकौशलसंवर्धनाय, समृद्धभाषाणां तत्रस्थानां च कलाकोषाणां च संरक्षणाय सर्वकारीयेषु स्वनिधिपोषितेषु विद्यालयेषु च सर्वेभ्यः छात्रेभ्यः एकां शास्त्रीयभाषां तत्साहित्यं च अधिगन्तुं वर्षद्वयस्य अवसरः भविष्यति।

2020 राष्ट्रियशिक्षानीतेः 4.27 बिन्दु-संख्यायां "भारतस्य ज्ञानम्" इति विषये महत्त्वपूर्णः निर्देशो वर्तते। "भारतस्य ज्ञानम्" इत्यस्मिन् विषये आधुनिकभारतस्य प्रतिस्पर्धानां सफलतया सम्मुखीकरणे, आधुनिकभारतस्य सफलतायै, प्राचीनभारतस्य ज्ञानं योगदानञ्च, भारतीयज्ञानप्रणाली यथा- गणितं, खगोलविज्ञानं, दर्शनं, योगः, वास्तुकला, चिकित्सा, कृषिः, अभियान्त्रिकी, भाषाविज्ञानं, साहित्यं, क्रीडया सह शासनं, राजव्यवस्था, संरक्षणं च इत्यादीनां विषयाणां यत्रापि प्रासङ्गिकता भविष्यति तत्र विषयाणां सम्यक् योजनं भविष्यति । एतेषु औषधपद्धतयः, वनप्रबन्धनं, पारम्परिक (जैविकी) कृषिपद्धतिः, प्राकृतिक-कृषिपद्धतिः, स्वदेशीयक्रिडाः, विज्ञानादिषु क्षेत्रेषु प्राचीनार्वाचीनयोः भारतयोः प्रेरकाणां महापुरुषाणां ज्ञानप्रदाः विषयाः भवन्ति।

2020 राष्ट्रियशिक्षानीतेः 11.1 बिन्दु-संख्यायां समग्रशिक्षां बहुविषयकशिक्षां प्रति च प्रवृत्त्यर्थं निर्देशाः सन्ति। भारते समग्रतया बहुविषयकाध्ययनं काचित् प्राचीना परम्परा विद्यते। तक्षशिला, नालन्दा-प्रभृतिविश्वविद्यालयेषु अध्यापितानि 64 कला-कौशलानि, सङ्गीतकला, चित्रकला इत्यादिकलाविषयाः, रसायनशास्त्रं, गणितम्, इत्यादिवैज्ञानिकक्षेत्राणि, काष्ठतक्षणकार्यम्, वस्त्रसीवनकला, इत्यादिवृत्तिपरकक्षेत्राणि, औषधीयकार्यम्, अभियान्त्रिकी

इत्यादिव्यावसायिकक्षेत्राणि, सम्प्रेषणम्, चर्चा, संवादः इत्यादिव्यावहारिककौशलानि (सॉफ्ट स्किल) च अन्तर्भूतानि । गणितम्, विज्ञानम्, वृत्तिपरकविषयान्, व्यवहारिकविषयान्, व्यावसायिकविषयान् च अन्तर्भाव्य मानवसर्जनस्य सर्वाणि क्षेत्राणि कला इति भारतीयं चिन्तनमस्ति। विविधकलानां यत् ज्ञानम् अस्ति, तत् आधुनिककाले समान्यतः कथ्यते उदारकला (कलानाम् उदारकल्पना) इति। विविधकला-ज्ञानानां भारतीयशिक्षायां पुनः समायोजनम् अवश्यं भवेत् । ईदृशी शिक्षा एकविंशे (21) शताब्दे अपेक्षिता विद्यते।

2020 राष्ट्रियशिक्षानीतेः 22.1 बिन्दु-संख्यायां भारतीयभाषाणां, कलायाः, संस्कृतेश्च संवर्धनाय निर्देशो भवति। सहस्रेण वर्षैः निरन्तरं विकसितं भारतं विशिष्टस्य संस्कृतेः समृद्धः भाण्डागारः वर्तते। सा भारतसंस्कृतिः कलासु, साहित्यकृतिषु, प्रथासु, परम्परासु, भाषाभिव्यक्तिषु, कलाकृतिषु, ऐतिहासिकेषु, सांस्कृतिकसम्पत्तिस्थलेषु च परिलक्षिता भवति। भारते भ्रमणम्, भारतीयातिथ्यसत्कारस्यानन्दः, भारतस्य सुन्दरहस्तशिल्पानां हस्तनिर्मितवस्त्राणां च क्रयणम्, भारतस्य प्राचीनसाहित्यस्य पठनम्, योग-ध्यानयोः अभ्यासः, भारतीयदर्शनशास्त्रेण प्रेरणा, भारतस्य विभिन्नपर्वसु उत्सवेषु वा भागग्रहणम्, भारतस्य वैविध्यपूर्णसंगीतस्य कलायाश्च प्रशंसनम्, भारतीयचलचित्रणां दर्शनम् इत्यादयः केचनायामाः वर्तन्ते येषां माध्यमेन विश्वस्य कोटिशः जनाः अस्यां भारतीय-सांस्कृतिकविविधतायां सम्मिलिताः भवन्ति। एवम् अस्य आनन्दम् अनुभवन्ति, लाभान्विताः च भवन्ति।

एषा सांस्कृतिकी प्राकृतिकी च सम्पद् वर्तते, तस्याः भारत-सांस्कृतिकसम्पदः संरक्षणम्, संवर्धनम्, प्रसारः च देशस्य सर्वोत्तमं प्राथम्यं स्यात्, यतो हि इयं सांस्कृतिकसम्पत् देशस्य अभिज्ञानाय अर्थव्यवस्थाविकासाय च अत्यन्तं महत्त्वपूर्णा वर्तते।

2020 राष्ट्रियशिक्षानीतेः 22.2 बिन्दु-संख्यायां कलानां विषये निर्देशो वर्तते। भारतीयकलायाः संस्कृतेश्च संवर्धनं न केवलं राष्ट्राय एव आवश्यकं, राष्ट्रियजनानां कृते अपि महत्त्वपूर्णं वर्तते। बालेषु बालिकासु च स्वाभिज्ञता, देश्य-जनेषु मामकीनभावः, अन्यसंस्कृतीनां तदीयलक्षणानां च कृते गौरवबुद्धिं जनयितुं सांस्कृतिकप्रज्ञायाः जागृतिः, अभिव्यक्तिः इत्यादीनां

सामर्थ्यानां विकासस्य अपेक्षा वर्तते। बालकेषु बालिकासु च स्वकीयसांस्कृतिकेतिहासे, कलायां, भाषासु, परम्परासु च स्वकीयभावनाया विकासेनैव गुणपूर्णस्य सांस्कृतिकाभिज्ञानस्य संस्कारः उत्पादयितुं शक्यते। अतः स्वकल्याणाय समाजकल्याणाय राष्ट्रकल्याणाय च सांस्कृतिकी जागृतिः अभिव्यक्तिश्च अधिकं महत्त्वं प्राप्नेति।

प्रतिष्ठानस्य मुख्यः पाठ्यक्रमः सस्वरवेदशिक्षणरूपः (मौखिकी, श्रुतिपरम्परा च-वेदपाठेन वेदज्ञानपरम्परया च सह) वर्तते। तेन सह इतरे अनिवार्या आवश्यकाः आधुनिकविषयाः यथा- संस्कृतभाषा व्याकरणं च, आंग्लभाषा, मातृभाषा, गणितम्, सामाजिकविज्ञानम्, विज्ञानम्, संगणकविज्ञानम्, दर्शनम्, योगः, वैदिककृषिः, समाजोपयोगि-उत्पादकविषयाः (SUPW) महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षाबोर्ड् इत्यस्य प्रतिविषयं पाठ्यपुस्तकेषु संयोजिताः सन्ति। इतरे आवश्यकाः आधुनिकविषयाः भारतीयज्ञानपरम्परायाः (आई.के. एस्.) विषयाणां अनुप्रविष्टीनाम् उपरि (इनपुट) आधारिता वर्तन्ते। एते सर्वे पाठ्यपुस्तकविषया 2020 राष्ट्रियशिक्षानीतेः दिशानिर्देशस्य अनुरूपं संयोजिताः वर्तन्ते। 2020 राष्ट्रियशिक्षानीतिं, महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य वैदिक-शैक्षिकचिन्तकानां प्राधिकरणानां च परामर्शं च ध्यात्वा प्रापणीय-अभिलेख-संचिका- (PDF) (ऑनलाईन पुस्तकम्) पुस्तकानि प्रस्तुतानि सन्ति। एन.सी.ई.आर्.टी-संस्थया प्रकाशनीयायाः नवीन-राष्ट्रियपाठ्यचर्या-रूपरेखायाः अनुरूपम् एतानि पुस्तकानि अद्यतनानि करिष्यन्ते, ततः परमेव मुद्रितरूपेण पुस्तकानि उपलब्धानि भविष्यन्ति।

प्रतिष्ठानस्य राष्ट्रियादर्शवेदविद्यालयस्य अध्यापकाः, वेदाध्यापने समर्पिता वेदाचार्याः, संबद्ध-विविधवेदपाठशालानां संस्कृताध्यापकाः संस्कृतपाठ्यपुस्तकानां प्रत्नरूपम् अभिलेखम् निरन्तरं परिश्रम्य निरमन्। तदुपरि प्रतिष्ठानेन संबद्धानां वेदपाठशालानां नैके संस्कृताध्यापकाः सुपरिश्रम्य इत्थंरूपाणि संस्कृतपाठ्यपुस्तकानि सुष्ठु निर्मितवन्तः । तान् सर्वान् प्रति धन्यवादान् अर्पयामि । राष्ट्रस्तरीयाः संस्कृतभाषाविशेषज्ञाः समये समये पाठ्यपुस्तकेषु गुणवत्तामानेतुं विविधाः संस्तुतीः दत्त्वा दोषनिवारणं च कृत्वा पुस्तकानां गुणाधिक्ये साहाय्यं कृतवन्तः । तान्

सर्वानपि धन्यवादैः सभाजयामि। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, चित्राङ्कनाय च मम सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः हार्दान् धन्यवादान् अर्पयामि।

पाठ्यपुस्तकानां गुणवत्ताविकासाय पुनः परिष्काराय च रचनात्मकविचाराणां कृते स्वागतवचांसि व्याहरामि। किं बहुना--

आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानाम् आत्मन्यप्रत्ययं चेतः॥

(अभिज्ञानशाकुन्तलम् १.०२)

प्रो. विरूपाक्ष वि जड्डीपाल्
सचिवः
महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी
महर्षिसान्दीपनिराष्ट्रियवेदसंस्कृतशिक्षा-बोर्ड, उज्जयिनी

पाठ्यपुस्तकविषये प्रस्तावना

सस्वरवेदाध्ययनस्य, श्रुतिपरम्परायाः च संरक्षणाय प्रतिष्ठापितस्य महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य, प्राथमिकस्तरात् उच्चतरमाध्यमिकस्तरपर्यन्तं वेद-संस्कृत-शिक्षण-पाठ्यक्रमाणां मानकीकरणाय, संवर्द्धनाय, परीक्षामान्यतायै, प्रमाणीकरणाय च संस्थापितस्य "महर्षिसान्दीपनिराष्ट्रीयवेदसंस्कृतशिक्षाबोर्ड्" इत्यस्य वेदभूषण-पञ्चम-कक्ष्यायाः, सामान्यशिक्षणव्यवस्थायाम् दशम-कक्ष्यायाः कृते निर्धारितम् इदं पाठ्यपुस्तकम् अध्येतृहस्ते अस्ति इति नितराम् आनन्दस्य विषयः। 2020 राष्ट्रियशिक्षानीतेः (NEP-2020) अनुरूपं पुनर्व्यवस्थापितायां 3 + 4 सप्तवर्षीयायां प्रतिष्ठानस्य वेदाध्ययनपाठ्यक्रमयोजनायां वेदाध्ययननिरतान् पारम्परिकच्छात्रान् मुख्यधारायाम् आनेतुं, संस्कृतपाठ्यपुस्तकद्वारा भाषादक्षतां संवर्धयितुं च प्रयत्नः कृतः अस्ति।

वेदवाङ्मय-संस्कृतग्रन्थस्थविषयाणाम् उपयोगं कृत्वा वेद-संस्कृतपाठशालानां पाठ्यक्रमसामग्र्यः आधुनिकसमस्यानां निवारणोपायान्वेषणाय विकसिताः स्युः इति नीतिगतं चिन्तनस्ति। अत्र पाठ्यपुस्तके यथास्थानम् आधुनिकज्ञानविज्ञानैः च सह भारतीयचिन्तनधारायाः, वैदिकज्ञानस्रोतसः च उपयुक्तज्ञानसामग्रीणां समायोजनं वर्तते। भारतस्य समृद्धां प्राचीनसंस्कृतिम्, आधुनिकजीवनपद्धतिं, भारतीयज्ञानप्रणालीं, परम्परां च संयोजयितुं संवर्धयितुं च सर्वकारेण शिक्षानीतिः निर्मिता। पाठ्यसामग्रीद्वारा एतस्याः अनुभवः भवेत् इति अनुभवपूर्वकम् अधिगमाय च सामग्री अत्र प्रदत्ता।

सर्वस्तरेषु संस्कृतस्य अध्ययनम् अभिप्रेरकं, सम्प्रेरकम्, आनन्ददायकं भाषाशिक्षणसोपानानुगुणं च भवेत्। सरलतया संस्कृतभाषाशिक्षणाय, विविधविषयाध्यापनाय च उपयोगि पाठ्यपुस्तकानि भवेयुः । पुस्तकम् अभ्यस्य सरलतया संस्कृतेन संभाषितुं योग्यता छात्राणां स्वतः भवेत् । अन्यभाषामाध्यमेन संस्कृतस्य पठनं पाठनं च न भवेत्, संस्कृतमाध्यमेन एव भवेत् , संस्कृतपाठ्यविषयाणां लेखनं सरलमानकसंस्कृतेन भवेत् इत्यादीनि संकल्पनानि अस्य पाठ्यपुस्तकस्य निर्माणावसरे मनसि स्थापितानि।

संस्कृताध्यापनाय अस्य पाठ्यपुस्तकस्य उपयोगं ये कुर्वन्ति ते पुनः पुनः अभ्यासं कारयित्वा भाषण-पठन-लेखन-कौशलानां विकासाय, विशिष्टविषयज्ञानप्रदानाय च अध्यापकाः प्रयत्नं कुर्युः। पाठ्यसामग्रीनिर्माणावसरे विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादिभिः सह बहुविषयिण्याः समग्रशिक्षाया उपरि, संस्कृतभाषादक्षताविषये च बलं प्रदत्तमस्ति। शिष्टाचारः, स्वच्छता, सेवाभावना, मौलिककर्तव्यम्, नगरिकता-कौशलं मूल्यं च, सामूहिककार्यम्, मौखिकं लिखितं च अभिव्यक्तिसामर्थ्यं, संवादकौशलं च, मानवसम्बद्धानि संवैधानिकमूल्यानि, सहानुभूतिः, लोकतान्त्रिकी भावना, वैज्ञानिकचिन्तनं, न्यायः इति भावाः आनुभविकाधिगमाय तत्र तत्र पाठ्यसामग्र्याम् अन्तः निवेशिताः । इमे संस्कृतविषयाः रुचियुक्तैः विधिभिः आकर्षकविधानैः प्रासङ्गिकविधिभिः च पाठनीयाः प्रयत्नतः। संस्कृतस्य स्तरानुगुणं पाठ्यसामग्र्यां वेदसम्बद्धाः संस्कृतभाषाविषयाः योजिताः सन्ति। संस्कृतस्य सम्यक् अध्ययनं, भाषण-पठन-लेखन-कौशलविकासःभवेत्। संस्कृतभाषादक्षता अपि कौशलं भवति, वृत्तिसामर्थ्यप्राप्तये भाषाकौशलप्राप्तिः अनिवार्या अस्ति। विज्ञानादिषु क्षेत्रेषु प्राचीनार्वाचीनयोः भारतयोः प्रेरकाणां महापुरुषाणां ज्ञानप्रदाः विषयाः अपि पाठ्यसामग्र्याम् अन्तः निवेशिताः सन्ति।

कलाविज्ञानयोः सम्मिश्रणं, बहुविषयकः आधारः, विविधविषयाणां सङ्गमः च पाठ्यपुस्तके विषयदृष्या द्रष्टुं शक्यम्। विविधपाठेषु विज्ञानं, सामाजिकविज्ञानं, कला, मानविकी, क्रीडा एवमादीनि संस्कृतवाङ्मयस्य विविधानि मुखानि उद्घाटितानि सन्ति। आधुनिकभारते प्राचीनभारतीयज्ञानस्य योगदानम्, भारतस्य ज्ञानम्, भारतीयज्ञानप्रणाल्याः गणितं, खगोलविज्ञानं, दर्शनं, योगः, वास्तुकला, चिकित्सा, कृषिः, अभियान्त्रिकी, भाषाविज्ञानं, साहित्यं, क्रीडया सह शासनं, राजव्यवस्था, ज्ञान-संरक्षणं, पर्यावरणसंरक्षणम्, जलसंसाधन-संरक्षणं च इत्यादीनां विषयाणां समायोजनं विद्यते पाठ्यपुस्तके।

व्याकरणसूत्राणां, अमरकोशस्य, काव्यानां, सुभाषितानां च अवबोधपूर्वकं कण्ठस्थीकरणं विद्याग्रहणदृष्ट्या अत्यावश्यकम्, वेदस्वाध्याय इव विविधानां संस्कृतग्रन्थानां सूत्राणां च

स्वाध्यायः करणीयः, स व्युत्पत्तये आवस्यकः । प्रतिपाठं व्याकरणांशाः, काव्यांशाः, शब्दधातुरूपाणि, अन्ते भाषाविषयकाः अभ्यासाः च प्रदत्तानि सन्ति। योग्यताविस्तारे प्रदत्तैः अंशैः छात्राः स्वयम् अध्ययनं कृत्वा ज्ञानवर्धनं कर्तुं समर्था भवन्ति । अध्येतारः एतस्य संस्कृतभाषा-व्याकरण-पाठ्यपुस्तकस्य सम्यक् अध्ययनेन लाभान्विता भविष्यन्ति इति विश्वसिमः।

प्रतिष्ठानेन संबद्धानां वेदपाठशालानां संस्कृताध्यापका: श्रीसुरेशचन्द्रशर्मा, श्रीमणिशङ्करमिश्रः, डॉ.नरेशगोपालकटारा, डॉ. विजयकुमार उपाध्यायः, श्रीमनोजकुमारशर्मा, श्री अखलेशकुमारः, डॉ.ब्रजबिहारीपाण्डेयः, प्रतिष्ठानस्य अध्यापकचरः डॉ. अनूपकुमारमिश्रः च संस्कृतपाठ्यपुस्तकस्य प्राग्रूपतया (ड्राफ्ट) कांश्चन पाठान् निर्मितवन्तः। आदितः संस्कृतपाठ्यपुस्तक-निर्माण-कार्ये अस्मिन् संपूर्णतया संयुक्ताः डॉ.श्रीशेषराजरेग्मी, डॉ.यतिराज-सापकोटा, डॉ.सुकान्तप्रामाणिकः च संशोधन-प्रश्नसंयोजन-योग्यताविस्तारादियोजनेन, दोषदूरीकरणेन च अन्तिमं पुस्तकनिर्माणं कृतवन्तः। राष्ट्रियादर्शवेदविद्यालयस्य इदानीन्तनः संस्कृताध्यापकः डॉ. वेणुधरदाशः संस्कृतपाठ्यपुस्तकानां मुद्रणशोधने साहाय्यम् अकरोत्। तान् सर्वान् प्रति धन्यवादान् अर्पयामः ।

राष्ट्रस्तरीयाः विविधाः संस्कृतभाषाविशेषज्ञाः यथासमयं संस्तुतीः दत्त्वा दोषनिवारणं कृतवन्तः । तेषां सर्वेषां कृते धन्यवादाः समर्प्यन्ते। अक्षरयोजनाय, मुद्राक्षरदोषदूरीकरणाय, पत्रसंयोजनाय, चित्राङ्कनाय च श्रीमती मिताली रत्नपारखी, श्रीमती किरण-परमार, श्रीशैलेन्द्र डोडिया एवम् अन्ये च सहयोगिनः कर्मचारिणः कार्यं कृतवन्तः। तेभ्यः ताभ्यश्च हार्दान् धन्यवादान् अर्पयामः।

पाठ्यपुस्तकानां परिष्काराय विद्वांसः सूचनाः प्रयच्छन्तु इति प्रार्थनां कुर्मः।

पाठ्यपुस्तकनिर्मातृगणसदस्याः अध्यापकाः

किमर्थमध्येयं संस्कृतम् ? ..... अतः अध्येयं संस्कृतम्।

1. अस्माकं भारतराष्ट्रस्य अत्यमूल्यः ज्ञाननिधिः संस्कृतभाषा। संस्कृते ज्ञानं, विज्ञानं, शब्दसम्पत्, नूतनशब्दनिर्माणशक्तिः,चिन्तनसम्पत्, देशस्य एकसूत्रे ग्रन्थनशक्तिश्च च सन्ति। संस्कृतभाषया तत्र विद्यमानेन लौकिकेन अलौकिकेन च ज्ञानेन विश्वस्मिन् विश्वे भारतस्य महान् आदरः, प्रतिष्ठा च वर्तते। भारतं प्रति वैश्विकस्य समादरस्य रक्षणाय संवर्धनाय च, वसुधैव कुटुम्बकमिति, यत्र विश्वं भवत्येकनीडमिति च भावनायाः संपोषणाय संवर्धनाय च संस्कृतस्याध्ययनं वयं कुर्याम, संस्कृताध्ययनाय विश्वजनान् बोधयेम, संस्कृताध्ययने समादरं च दध्याम।
2. भारतीयसंस्कृतेः ज्ञानं संस्कृतभाषां विना नैव सम्भवति । भारतीयसंस्कृतेः भारतीयजीवनपद्धतेः, विविधानां पर्वणां च सम्यक् ज्ञानम् आचरणं च संस्कृताध्ययनं विना न सम्भवति। संस्कृतिः संस्कृताश्रिता। उक्तं च "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा" ।
3. मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव, सत्यं वद, धर्मं चर, सत्यान्न प्रमदितव्यम्, धर्मान्न प्रमदितव्यम्, कुशलान्न प्रमदितव्यम्, वसुधैव कुटुम्बकम्, सङ्गच्छध्वं संवदध्वं, सह नाववतु सह नौ भुनक्तु, सत्यमेव जयते नानृतम्, उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत, ईशावास्यमिदं सर्वम्, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, श्रुतं मे गोपाय, उद्धरेदात्मनात्मानम् इत्यादीनाम् अमूल्यानां प्रेरकाणां जीवनपथदर्शकाणां नीतिवाक्यानां सर्वाद्यं स्रोतः संस्कृतम्। मानवजीवनस्य साफल्याय, एतेषां नीतिवाक्यानां परिज्ञानाय च अध्येयं संस्कृतम्।
4. सर्वेषां मानावानां कृते अविनाशी सनातनः ज्ञाननिधिः वेदराशिः। वेदार्थज्ञानाय वेदभाष्यज्ञानम् आवश्यकम्, वेदभाष्यज्ञानाय संस्कृतम् अध्येयम्।
5. उदात्त-अनुदात्त-स्वरित-स्वरपूर्वकं समुच्चारितो वेदो ज्ञाननिधिः वैश्विकं सृष्टिरहस्यम्, यच्च एतावता कालेन नैवोद्घाटितं प्रमाणितं वा अन्यैः वैदेशिकैः संशोधनैः, स वेदः

संस्कृतभाषामय एव ऋषिभिः दृष्टः समाम्नातश्च। सृष्टिरहस्यस्य परिज्ञानाय मन्त्र-सृष्टिरहस्यपरिज्ञानाय चाध्येयं संस्कृतम्।

6. वेदाः, उपनिषदः, ब्राह्मणानि, आरण्यकानि, पुराणानि, शिक्षादिषड्वेदाङ्गानि, स्मृतयः, ब्रह्मसूत्र-योगसूत्रादीनि सूत्राणि, रामायणम्, महाभारतम्, भगवद्गीता, पञ्चतन्त्रम्, हितोपदेशः, नीतिशतकम्, कालिदासादिकविरचितानि विविधानि काव्यानि, भासादिरचितानि विविधानि नाटकानि च संस्कृतभाषया एव रचितानि सन्ति । एतेषां वाङ्मयविशेषाणां ज्ञानाय सततं छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

7. संस्कृते दर्शनशास्त्रम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, धर्मशास्त्रम्, नीतिशास्त्रम्, इतिहासपुराणानि आयुर्वेदादयः नानाज्ञानविषयाः विद्यन्ते। समृद्धस्य संस्कृतेः समृद्धं वाङ्मयम् अस्ति संस्कृते, तस्मात् संस्कृतम् अध्येतव्यम्।

8. संस्कृतवाङ्मयस्थानां विविधजीवनसूत्राणाम्, मानवान्तर्निहितस्य देवत्वस्य, आनन्दस्रोतसां च ज्ञानस्य, तेषां समुद्घाटनाय, आविष्काराय अमूल्यज्ञाननिधीनां ज्ञानाय च छात्रैः, सर्वैः जिज्ञासुभिः जनैश्च अध्येयं संस्कृतम्।

9. प्राचीनैः वैज्ञानिकैः चरक-सुश्रुत-कणाद-भास्कर-बोधायन-नागार्जुन-भारद्वाज-आर्यभट्ट-वराहमिहिरादिभिः रचितानां विविधानां वैज्ञानिकग्रन्थानां विज्ञानसिद्धान्तानां च सुष्ठु ज्ञानाय अध्येयं संस्कृतम्।

10. सर्वासां भारतीयभाषाणां नानावैश्विकभाषाणां च जननी पोषयित्री च संस्कृतभाषा। सर्वासु भारतीयभाषासु 95% शब्दाः संस्कृतभाषासमुत्पन्नाः एव शब्दा विलसन्ति। नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां सुलभावगमाय, सुबोधाय च, अस्माकं भारतदेशस्य एकतायै अखण्डतायै च अध्येयं संस्कृतम्।

11. संस्कृतभाषा कंप्यूटर-यन्त्रस्य प्रोग्राम-समारचानाय योग्या भाषा अस्ति, भगवद्गीतायाः भाषा अस्ति, उपनिषदां भाषा अस्ति, वास्तु-खगोल-ज्यौतिष-आयुर्वेदादि-विज्ञनस्य भाषा अस्ति, नाट्यशास्त्र-सङ्गीत-चित्रादि-ललित-कालादीनां भाषा अस्ति, मानवविकासस्य ज्ञपिका भाषा अस्ति, संस्कृते अस्ति धर्मार्थकाममोक्षोपदेशः, जीवननिर्वाहाय हितावहः

श्रुतिस्मृत्युपदेशः अस्ति, राज्यशासनाय विश्वक्षेमङ्करः अर्थशास्त्रोपदेशः च अस्ति। लोकोपकाराय आत्मोद्धाराय च विश्वजनीनं तादृशं संस्कृतम् अध्येयम् ।

12. विविधेषु देशेषु वैदेशिकाः विद्वांसः संस्कृतभाषायाः ज्ञानमहिम्ना एव संस्कृताभिमुखाः अनुसन्धाननिरताः च दृश्यन्ते। संस्कृतवाङ्मये औषधित्वेन द्रव्यगुणत्वेन च उल्लिखितान् औषधिवनस्पतीन् आश्रित्य अनुसन्धानं विधाय ते वैदेशिकाः संशोधनतत्त्वं प्राप्तवन्तः सन्ति। अस्माभिरपि भारतीयस्य ज्ञानतत्त्वस्य रक्षायै प्रकाशाय देशहिताय च अनुसन्धानार्थम् अवश्यम् अध्येतव्यं संस्कृतम्।

13. भारतराष्ट्रस्य एकतायै अखण्डतायै च अत्यावश्यकमस्ति संस्कृताध्ययनम्। आसहस्रं वर्षेभ्यः अद्यावधि भारतस्य प्रतिग्रामं, सर्वेषु प्रदेशेषु, क्षेत्रेषु, राज्येषु संस्कृतस्य प्रभावः अविच्छिन्नतया दृश्यते। सर्वविधैः ज्ञानैः परिपूर्णा इयं भाषितभाषा देववाणी संस्कृतिशेवधिः, सुमधुरा, सरला, सरसा, सुबोधा, मनोज्ञा च । भारतवासिनां प्रत्येकं जनेन मनोयोगसाधनाय, मनस्सन्धानाय, नानाराज्यवासिभिः जनैः भाषितानां विविधानां भाषाणां, तत्रस्थानां शब्दानां च सुलभतया ज्ञानाय, भारतीयतायाः रक्षायै च अवश्यम् अध्येयं संस्कृतम्।

14. संस्कृतभाषायां विविध-विषयाणां ज्ञानस्य च अपरिमितत्वात् अगाधत्वात् च ज्ञान-महिम्ना एव चिराय भारतराष्ट्रं विश्वगुरुः आसीत्। तादृशं विश्वगौरवं पुनः प्राप्तुं, विश्वजनीनसौहार्दाय, विश्वशान्तये च जानीयाम संस्कृतम्, अधीयीमहि संस्कृतम्, अध्यापयेम संस्कृतम्।

15. भाषण-भूषण-आहार-विहार-व्यवहारसम्बद्धानां सदाचाराणां ज्ञानाय, कायिक-वाचिक-मानसिकव्यवहाराणां सम्यक् परिज्ञानाय, जीवनोपयोगिनां विषयाणां सम्यक्परिशीलनपूर्वकम् अनुभवाय समाजस्योपयोगिनां नानाविषयाणां शेवधिः संस्कृतभाषा अस्ति।

16. चरकसंहिता-सुश्रुतसंहिता-अष्टाङ्गहृदयाद्यायुर्वेदग्रन्थानां परिशीलनपुरस्सरं वात-पित्त-कफानां शरीरगतानां लक्षणज्ञानपुरस्सरं स्वस्थवृत्ताचारादिज्ञानेन निरामयाय निरामयजीवनयापनाय निश्श्रेयसे चाध्येयं संस्कृतम्।

17. संस्कृतभाषानिबद्धानां षड्दर्शनानां परिशीलनेन, योगादिशास्त्राणां प्रयोगेण निरन्तरम् अष्टाङ्गयोगाभ्यासेन च आत्मोद्धाराय, निश्श्रेयसे, मनश्शान्तये, स्वान्तस्सुखाय चाध्येयं संस्कृतम्, अध्याप्यं संस्कृतम्।

18. भारतस्य प्राचीनेतिहासप्रकाशकाः पुराणादयो ग्रन्थाः संस्कृतमाध्यमेन एव संरचिताः। अष्टादशसु पुराणेषु, अन्यत्र ग्रन्थेषु, प्राचीनशिलालेखेषु च भारतस्य प्रत्येकम् ऐतिहासिक-क्षेत्रस्य इतिहासः निगूढः अस्ति। यथार्थतया अस्मद्देशस्य इतिहासमधिगन्तुं प्रकाशयितुं च संस्कृतस्य ज्ञानमावश्यकम्। अतः संस्कृतम् अध्येयम्।

19. सर्वेषां विश्वजनीनानां मानवानाम् उपयोगी ज्ञानराशिः यथा - वैद्यकम्, योगः, ध्यानम्, जलस्रोतोन्वेषणम्, राष्ट्ररक्षासूत्राणि, नक्षत्रज्ञानम्, खगोलज्ञानम्, वैश्विकसृष्टिः, यज्ञयागादिः, भौतिकज्ञानं, रासायनिकं ज्ञानं, भौगोलिकाः पर्यावरणीयाः सामाजिकाः ज्ञानाधाराः, नीतिः, न्यायः इत्यादयः विषयाः, अन्यानि चिरन्तनानि चिन्तनानि च विलसन्ति संस्कृतग्रन्थेषु। तादृशानां विविधविषयाणां ज्ञानाय अध्येयं संस्कृतम्।

20. भाषाभिमानस्य, धनाभिमानस्य, मताभिमानस्य, आभिजात्याभिमानस्य, क्षेत्राभिमानस्य, अहङ्कारस्य च दूरीकरणपूर्वकं सत्यं, शिवं, सुन्दरम् इति भावनापूर्वकं सर्वत्र समबुद्धित्वस्य साधनाय अनुभवाय च, ततः भारतस्य राष्ट्रियैकतायै, अखण्डतायै, विकासाय च अध्येयं संस्कृतम्।

21. जीवनस्य सर्वाङ्गीणविकासाय, ज्ञानं (अध्यात्मं), विज्ञानं, कौशलं, कला चेति सर्वेऽपि विषयाः नूनमेव अपेक्षिताः। एतेषां चतुर्णां भारतीयविषयाणां ज्ञानाय, संवर्धनाय, अनुभूत्यै च संस्कृतस्य ज्ञानम् अनिवार्यम् अस्ति। अतः संस्कृतम् अध्येयम्।

माध्यमिकस्तरकक्ष्या - उद्देश्यानि

वेदभूषणपञ्चमवर्षम् - पूर्वमध्यमायाः द्वितीयवर्षेण/दशमवर्गेण समकक्षम्

1. हितोपदेशस्य कथामाध्यमेन सङ्घे एव शक्तिः तथा मानवस्य स्वभावमनोभावानां च अवगमनसामर्थ्यं वितन्वन्ति।
2. यमनचिकेतसोः उपनिषत्कथामाध्यमेन श्रेयोमार्गं प्रेयमार्गं च प्रतीत्य ओंकारम् आत्मविद्यां च प्राप्तुं प्रयतमाना भवन्ति।
3. द्विकर्मकक्रियापदानि पठित्वा सम्भाषणे तेषां प्रयोगं स्वच्छया आत्मविश्वासेन च कर्तुं क्षमन्ते।
4. 'कोशपरिचयः' इति पाठमाध्यमेन नानाकोशानां विशेषतया अमरकोशस्य वैशिष्ट्यं, व्यवहारे तस्य महत्त्वं, निघण्टोः अध्ययनेन वैदिकशब्दानां च निर्वचनस्य ज्ञानपूर्वकं मन्त्रार्थानुसन्धाने अर्हाः सञ्जायन्ते।
5. महाकविभवभूतेः परिचयं, करुणरसवैशिष्ट्यं च अभिज्ञाय सीतारामयोः आदर्शचरित्रं जानन्ति।
6. 'राष्ट्राभिवर्धनम्' इति पाठमाध्यमेन राष्ट्रस्य विकासाय समुन्नतये च प्रयतमानाः भवन्ति। राष्ट्रभक्तिभावनायाः अभिवृद्धिश्च जायते।
7. अस्माकं राष्ट्रस्य धर्मस्य च संरक्षणाय संवर्धनाय च प्रेरिताः भवन्ति। एवं राष्ट्रद्रोहिणां लुण्ठकानां च नाशकानां महावीराणां शौर्यविषये देशसंरक्षणयोगदान-विषये च अभिजानन्ति।
8. प्रत्येकं मनुष्याणां मनसि निर्मलभाव आस्ताम्, सर्वेषां हृदि समानो भावो विलसतु। इति सज्जानानां नीतिं विदन्ति।
9. सार्वधातुकानां लकाराणामार्धधातुकलकाराणां वा प्रयोगः कस्मिन्नर्थे करणीय इति ज्ञात्वा संस्कृतसंभाषणे वाक्कातुर्यस्य कौशलम् आप्नुवन्ति।
10. भूमण्डले अशान्तेः महामारिरोगाणां प्रकोपस्य कारणं प्रज्ञापराधमेव इति जानन्ति, एवं प्रज्ञापराधाद् आत्मानं दूरे स्थापयितुं प्रयतन्ते।

11. सुभाषितानां पठनेन आहारः, व्यवहारः, नित्यक्रिया, निरामयजीवनयापनम् इत्यादिविषये दत्तमना भवन्ति।
12. विश्वस्य प्राचीनतमायाः संस्कृतभाषायाः सर्वज्ञानस्य निधिम् अभिज्ञाय, तस्य ज्ञानस्य स्वव्यवहारे प्रयोगाय प्रेरिता भवन्ति। संस्कृतभाषायाः महत्त्वम् अन्यान् जनान् बोधयन्ति।
13. 'सहसा विदधीत न क्रियाम्' इति पाठाद् अत्युत्साहेन क्रोधेन वा यत्किमपि कार्यम् अविचिन्त्य न कर्तव्यम् इति जानन्ति।
14. पञ्चगव्यस्य प्रयोगेण गोस्पर्शनेन च जीवने समागतानां समस्तरोगाणां नाशाय तथा हृष्टपुष्टशरीरलाभाय गोरक्षणम् अवश्यमेव करणीयम् इति विदन्ति। एवं सर्वाप्राणिनां संरक्षणं कर्तव्यम् इति बोधो भवति।
15. छात्रेषु प्राचीनभारतीयशास्त्रज्ञानां चरित्रे तेषाम् अनुसन्धाने च आदरभावनायाः विकासः वैज्ञानिकचिन्तनाभ्यासस्य संवर्धनञ्च जायते।
16. भारतीयानां वेदगणितज्ञानां ज्ञानपूर्वकं वेदगणितस्य विज्ञानं ससूत्रं जानन्ति, प्रयोगं च कुर्वन्ति।

टिप्पणी - पाठ्यपुस्तकेऽस्मिन् मुख्यांशानामेव समायोजनं कृतं वर्तते। समग्रज्ञानार्थं **शिक्षकैः मूलग्रन्थाः अध्याप्याः छात्रैश्च अध्येतव्याः**। अत्र सर्वेषां पाठगतानाम् उद्देश्यानां सामान्यतया ज्ञानाय एकत्र समायोजनेन उल्लेखः कृतः अस्ति। कक्ष्यायां साक्षात् पाठावसरे अन्तर्निहितान् उद्देश्यान् मनसि निधाय तं तं पाठम् अध्यापकः पाठयेत्, विद्यार्थिनः विद्यार्थिनीश्च बोधयेत्।

पाठानुक्रमणिका

	प्रार्थना	
प्रथमः पाठः	संहतिः कार्यसाधिका	1 - 11
द्वितीयः पाठः	यमनचिकेतसोः सम्भाषणम्	12 - 20
तृतीयः पाठः	द्विकर्मकधातवः	21 - 28
चतुर्थः पाठः	कोशपरिचयः	29 - 36
पंचमः पाठः	रामस्य करुणो रसः	37 - 52
षष्ठः पाठः	राष्ट्राभिवर्धनसूक्तम्	53 - 58
सप्तमः पाठः	महामदो यवनो भारतम् अलुलुण्ठत्	59 - 69
अष्टमः पाठः	भावैक्यसन्देशः	70 - 75
नवमः पाठः	लकारार्थः	76 - 82
दशमः पाठः	प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्	83 - 90
एकादशः पाठः	सुभाषितानि	91 - 98
द्वादशः पाठः	सर्वज्ञानमयी संस्कृतभाषा	99 - 111
त्रयोदशः पाठः	सहसा विदधीत न क्रियाम्	112 - 119
चतुर्दशः पाठः	गोरक्षणम्	120 - 128
पञ्चदशः पाठः	भारतीयाः प्राचीनाः वैज्ञानिकाः	129 - 138
षोडशः पाठः	वेदगणितज्ञः	139 - 145
सप्तदशः पाठः	संविधाननिर्माता अम्बेडकरमहोदयः	146 - 152

श्रीवेदपुरुषाय नमः

मङ्गलम्

१. ॐ स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव।
पुनर्ददताघ्नता जानता सं गमेमहि॥

ऋग्वेदः ५.५१.१५

२. तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत्॥ पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात्॥

यजुर्वेदः ३६.२४

३. उपह्वरे गिरीणा२ सङ्गमे च नदीनाम्।
धिया विप्रो अजायत॥

सामवेद ऐ.पू. १४३

४. मुक्ताविद्रुमहेमनील-धवलच्छायैर्मुखैस्त्रीक्षणैः
युक्तामिन्दुकलानिबद्ध-रत्न-मकुटां तत्त्वार्थवर्णात्मिकाम्।
गायत्रीं वरदाभयाङ्कुशकशाः शूलं कपालं तथा
शङ्खꣳचक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे॥

५. विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

६. नीलाम्बुजश्यामलकोमलाङ्गं सीतासमारोपितवामभागम्।
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम्॥

प्रथमः पाठः

संहतिः कार्यसाधिका

हितोपदेशस्य परिचयः

विश्वविख्याते संस्कृतवाङ्मये गद्यसाहित्यं महत्त्वपूर्णं स्थानं भजते। संस्कृतसाहित्ये संस्कृतकथाया नीतिकथायाश्च महत्तमं स्थानं दरीदृश्यते। नीतिकथासाहित्ये हितोपदेशोऽन्यतमं स्थानमाप्नोति। हितोपदेशकथा लोकनीतिम्, राजनीतिम्, जीवनोपायनीतिञ्च वितन्वन्ति। ग्रन्थोऽयं विपश्चिता नारायणेन प्राणायि। अस्य हितोपदेशस्य चत्वारः परिच्छेदाः उपलभ्यन्ते -

(१) मित्रलाभः (२) सुहृद्भेदः (३) विग्रहः (४) सन्धिश्च। अस्यानुवादो नानासु भाषासु समजायत। अत्र विविधकथामाध्यमेन नीतिशास्त्रस्य सामाजिकनियमानां शिक्षा प्रदत्ता। गद्यं पद्यञ्च उभयसमन्वितो हितोपदेशः।

इह प्रमुखतया सङ्घः कार्यसाधनाय कल्पते, अतः संघटनं करणीयम्। इत्यंशं कविरुपस्थापयति।

कथा -

अस्ति गोदावरीतीरे विशालः शाल्मली तरुः। तत्र नानादिग्देशाद् आगत्य रात्रौ पक्षिणो निवसन्ति। अथ कदाचिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः, कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत्। तमवलोक्याचिन्तयत् - 'अद्य प्रातरेवानिष्टदर्शनं जातम्, न जाने किमनभिमतं दर्शयिष्यति।' इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः। अथ तेन व्याधेन तण्डुलकणान्विकीर्य जालं विस्तीर्णम्। स च प्रच्छन्नो भूत्वा स्थितः। तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पस्तांस्तण्डुलकणानवलोकयामास। ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान्प्रत्याह 'कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः? तन्निरूप्यतां तावत्। भद्रमिदं न पश्यामि प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम् -

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।
वृद्धव्याघ्रेण सम्प्राप्तः पथिकः स मृतो यथा॥

कपोता ऊचुः - कथमेतत् ? सोऽब्रवीत् - अहमेकदा दक्षिणारण्ये चरन्नपश्यम्। एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते 'भो भो पान्थाः! इदं सुवर्णकङ्कणं गृह्यताम्। ततो लोभाकृष्टेन केनचित् पान्थेनालोचितम् - भाग्येनैतत्सम्भवति। किन्त्वस्मिन्नात्मसन्देहे प्रवृत्तिर्न विधेया। यतः -

अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।
यत्रास्ति विषसंसर्गोऽमृतं तदपि मृत्यवे॥

तन्निरूपयामि तावत्। प्रकाशं ब्रूते - कुत्र तव कङ्कणम् ? व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत् - कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच - शृणु रे पान्थ ! प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च। वंशहीनश्चाहम्। ततः केनचिद्धार्मिकेणाहमादिष्टः - "दानधर्मादिकं चरतु भवान्"। तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तः कथं न विश्वासभूमिः ? यतः -

इज्याऽध्ययनदानानि तपः सत्यं धृतिः क्षमा।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः॥

मम चैतावाँल्लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद् दातुमिच्छामि। तथापि 'व्याघ्रो मानुषं खादति' इति लोकोपवादो दुर्निवारः। यतः -

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः॥
मातृवत्परदारेषु परद्रव्येषु लोष्टवत्।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण। ततो यावदसौ तद्वचः - प्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् - अहह, महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः, स पान्थोऽचिन्तयत् -

न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः॥

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च। अतोऽहं ब्रवीमि - कङ्कणस्य तु लोभेन इत्यादि। अतः सर्वथाऽविचारितं कर्म न कर्तव्यम्। यतः -

सुजीर्णमन्नं सुविचक्षणः सुतः सुशासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं सुदीर्घकालेऽपि न याति विक्रियाम्॥

एतद्वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह - 'आः, किमेवमुच्यते ?'

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते।
सर्वत्रैव विचारे तु भोजनेऽप्यप्रवर्तनम्॥

एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः।

असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय।
प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति॥

अनन्तरं सर्वे जालेन बद्धा बभूवुः। ततो यस्य वचनात्तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति। तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच - 'नायमस्य दोषः।' यतः -

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने॥

विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्। इदानीमप्येवं क्रियताम् । सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्। यतः -

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥

इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः। अनन्तरं स व्याधः सुदूराज्जालापहार-कांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत् -

संहतास्तु हरन्त्येते मम जालं विहंगमाः।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा॥

ततस्तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः।

अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः - 'किमिदानीं कर्तुमुचितम् ?' चित्रग्रीव उवाच -

माता मित्रं पिता चेति स्वभावात्त्रितयं हितम्।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः॥

तदस्माकं मित्रं हिरण्यको नाम मूषकराजो गण्डकीतीरे चित्रवने निवसति, सोऽस्माकं पाशांश्छेत्स्यति इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः। हिरण्यकश्च सर्वदाऽपायशङ्कया शतद्वारं विवरां कृत्वा निवसति। ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः। चित्रग्रीव उवाच - 'सखे हिरण्यक ! किमस्मान्न सम्भाषसे ?'। ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं बहिर्निःसृत्याब्रवीत् - 'आः, पुण्यवानस्मि। प्रियसुहृन्मे चित्रगीवः समायातः।

पाशबद्धांश्चैतान्दृष्ट्वा सविस्मयः क्षणं स्थित्वोवाच - 'सखे ! किमेतत् ? चित्रग्रीवोऽवदत् - 'सखे ! अस्माकं प्राक्तनजन्मकर्मणः फलमेतत्।

यस्माच्च येन च यथा च यदा च यच्च यावच्च यत्र च शुभाशुभमात्मकर्म।
तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च विधातृवशादुपैति॥

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति। चित्रग्रीव उवाच - 'मित्र ! मा मैवम्। अस्मदाश्रितानामेषां तावत्पाशांश्छिन्धि, तदा मम पाशं पश्चाच्छेत्स्यसि। हिरण्यकोऽप्याह - 'अहमल्पशक्तिः दन्ताश्च मे कोमलाः। तदेतेषां पाशांश्छेत्तुं कथं समर्थः ? तद्यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशं छिनद्मि। तदनन्तरमेषामपि बन्धनं यावच्छक्यं छेत्स्यामि। चित्रग्रीव उवाच - 'अस्त्वेवम्। तथापि यथाशक्त्येतेषां बन्धनं खण्डय। हिरण्यकेनोक्तम् - आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां सम्मतम्।

चित्रग्रीव उवाच - सखे ! नीतिस्तावदीदृश्येव। किं त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः। तेनेदं ब्रवीमि। यतः -

विना वर्तनमेवैते न त्यजन्ति ममान्तिकम्।
तन्मे प्राणव्ययेनापि जीवयैतान्ममाश्रितान्॥

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः, पुलकितः सन्नब्रवीत् - साधु मित्र ! साधु। अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते। एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि। ततो हिरण्यकः सर्वान्सादरं संपूज्याह - सखे चित्रग्रीव ! सर्वथात्र जालबन्धनविधौ दोषमाशङ्क्यात्मन्यवज्ञा न कर्तव्या। यतः -

व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदं
बध्यन्ते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि।
दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः ?

कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि॥

इति प्रबोध्यातिथ्यं कृत्वालिङ्ग्य च चित्रग्रीवस्तेन सम्प्रेषितो यथेष्टदेशान्सपरिवारो ययौ। हिरण्यकोऽपि स्वविवरं प्रविष्टः। यतः -

यानि कानि च मित्राणि कर्तव्यानि शतानि च।

पश्य मूषकमित्रेण कपोता मुक्तबन्धनाः॥

शब्दार्थाः

दरीदृश्यते	अतिशयेन दृश्यते
विपश्चिता	विदुषा
प्राणायि	रचितवान्
अवसन्नायां	अवशेषे
अस्ताचलचूडावलम्बिनि	अस्ताचलस्य शिखरे
कृतान्तमिव	यमराजतुल्यम्
विकीर्य	विक्षिप्य
प्रच्छन्नो भूत्वा	निलीय
वियति	आकाशे
संहतिः	सङ्घटनम्
कार्यसाधिका	कार्यं साधयति या सा
छेत्स्यति	छेदं करिष्यति
विवरम्	छिद्रम्
विधातृवशाद्	भाग्यवशात्
उपैति	समीपं गच्छति
उपसर्पति	समीपं याति
सत्वरम्	त्वरया

आश्रितानाम्	आलम्बितानाम्

अभ्यासः

१. **वस्तुनिष्ठाः प्रश्नाः।**

(क) विशालः शाल्मलीतरुः आसीत् -

(अ) भागीरथीतीरे (आ) गोदावरीतीरे

(इ) गण्डकीतीरे (ई) यमुनातीरे

(ख) संहतिः कार्यसाधिका नाम पाठे काकस्य नाम आसीत् -

(अ) हिरण्यकः (आ) चित्रग्रीवः

(इ) लघुपतनकः (ई) मकरः

(ग) कङ्कणस्य लोभेन मग्नः -

(अ) गोदावरीनद्याम् (आ) गहनेकूपे

(इ) महासागरे (ई) पङ्के सुदुस्तरे

(घ) व्याधेन विकीर्य जालं विस्तीर्णम् -

(अ) चणकान् (आ) गोधूमकणान्

(इ) तण्डूलकणान् (ई) यवकणान्

(ङ) चित्रग्रीवस्य मित्रम् आसीत् -

(अ) लघुपतनकः (आ) वानरः

(इ) हिरण्यकः (ई) मकरः

२. **अधोलिखितप्रश्नान् उत्तरत।**

(क) 'संहतिः कार्यसाधिका' अत्र केषां मित्राणां कथा वर्तते ?

(ख) व्याधं दृष्ट्वा वायसः किम् अचिन्तयत् ?

(ग) गोदावरीतीरे कः पादप आसीत् ?

(घ) नानादिग्देशादागत्य रात्रौ पक्षिणः कुत्र निवसन्ति ?

(ङ) कपोतराजः तण्डुलकणान् कदा अपश्यत् ?

३. **पूर्णवाक्येन प्रश्नान् समाधत्त।**

(क) वृद्धानां वचनं कदा ग्राह्यं भवति ?

(ख) मूषको हिरण्यकः केषां बन्धनं छिनत्ति ?

(ग) व्याधः अरण्यं गत्वा किम् अकरोत् ?

(घ) मूषकस्य गृहे कति विवराणि आसन् ?

(ङ) के मुक्तबन्धनाः ?

४. **रिक्तस्थानानि पूरयत -**

(क) अद्य प्रातरेवा ..... जातम्।

(ख) एतद्वचनं ..... कश्चित् कपोतः सदर्पमाह।

(ग) अथ ते व्याधेन ..... जालं विस्तीर्णम्।

(घ) अस्माकं ..... फलमेतत्।

(ङ) हिरण्यकोऽपि ..... प्रविष्टः।

(च) कालो हि व्यसनप्रसारितकरो .....।

(छ) वृद्धव्याघ्रेण ..... स मृतो यथा॥

(ज) इज्याऽध्ययनदानानि .....।

(झ) तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच .....।

५. **सन्धिविच्छेदं कुरुत -**

	सन्धिविच्छेदः
(क) शुभाशुभम्	.....+.....
(ख) चिन्तयन्नेव	.....+.....
(ग) प्रच्छन्नो भूत्वा	.....+.....
(घ) व्याकुलश्चलितः	.....+.....
(ङ) रात्रावस्ताचल	.....+.....

६. **कोष्ठके विद्यमानानां शब्दानां विभक्तिलिङ्गवचनानि लिखत -**

		विभक्तिः	**लिङ्गम्**	**वचनम्**
(क)	वयम्	.....	.....	.....

(ख)	चन्द्रमसि	.....	.....	.....
(ग)	अस्मात्	.....	.....	.....
(घ)	वने	.....	.....	.....
(ङ)	लोभेन	.....	.....	.....
(च)	विपत्काले	.....	.....	.....
(छ)	सर्वे	.....	.....	.....

७. श्लोकांशान् समायोजयत -

(क)	कङ्कणस्य तु लोभेन	शुभाशुभमात्मकर्म
(ख)	मातृजङ्घा हि वत्सस्य	कर्तव्यानि शतानि च
(ग)	अल्पानामपि वस्तूनां	मग्नः पङ्केः सुदुस्तरे
(घ)	यावच्च यत्र च	स्तम्भीभवति बन्धने
(ङ)	यानि कानि च मित्राणि	संहतिः कार्यसाधिका

८. मञ्जुषाया उचितम् अव्ययं चित्वा रिक्तस्थानं पूरयत -

अत्र	अद्य	तत्र	एव	सर्वदा	कथं

(क) ..... नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति।

(ख) ..... प्रातरेवानिष्टदर्शनं जातम्।

(ग) कुतो ..... निर्जने वने तण्डुलकणानां सम्भवः ?

(घ) विपत्काले विस्मय ..... कापुरुषलक्षणम्।

(ङ) हिरण्यकश्च .....ऽपायशङ्कया शतद्वारं विवरं कृत्वा निवसति।

(च) तदेतेषां पाशांश्छेत्तुं ..... समर्थः ?

९. प्रकृति-प्रत्यय-संयोगं कुरुत।

(क)	आ + गम् + ल्यप्	=	.....
(ख)	अव + लोक् + ल्यप्	=	.....
(ग)	नि + वृत् + क्त	=	.....
(घ)	भू + तव्यत्	=	.....

(ङ) वच् + क्त्वा = ...

(च) बन्ध + ल्युट् = ...

१०. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत।

(क) **व्याधेन** तण्डुलकणान्विकीर्य **जालं** विस्तीर्णम्।

(ख) **व्याघ्रो** हस्तं प्रसार्य दर्शयति।

(ग) **लोभात्** सरः स्नातुं प्रविशति।

(घ) अनन्तरं सर्वे **जालेन** बद्धा बभूवुः।

(ङ) **चित्रग्रीवस्य** बन्धनं छेत्तुं सत्वरमुपसर्पति।

(च) अनेनाश्रितवात्सल्येन **त्रैलोक्यस्यापि** प्रभुत्वं त्वयि युज्यते।

(छ) हिरण्यकोऽपि **स्वविवरं** प्रविष्टः।

११. प्रयोगपरिवर्तनं कुरुत।

(क) अस्ति गोदावरीतीरे विशालः शाल्मली तरुः।

(ख) अहमेकदा दक्षिणारण्ये चरन्नपश्यम्।

(ग) व्याघ्रो हस्तं प्रसार्य दर्शयति।

(घ) व्याघ्रेण व्यापादितः खादितश्च।

(ङ) पक्षिणः सर्वे जालमादाय उत्पतिताः।

१२. 'संहतिः कार्यसाधिका' इत्यस्याः कथायाः सारं संस्कृतभाषया, मातृभाषया, आङ्ग्लभाषया वा लिखत।

योग्यता-विस्तारः

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा॥
अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत्॥
आयुः कर्म च वित्तञ्च विद्या निधनमेव च।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः॥
मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च।
पञ्चतन्त्रात्तथाऽन्यस्माद्ग्रन्थादाकृष्य लिख्यते॥
अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्।
विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषम्॥
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः॥
ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः॥
कोऽधन्यो बहुभिः पुत्रैः कुशूलापूरणाढकैः?।
वरमेकः कुलालम्बी यत्र विश्रूयते पिता॥
मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः।
तावच्च शोभते मूर्खो यावत्किंचिन्न भाषते॥
विद्यया वपुषा वाचा वस्त्रेण विनयेन च।
वकारैः पञ्चभिर्युक्तैः नरो भवति पूजितः॥
बालसखित्वमकारणहास्यं स्त्रीषुविवादमसज्जनसेवा।
गर्दभयानमसंस्कृतवाणी षड्भिर्नालघुतामुपयाति॥
पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते।
तच्छान्तिरौषधैर्दानैर्जपहोमसुरार्चनैः॥

प्रश्नवाचकान् शब्दान् अनिश्चयवाचकार्थं परिवर्तनाय 'चित्' एवं 'चन' इत्यनयोः निपातयोः प्रयोगः कर्तव्यः। निपाताः यदा सर्वनामपदैः सह उपयुज्यन्ते तदा ते सर्वनामपदत्वेन व्यवह्रियन्ते, तथा अव्ययपदैः साकं यदा निपाताः प्रयुक्ता भवन्ति तदा ते अव्ययपदत्वेन व्यवह्रियन्ते। यथा -

कः = कः + चन = कश्चन (एकवचने पुंल्लिङ्गे), तथैव का + चन = काचन (एकवचने स्त्रीलिङ्गे), किञ्चन (एकवचने नपुंसकलिङ्गे)।

कः = कः + चित् = कश्चित् (एकवचने पुंलिङ्गे), काचित् (एकवचने स्त्रीलिङ्गे), किञ्चित् (एकवचने नपुंसकलिङ्गे)।

के = के + चन = केचन (बहुवचने पुंलिङ्गे), काः + चन = काश्चन (बहुवचने स्त्रीलिङ्गे), कानिचन (बहुवचने नपुंसकलिङ्गे)।

के = के + चित् = केचित् (बहुवचने पुंलिङ्गे), काः + चित् = काश्चित् (बहुवचने स्त्रीलिङ्गे), कानिचित् (बहुवचने नपुंसकलिङ्गे)।

किम् इति शब्दस्य सर्वासु विभक्तिषु सर्वेषु वचनेषु त्रिषु लिङ्गेषु च चित् एवं चन इत्यस्य प्रयोगो भवति। यथा -

कश्चित्, काचित्, किञ्चित्, (प्र.ए.), कश्चन, काचन, किञ्चन (प्र.ए.)

कञ्चित्, काञ्चित्, किञ्चित् (द्वि.ए), कञ्चन, काञ्चन, किञ्चन (द्वि. ए.)

एवमेव तृतीयादिविभक्तिषु चिच्चनयोः रूपाणि प्रचलन्ति।

चित् चन च यदा अव्ययपदैः युज्येते तदा तावपि अव्ययत्वं प्राप्नुतः। यथा -

क्वचित्	-	क्वचन
कदाचित्	-	कदाचन

द्वितीयः पाठः

यमनचिकेतसोः सम्भाषणम्

प्रस्तुतोऽयं पाठ्यांशः कृष्णयजुर्वेदस्य कठशाखायाः कठोपनिषदः स्वीकृतोऽस्ति। कठशाखान्तर्गतत्वादियं कठोपनिषद् अभिहिता। अस्यामुपनिषदि द्वावध्यायौ विद्येते। तत्र प्रत्येकमध्याये तिस्रो वल्ल्यः सन्ति। आहत्य षड् वल्ल्यो वर्तन्ते। अत्रोपनिषदि नवदशोत्तरैकशतं (११९) मन्त्रास्सन्ति। अस्यामुपनिषदि यम-नचिकेतसोः ब्रह्मविद्यासम्बद्धः संवादो विद्यते। अत्र उभयोः संवादेन आत्मविद्यायाः सुष्ठु ज्ञानं प्रतिपादितम्। तत्र यमो नचिकेतसे त्रीन् वरान् प्रददाति। तत्र तृतीयवररूपेण आत्मतत्त्वज्ञानं प्रदीयते।

गौतमवंशीयमहर्षेः अरुणस्य पुत्रः महर्षिरुद्दालकः 'विश्वजित्' नाम यज्ञञ्चकार। उद्दालकः तस्य यज्ञस्य दक्षिणायै दुग्धरहिताः प्रजननशक्तिरहिताः इन्द्रियरहिताश्च गाः ददासीत्, ताः दृष्ट्वा नचिकेताः खिन्नमनस्को बभूव, तदा स पितरमपृच्छत् भोः पितः! मां कस्मै दास्यसीति वारत्रयं प्रश्नमिमम् अपृच्छत्। पिता क्रुध्यन्नकथयत् - मृत्यवे त्वा ददामीति। तथोक्तम् -

पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।
अनन्दा नाम ते लोकांस्तान् स गच्छति ता ददत्॥
स होवाच पितरं ततः कस्मै मां दास्यसीति।
द्वितीयं तृतीयं तं होवाच मृत्यवे त्वा ददामीति॥

कठोपनिषद् १.३-४

नचिकेताः पितुराज्ञां सहर्षं स्वीकृत्य यमलोकं प्राप्नोत्, तत्र यमराजः मृत्युलोके नासीत्। नचिकेताः बहिरेव अन्नजलं विनैव रात्रित्रयं यावत् प्रतीक्षामकरोत्। यदा यमराजः प्रत्यागतः तदा स नचिकेतसः जलान्नरहितां प्रतीक्षां ज्ञात्वा रात्रित्रयस्य प्रतीक्षायाः कृते अतिथेः सम्मानार्थं वरत्रयाय न्यवेदयत् -

तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन् ब्रह्मन्नतिथिर्नमस्यः।
नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व॥ १.१.९॥

ततः पश्चाद् नचिकेताः प्रथमं वरं पितुः प्रसन्नार्थं शान्त्यर्थं च अयाचत, मम गौतमवंशीयः पिता उद्दालकः क्रोधवशाद् अशान्तः दुःखितः सन् मां मृत्युलोकं प्रेषितवान्, तन्निरसनमस्तु, मह्यं पितृस्नेहः पूर्ववदेवास्तु इति प्रथमं वरम् अवृणोत्।

शान्तसंकल्पः सुमना यथा स्यात् वीतमन्युर्गौतमो माभि मृत्यो।
त्वत्प्रसृष्टं माऽभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे॥ १.१.१०॥

नचिकेताः द्वितीयं वरम् अग्निविद्यायाः ज्ञानमयाचत, येन सः अत्यन्तं सुखपूर्वकं स्वर्गलोके भयरहितः स्थातुं शक्नोति। नचिकेतसो विलक्षणां प्रतिभां वीक्ष्य यमराजः प्रसन्नो भूत्वा अग्निविद्या एव नचिकेता इति नाम्ना प्रसिद्धो भूयात् इत्यवदत्।

स त्वमग्निँ स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि त्वँ श्रद्दधानाय मह्यम्।
स्वर्गलोका अमृतत्वं भजन्त एतद् द्वितीयेन वृणे वरेण॥ १.१.१३॥

नचिकेताः तृतीयवरप्राप्तये मर्त्यानां मरणानन्तरं आत्मनो यथार्थस्वरूपविषयिकां विचिकित्सां प्राकटयत्। यमराजोऽकथयत् - हे नचिकेतः! स्वर्ग्यम् अग्निम् सम्यक् वेद्मि मम प्रतिज्ञानुसारम् अहं सर्वं कथयामि सर्वतोभावेन सज्जो भव त्वम्।

त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत्तरति जन्ममृत्यू।
ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमाँ शान्तिमत्यन्तमेति॥ १.१.१७॥

नचिकेताः त्रिकर्मकृद् यम् अग्निं वारत्रयं चिनोति अर्थात् ज्ञान-कर्म-उपासनाभिः सम्बद्धो भवति स जन्ममृत्यू तरति, ब्रह्मणः प्रभूतं स्तुत्यमग्निं ज्ञात्वा शान्तिं लभते शोकातिगश्च भवति।

एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण।
एतमग्निं तवैव प्रवक्ष्यन्ति जनासः तृतीयं वरं नचिकेतो वृणीष्व॥ १.१.१९॥

हे नचिकेतः! मया तव द्वितीयवरानुसारम् अग्नेः साधनकविषयं ज्ञानं फलञ्च प्रोक्तं, यः तव नाम्नैव लोके ख्यातो भविष्यति, अतः तृतीयं वरं वृणीष्व। पुनः नचिकेताः तृतीयं वरं वृण्वन् कथयति यदा मनुष्यः मृत्युं प्राप्नोति तदा जनाः संशयापन्ना भवन्ति, केचन कथयन्ति अयमात्मा केचन नायमात्मा इति त्वयादिष्टोऽहं आत्मविषयकज्ञानं तृतीयवररूपेण इच्छामि।

येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।
एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः॥ १.१.२०॥

यदा यमो नचिकेतसः आत्मज्ञानविषयकं तृतीयं वरदानम् अशृणोत् तदा किं निःश्रेयस्साधननामज्ञानार्हः न वा परीक्षणार्थमाह पुरा देवताभिः आत्मविषयकः संशयः कृतः, सूक्ष्मतमं ज्ञानमिदं न हि सुज्ञेयं अतः अन्यं वरं वृणीष्व। पुनः नचिकेता उवाच हे यमराज ! देवैः विचिकित्सितं किल त्वया प्रोक्तं न सुज्ञेयम्। परम् अस्य आत्मनः वक्ता त्वादृशो न लभ्यः, निःश्रेयःप्राप्तिहेतुः तुल्यः वरो नान्यः।

पुनः यमराजः अकथयत् शतायुषः पुत्रपौत्रान् गवादिलक्षणान्बहून् पशून्, हस्तिहिरण्यम्, अश्वान्, विस्तीर्णां भूमिम् इच्छायुश्च वृणिष्व। मर्त्यलोके ये दुर्लभाः कायाः तान् स्वेच्छया प्रार्थयस्व। नचिकेताः प्रत्युदतरत् - ये भोग्यपदार्थाः त्वया निर्दिष्टास्ते क्षणभङ्गुरा एव। व्यक्तिः कदाऽपि वित्तेन तृप्ता न भवति। अहं त्वां दृष्टवान् अतः धनमायुश्च तव इच्छया प्राप्नोम्येव अतः वरणीयः वरस्तु आत्मज्ञानमेव। यथा -

न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तमद्राक्ष्म चेत्त्वा।
जीविष्यामो यावदीशिष्यसि त्वं वरस्तु मे वरणीयः स एव॥ १.१.२७॥

हे मृत्युदेव ! संसारेऽस्मिन् जना नित्यं सुखमिछन्ति नैके उपायांश्च कुर्वन्ति, तत्र श्रेयोमार्गः प्रेयोमार्गश्च इति मार्गद्वयं वर्तते प्रथमः मार्गः प्रियः प्रतिभाति परन्तु परिणामतः दुःखकरो भवति तत्र बुद्धिमान् धीरो जनः उभयं मार्गम् अवलोक्य श्रेयोमार्गमेव वृणोति।

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽपि प्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद्वृणीते॥ १.२.२॥

अविद्यायामन्तरे विद्यमानाः स्वयं धीराः पण्डितमानिनो जना नाना योनिषु विचरन्ति, यथा प्रज्ञाचक्षुः जनेन नीयमानः प्रज्ञाचक्षुवदेव। तथा च वृत्तमोहे लुब्धा जना अयमेव लोकः नास्ति अपरः इति चिन्तयन्तः आभीक्ष्ण्यं मृत्युलोकमेव प्राप्नुवन्ति। भवदीप्सितं ज्ञानं तद्विषये कुशलवक्ता श्रोता च दुर्लभौ स्तः। तर्हि पुनः सुविज्ञेयमिति चेत् -

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः।
अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमणुप्रमाणात्॥ १.२.८॥

सामान्यजनेन कथितेन बहुधा चिन्तितेन च एतत् ज्ञानं न सुविज्ञेयम्, अपितु तत्त्वज्ञानयुक्तो जनः यदा नोपदिशति तदा नास्ति गतिरन्यस्य आयुः प्रमाणात् अतिसूक्ष्मत्वाच्च। बुद्धिमान् जनः अध्यात्मयोगमाध्यमेन दुर्विज्ञेयं सर्वत्र व्याप्तं गभीरं बुद्धिरूपगुहायां स्थितं सनातनदिव्यगुणोपेतम्

आत्मानं ज्ञात्वा हर्षशोकं जहाति। एवंभूतो धीरो जनो योग्यम् उपदेशं श्रुत्वा गभीरतया चिन्तयित्वा च तत्त्वज्ञानमादातुं शक्नोति स एव अधिकारी भवति तथा त्वमसि, अतो यत् परमतत्त्वमस्ति तत् कथयामि।

सर्वे वेदा यत्पदमामनन्ति तपाँसि सर्वाणि च यद्वदन्ति।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदँ संग्रहेण ब्रवीम्योमित्येतत्॥ १.२.१५॥

सर्वे वेदाः यत् पदं निगदन्ति सर्वे तपांसि यत् पदं ब्रुवन्ति यदिच्छन्तः ब्रह्मचर्यं चरन्ति तत्पदं संग्रहरूपेण "ॐ" इति एतत्। एतदक्षरं ब्रह्म ज्ञात्वा यः यदिच्छति तथा प्राप्नोति। ओमिति श्रेष्ठः आधारः सर्वोत्कृष्टश्च एतत् ज्ञात्वा जनः ब्रह्मलोकमवाप्नोति -

एतदालम्बनँ श्रेष्ठमेतदालम्बनं परम्।

एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥ १.२.१७॥

तथा ज्ञानवान् जनो (आत्मा) न जायते, न म्रियते, अजन्मा, नित्यः, सनातनः, शरीरस्य नाशे सत्यपि न म्रियते।

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्।

अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ १.२.१८॥

तथात्मा सूक्ष्मातिसूक्ष्मः स्थुलातिस्थुलो विद्यते तस्य निवासः अस्माकं हृद्गुहायामेव विद्यते तथापि निष्कामकर्म कर्ता एवं परमात्मनः इच्छया द्रष्टुं शक्नोति।

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।

यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूँ स्वाम्॥ १.२.२३॥

अयमात्मा प्रवचनेन न लभ्यो, ज्ञेयो न मेधया ग्रन्थार्थधारणशक्त्या, न बहुना श्रुतेन। तर्हि केन लभ्यम् इति चेत् यं स्वात्मानमेव साधकः वृणुते प्रार्थयते तेनैवात्मा लभ्य इति ज्ञायते।

शब्दार्थाः

पीतोदका	दुग्धरहिता
निरिन्द्रिया	निष्क्रियम् इन्द्रियं यस्याः
अनश्नन्	न भुञ्जानः
वृणिष्व	याचताम्

अनुशिष्टः	अवशेषः
तर्पणीयः	सन्तोषणीयः
श्रेयः	दुःखनिवृत्तिमार्गः
प्रेयः	भौतिकसुखसाधकमार्गः
आभीक्ष्ण्यम्	पौनःपुन्येन
दुग्धदोहाः	याभ्यः पयो दुग्धम्
जग्धतृणाः	याः तृणानि खादितवत्यः, अधुना खादितुं न शक्नुवन्ति।

अभ्यासः

१. **वस्तुनिष्ठाः प्रश्नाः -**

(क) उपनिषद् इति शब्दस्य कोऽर्थः?

(अ) आत्मविद्या (आ) अग्निविद्या

(इ) मोक्षविद्या (ई) महाविद्या

(ख) वेदानाम् अन्तिमभागो वर्तते ।

(अ) संहिता (आ) ब्राह्मणम्

(इ) आरण्यकम् (ई) उपनिषद्

(ग) अग्नेः उपदेष्टा नचिकेता अभवत्-

(अ) ब्रह्मा (आ) यमः

(इ) देवाः (ई) बृहस्पतिः

(घ) नचिकेतसः पिता नचिकेतसं कस्मै प्रादात् ?

(अ) विष्णवे (आ) मृत्यवे

(इ) यमाय (ई) ब्रह्मणे

(ङ) वाजश्रवसः कस्य पिता आसीत् ?

(अ) नचिकेतसः (आ) सत्यकामस्य

(इ) उपमन्योः (ई) जबालस्य

२. अधोलिखितप्रश्नान् उत्तरत -

(क) नचिकेतसः पितुः नाम किम् ?

(ख) अरुणस्य पुत्र कः ?

(ग) 'मृत्यवे त्वा ददामि' इति कमुद्दिश्य कथनम् ?

(घ) यमलोकं कः प्राप्तवान् ?

(ङ) नचिकेताः कति वरान् वृणुते ?

३. पूर्णवाक्येन प्रश्नान् समाधत्त -

(क) उद्दालकः स्वपुत्रं क्रोधवशात् किमकथयत् ?

(ख) मृत्युलोके नचिकेताः कति रात्रीः बहिरेवातिष्ठत् ?

(ग) 'त्रीन् वरान्वृणीष्व' इति कस्य वचनमिदम् ?

(घ) मनुष्यः केन तर्पणीयः न ?

(ङ) मन्दः कस्य मार्गस्य वरणं करोति ?

४. रिक्तस्थानं पूरयत -

(क) पण्डितमानिनो जनाः ..... विचरन्ति ?

(ख) ..... ज्ञात्वा हर्षशोकं जहाति।

(ग) सर्वे वेदाः ..... आमनन्ति।

(घ) ..... सर्वाणि च यद्वदन्ति।

(ङ) यदिच्छन्तः ..... चरन्ति।

(च) एतदालम्बनं ..... ब्रह्मलोके महीयते।

५. सन्धिना सन्धिविच्छेदेन वा रिक्तस्थानानि पूरयत -

(क) क्रुध्यन्नकथयत् = ... + ...।

(ख) ..... = दास्यसि+इति।

(ग) विनैव = ... + ...।

(घ) ..... = संसारे+अस्मिन्।

(ङ) ..... = एतद्+ज्ञात्वा।

(च) सर्वोत्कृष्टः = ... + ...।

(छ) प्रथमं वरम् = ... + ...।

६. उदाहरणमनुसृत्य पदनिर्माणं कुरुत -

यथा - दृश्+क्त्वा = दृष्ट्वा।

(क) क्रुध् + शतृ .....

(ख) स्वी-कृ + क्तवतु .....

(ग) प्र-वच् + क्त .....

(घ) आ-दा + तुमुन् .....

(ङ) बुद्धि + मतुप् .....

(च) दृश् + क्तवतु .....

७. उदाहरणमनुसृत्य वाक्यानि रचयत -

यथा - नचिकेताः पितुराज्ञां सहर्षं स्वीकृतवान्।

(क) ..... यज्ञञ्चकार।

(ख) ..... अपृच्छत्।

(ग) ..... इच्छामि।

(घ) ..... शक्नोति।

(ङ) ..... दास्यसि।

(च) ..... स्तः।

८. अधोलिखितपदेभ्यो भिन्नप्रकृतिकं पदं चित्वा लिखत -

(क) यदा, तदा, तथा, त्वम्। .....

(ख) अरुणस्य, यज्ञस्य, तस्य, मह्यम्। .....

(ग) गच्छति, दास्यति, ददामि, पितः। .....

(घ) ददत्, क्रुध्यन्, वरान्, अश्नन्। .....

(ङ) बुद्धिमान्, ज्ञातवान्, दृष्टवान्, प्रेषितवान्। .....

९. शुद्धवाक्यानां पुरतः 'आम्' तथा अशुद्धवाक्यानां पुरतः 'न' इति लिखत -

(क) मृत्यवे तुभ्यं ददामीति। ☐

(ख) नचिकेतः बहिरेव अन्नजलं विनैव रात्रित्रयं यावत् प्रतीक्षामकरोत्। ☐

(ग) नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु। ☐

(घ) निःश्रेयःप्राप्तिहेतुः तुल्यं वरं नान्या। ☐

(ङ) स्वर्गलोके भयरहितः स्थातुं शक्नोति। ☐

(च) मृत्युदेवः किमर्थं परीक्षणं करोति? ☐

१०. श्लोकांशान् यथायोग्यं योजयत -

(क) न जायते म्रियते वा विपश्चिन्नायं	न हन्यते हन्यमाने शरीरे।
(ख) अजो नित्यः शाश्वतोऽयं पुराणो	कुतश्चिन्न बभूव कश्चित्।
(ग) नायमात्मा प्रवचनेन लभ्यो	आत्मा विवृणुते तनूँ स्वाम्।
(घ) यमेवैष वृणुते तेन लभ्यस्तस्यैष	न मेधया न बहुना श्रुतेन।

११. प्रयोगपरिवर्तनं कुरुत -

(क) मृत्युलोके यमराजः नासीत्।

(ख) महर्षिरुद्दालकः विश्वजित् नाम यज्ञं चकार।

(ग) नचिकेताः पितुराज्ञां सहर्षं स्वीकृतवान्।

(घ) मां कस्मै दास्यसीति प्रश्नमिमम् अपृच्छत्।

(ङ) यमः नचिकेतसः तृतीयं वरदानम् अश्रृणोत्।

१२. नचिकेताः किमर्थं यमलोकं गच्छति इति वर्णयत।

१३. नचिकेताः यान् त्रीन् वरान् प्राप्तवान् तान् यथाक्रमं वर्णयत।

योग्यता-विस्तारः

अस्मिन् पाठ्यक्रमे प्रदत्तं तथ्यं सामान्यमेव पूर्णज्ञानाय मूलग्रन्थस्यावलोकनं कुर्वन्तु गुरोः सकाशात् ज्ञानमर्जयन्तु। कठोपनिषदि द्वौ अध्यायौ विद्येते। तत्र प्रत्येकमध्याये वल्लीत्रयं विद्यते।

प्रथमोऽध्यायः	द्वितीयोऽध्यायः
प्रथमा वल्ली २९	प्रथमा वल्ली १५

द्वितीया वल्ली २५	द्वितीया वल्ली १५
तृतीया वल्ली १७	तृतीया वल्ली १८
सम्पूर्णः योगः ७१	आहत्य ४८
११९ मन्त्राः	

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।

बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥

विज्ञानसारथिर्यस्तु मनः प्रग्रहवान्नरः।

सोऽध्वनः परमाप्नोति तद्विष्णोः परमं पदम्॥

उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत

क्षुरस्य धारा निशिता दुरत्यया।

दुर्गं पथस्तत्कवयो वदन्ति॥

स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति।

महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः।

तमेव भान्तमनुभाति सर्वं तस्य भाषा सर्वमिदं विभाति॥

नित्योऽत्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।

तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम्॥

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः।

तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते॥

तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन॥ एतद्वै तत्॥

तृतीयः पाठः

द्विकर्मकधातवः

अकथितं च *(पा.सू. १.४.५१)*

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। अर्थाद् अपादानस्य, सम्प्रदानस्य, करणस्य, अधिकरणस्य च यस्य कारकस्य कथनस्य इच्छा न भवति, तस्य कर्मसंज्ञा भवति। संस्कृतभाषायां तादृशाः षोडशधातावः सन्ति -

दुह्-याच्-पच्-दण्ड्-रुधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्-मुषाम्।
कर्मयुक्स्यादकथितं तथा स्यान्नी-ह्-कृष्-वहाम्॥

एषां धातूनां प्रयोगे एकं तु मुख्यं कर्म भवति अपरञ्च अपादानादिकारकैः अविवक्षितं गौणं कर्म भवति। अस्मिन् गौणे कर्मणि एव अत्र द्वितीया विभक्तिः भवति। इमे धातवः एव द्विकर्मकधातवः कथ्यन्ते, एतेषां प्रयोगोऽत्र क्रियते -

१.	दुहँ प्रपूरणे	-	गोपालः गां दोग्धि पयः।
२.	याचँ याञ्चायाम्	-	वामनो बलिं याचते वसुधाम्।
३.	डुपचष् पाके	-	पाचकः तण्डुलानोदनं पचति।
४.	दण्डँ दण्डनिपाते	-	भूपतिः गर्गान् शतं दण्डयति।
५.	रुधिर् आवरणे	-	श्रीकृष्णो गां व्रजम् अवरुणद्धि।
६.	प्रच्छँ ज्ञिप्सायाम्	-	सः माणवकं पन्थानं पृच्छति।
७.	चिञ् चयने	-	मोहनः वृक्षं फलानि अवचिनोति।
८.	ब्रूञ् व्यक्तायां वाचि	-	गुरुः शिष्यं धर्मं ब्रूते।
९.	शासुँ अनुशिष्टौ	-	उपाध्यायः माणवकं धर्मं शास्ति।
१०.	जि जये	-	यज्ञदत्तो देवदत्तं शतं जयति।
११.	मन्थँ विलोडने	-	अयं क्षीरनिधिं सुधां मथ्नाति।
१२.	मुषँ स्तेये	-	चौरः देवदत्तं धनं मुष्णाति।
१३.	णीञ् प्रापणे	-	बालकः अजां ग्रामं नयति।
१४.	हृञ् हरणे	-	इयं कृष्णं धनं हरति।

१५. कृषँ विलेखने - कृषकः क्षेत्रं महिषीं कर्षति।

१६. वहँ प्रापणे - कृषकः ग्रामं भारं वहति।

अवधेयम् -

अर्थनिबन्धनेयं संज्ञा, यथा - बलिं भिक्षते वसुधाम् माणवकं धर्मं भाषते, अभिधत्ते वक्तीत्यादि।

विवरणम् -

एते प्रयोगाः द्विकर्मका विद्यन्ते। एकं मुख्यं कर्म अपरं च गौणं कर्म भवति। यथा प्रथमोदाहरणे 'पयः' मुख्यं कर्म 'ग्राम' इति गौणं कर्म । एवमेव द्वितीयोदाहरणे वसुधां मुख्यं कर्म 'बलिं' इति गौणम् कर्म। एवमेव अन्यत्रापि क्रियया यस्य साक्षात् सम्बन्धः तत् मुख्यं कर्म बोध्यम्।

अन्ये प्रयोगाः -

१. अधिकारिणः श्रमिकान् कार्यं कथयन्ति।

२. भिक्षुकाः श्रेष्ठिनं धनं भिक्षते।

३. साधुः नागरिकान् हितम् उपदिशति।

४. मुनिः महिलां भाग्यं ब्रवीति।

५. गुरुः छात्रं पाठं बोधयति।

द्विकर्मकस्थले कर्मणि प्रयोगः

"द्विकर्मकाणां तु गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।"

इमानि द्विकर्मकवाक्यानि कर्मणि प्रयोगे (कर्मवाच्ये) एवं प्रयोक्तव्यानि -

१.	गोपालः गां पयो दोग्धि।	१.	गोपालेन गौः पयः दुह्यते।
२.	वामनः बलिं वसुधां याचते।	२.	वामनेन बलिः वसुधां याच्यते।
३.	पाचकः तण्डुलान् ओदनं पचति।	३.	पाचकेन तण्डुलाः ओदनं पच्यन्ते।
४.	राजा गर्गान् शतं दण्डयति।	४.	राज्ञा गर्गाः शतं दण्ड्यन्ते।
५.	गोपः गां व्रजम् अवरुणद्धि।	५.	गोपेन गां व्रजः अवरुध्यते।
६.	पान्थः माणवकं पन्थानं पृच्छति।	६.	पान्थेन माणवकः पन्थानं पृच्छ्यते।

७.	वटुः वृक्षं फलानि अवचिनोति।	७.	वटुना वृक्षः फलानि अवचीयते।
८.	पिता माणवकं धर्मं ब्रूते।	८.	पित्रा माणवकः धर्मम् उच्यते।
९.	गुरुः माणवकं धर्मं शास्ति।	९.	गुरुणा माणवकः धर्मं शास्यते।
१०.	चैत्रः देवदत्तं शतं जयति।	१०.	चैत्रेण देवदत्तः शतं जीयते।
११.	सुरासुरगणः सुधां क्षीरनिधिं मथ्नाति।	११.	सुरासुरगणेन सुधां क्षीरनिधिः मथ्यते।
१२.	चैत्रः देवदत्तं शतं मुष्णाति।	१२.	चैत्रेण देवदत्तः शतं मुष्यते।
१३.	कृषकः ग्रामम् अजां नयति।	१३.	कृषकेण ग्रामम् अजा नीयते।
१४.	गोपः वृषभं गोष्ठं हरति।	१४.	गोपेन वृषभः गोष्ठं ह्रियते।
१५.	गोपः गोवत्सं गोष्ठं कर्षति।	१५.	गोपेन गोवत्सः गोष्ठं कृष्यते।
१६.	कृषकः अजापुत्रं नगरं वहति।	१६.	कृषकेण अजापुत्रः नगरं उह्यते।

गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामाणि कर्ता स णौ *(पा. सू. १.४.५२)*

गत्याद्यर्थानां शब्दकर्मणाम् अकर्मकाणां च अणौ यः कर्ता स णौ कर्म स्यात्। गतिः गमनम्। बुद्धिः अवगमनम्। प्रत्यवसानं भक्षणम्। शब्दकर्मा - शब्दः कर्म (श्लोकः, गद्यम्, मन्त्रः) येषां ते शब्दकर्माणः। अकर्मकः - यस्य धात्वर्थस्य कर्म एव न सम्भवति स इति। अणि - अण्यान्तावस्थायाम्। णौ - ण्यन्तावस्थायां (प्रेरणावस्थायां) इत्यर्थः। अर्थात् गत्यर्थक-बुद्ध्यर्थक-प्रत्यवसानार्थक-शब्दकर्मणाम्-अकर्मकाणां धातूनां प्रयोगे अण्यन्तावस्थायाः कर्त्ता ण्यन्तावस्थायां कर्म भवति।

उदाहरणम्- **शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत्।**
आशयच्चामृतं देवान् वेदमध्यापयद् विधिम्॥
आशयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।

अर्थः	अण्यन्तावस्था	ण्यन्तावस्था	कर्ता (अणौ)	कर्म (णौ)
गत्यर्थकः	शत्रवः स्वर्गमगच्छन्।	हरिः शत्रून् स्वर्गम् अगमयत्।	शत्रवः	शत्रून्
बुद्ध्यर्थकः	स्वे वेदार्थम् अविदुः।	हरिः स्वान् वेदार्थम् अवेदयत्।	स्वे	स्वान्
प्रत्यवसानार्थः	देवाः अमृतम् आश्नन्।	हरिः देवान् अमृतम् आशयत्।	देवाः	देवान्

शब्दकर्मा	विधिः वेदम् अध्यैत।	हरिः विधिं वेदम् अध्यापयत्।	विधिः	विधिम्
अकर्मकः	पृथ्वी सलिले आस्त।	हरिः पृथ्वीं सलिले आसयत्।	पृथ्वी	पृथ्वीम्

अन्ये प्रयोगाः -

१. ते गृहम् अगच्छन्। - सः तान् गृहम् अगमयत्।

२. बालकः विषयं जानाति। - शिक्षकः बालकं विषयं ज्ञापयति।

३. शिशुः अन्नं भुङ्क्ते। - माता शिशुम् अन्नं भोजयति।

४. शिष्यः शास्त्रं पठति। - गुरुः शिष्यं शास्त्रं पाठयति।

५. बालकः विद्यालयं याति। - माता बालकं विद्यालयं यापयति।

६. मित्रं वार्तां शृणोति। - कृष्णः मित्रं वार्तां श्रावयति।

७. बालः स्वपिति। - जननी बालं स्वापयति।

ण्यन्तस्य कर्मणिप्रयोगः -

बुद्ध्यर्थकस्य, भक्षणार्थकस्य, शब्दकर्मकाणाञ्च प्रयोज्यकर्मणि प्रधानकर्मणि वा लकारो भवति। एतां स्त्रीन् विहाय अन्येषां प्रयोज्यकर्मणि लकारो विधीयते। (अण्यन्तावस्थायां यः कर्ता स एव ण्यन्तावस्थायां प्रयोज्यकर्म भवति। यथा - शिष्यः मन्त्रार्थं बुध्यते। आचार्यः शिष्यं मन्त्रार्थं बोधयति। इह द्वितीयवाक्ये शिष्यः प्रयोज्यकर्म तथा मन्त्रार्थः इति प्रधानकर्म। एवमन्यत्रापि अवधेयम्।) उक्तञ्च -

बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया।

प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः॥

गत्याद्यर्थकानां ण्यन्तस्य कर्मणिप्रयोगज्ञानाय कोष्ठकः -

१. आचार्यः शिष्यं सूत्रार्थं बोधयति।	१. आचार्येण शिष्यः सूत्रार्थं बोध्यते। / आचार्येण शिष्यं सूत्रार्थो बोध्यते।
२. जननी बालं दुग्धं पाययति।	२. जनन्या बालो दुग्धं पाय्यते। / जनन्या बालं दुग्धं पाय्यते।
३. शिक्षकः अन्तेवासिनं ऋचम् उच्चारयति।	३. शिक्षकेण अन्तेवासी ऋचम् उच्चार्यते। / शिक्षकेण अन्तेवासिनं ऋग् उच्चार्यते।

४. जनकः पुत्रं पाठशालां गमयति।	४. जनकेन पुत्रः पाठशालां गम्यते।
५. पुत्रः मातरम् उपवेशयति।	५. पुत्रेण माता उपवेश्यते।
६. शिक्षिका छात्रं चित्रं दर्शयति।	६. शिक्षिकया छात्रः चित्रं दृश्यते।
७. अधिकारी पाचकं भोजनं कारयति।	७. अधिकारिणा पाचकः भोजनं कार्यते।
८. गुरुः शिष्यं जलं हारयति।	८. गुरुणा शिष्यः जलं हार्यते।

शब्दार्थाः

अवेदयत्	ज्ञापितवान्/अज्ञापयत्
आशयत्	अभोजयत्/भोजितवान्
स्वे	आत्मानः, आत्मीयाः
द्विकर्मकः	द्वे कर्मणी यस्य सः
अध्यैत	अधीतवान्
आश्नन्	आदन्/अत्तवन्तः
आस्त	उपाविशत्
सलिले	अप्सु
आसयत्	अस्थापयत्/स्थापितवान्

अभ्यासः

१. अधोनिर्दिष्टं वाक्यद्वयं योजयित्वा एकं वाक्यं लिखत।

यथा - अध्यापकः छात्रं पृच्छति। अध्यापकः प्रश्नं पृच्छति।

अध्यापकः छात्रं प्रश्नं पृच्छति।

(क) गोपः गां दोग्धि। गोपः पयः दोग्धि।

(ख) बालकः गुरुम् अपृच्छत्। बालकः गृहकार्यम् अपृच्छत्।

(ग) छात्रः पाठं बुध्यते। गुरुः पाठं बोधयति।

(घ) लवकुशौ अकथयताम्। वाल्मीकिः रामायणम् अकथयत्।

(ङ) रावणः अम्रियत। रामः अमारयत्।

२. कोष्ठकेषु प्रदत्तान् शब्दान् आश्रित्य वाक्यानि रचयत -

यथा - अध्यापकः पृच्छति। (छात्रः, प्रश्नः)

अध्यापकः छात्रं प्रश्नं पृच्छति।

(क) रामः अपृच्छत्। (हनुमान्, मार्गः)

(ख) दिलीपः अनयत्। (नन्दिनी, आश्रमः)

(ग) श्रीकृष्णः अबोधयत्। (अर्जुनः, गीता)

(घ) त्वं वद। (पिता, कथा)

(ङ) निर्धनाः न याचन्तु। (कृपणः, धनं)

३. उदाहरणानुसारेण रिक्तस्थानानि पूरयत -

यथा - बालः विद्यालयं गच्छति। पिता बालं विद्यालयं गमयति।

(क)	बालः गद्यं पठति।	अध्यापकः .....।
(ख)	शिशुः ओदनं भुङ्क्ते।	माता .....।
(ग)	छात्रः श्लोकार्थं बुध्यते।	गुरुः ..... ।
(घ)	वृद्धः उपविशति।	तरुणः .....।
(ङ)	स पाठं पठितवान्।	गुरुः .....।
(च)	शिष्याः जलं पिबन्ति।	भवान् .....।
(छ)	शिष्याः नगरं गच्छन्ति।	मुनिः ..... ।

४. रिक्तस्थानानि पूरयत -

(क) दुह्-याच् ..... वहाम्।

(ख) गतिबुद्धि ..... स णौ।

(ग) शत्रूनगमयत्स्वर्गं ..... विधिम्॥

(घ) गत्याद्यर्थानां ..... च अणौ यः कर्ता स णौ कर्म स्यात्।

(ङ) गौणे कर्मणि ..... नीहृकृष्वहाम्।

५. अधोलिखितानां प्रश्नानाम् उत्तरं संस्कृतभाषया लिखत -

(क) द्विकर्मकधातवः कति के च ते ?

(ख) 'अकथितं च' इति सूत्रार्थं लिखत।

(ग) ण्यन्तावस्था का ? उदाहरणपुरस्सरं लिखत।

(घ) अकर्मकाणाम् अणौ यः कर्ता णौ सः कस्यां विभक्तौ भवति ?

(ङ) 'गां दोग्धि पयः' वाक्यमिदं कर्मणि परिवर्तयत।

(च) 'कृषकेण अजा ग्रामं नीयते' इति वाक्यं कर्तरि परिवर्तयत।

६. अधः प्रदत्तानां पदानां प्रकृतिप्रत्ययान् विभज्य लिखत -

	प्रकृतिः	प्रत्ययः
अध्यैत	.....	.....
अगच्छन्	.....	.....
दोग्धि	.....	.....
मज्ञाति	.....	.....
शास्ति	.....	.....
ब्रूते	.....	.....
उपदिशति।	.....	.....

७. अधोलिखितक्रियापदानि उचितपदैः सह मेलयत।

(क) पिता माणवकं धर्मं	पाठयितव्याः
(ख) कृषकेण अजा नगरम्	ब्रूते
(ग) रमा पाठशालां	स्वापयति
(घ) माता बालं	याति
(ङ) तेन अहम्	दृश्यसे
(च) मया त्वं	आह्वये
(छ) अस्माभिः श्लोकाः	उह्यते
(ज) गुरुणा वेदाः	उच्चारणीयाः
(झ) हरिः पृथिवीं सलिले	अगमयम्

(ञ) अहं तान् नगरम् आसयत्

८. अधोलिखितवाक्यानि परिशोध्य लिखत -

(क) पिता माणवकं धर्मं ब्रूते।

(ख) श्रीकृष्णेन गाम् व्रजम् अवरुणद्धि।

(ग) हरिः विधिना वेदमध्यापयत्।

(घ) वटुः वृक्षं फलानि अवचीयन्ते।

(ङ) कृषकेण ग्रामः अजां नीयते।

९. अण्यन्ते विद्यमानानि वाक्यानि ण्यन्ते परिवर्तयत -

यथा - शिशुः पयः पिबति। (माता)

माता शिशुं पयः पाययति।

(क) बालकः वेदं पठति। (उपाध्यायः)

(ख) शिष्याः ग्रामं गच्छन्ति। (गुरुः)

(ग) शिशुः उपविशति। (पिता)

(घ) देवाः अमृतम् अश्नन्। (हरिः)

(ङ) नचिकेताः आत्मतत्त्वं जानाति। (यमः)

योग्यता-विस्तारः

दुह्यते इत्यारभ्य मुष्यते इत्यन्तं यावत् गौणे कर्मणि लकारः कृतः। अतो गौणकर्मणः अभिधानाद् तस्य न द्वितीया, अपि तु प्रथमैव। नीयते इत्यारभ्य उह्यते इत्यन्तं यावत् प्रधाने कर्मणि लकारः कृतः, अतः प्रधानकर्मणः अभिधानात् तस्य न द्वितीया अपि तु प्रथमा।

अत्र दुह्यादयो द्वादश धातवः। तेषाम् एकः गणः नीहृकृष्वहश्चत्वारो धातवः। तेषाम् अपरः गणः। दुहादीनां गौणे कर्मणि लकारः। नीहृकृष्वहां प्रधाने कर्मणि लकारः इति विवेकः। गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् इति वचनम्।

चतुर्थः पाठः

कोशपरिचयः

यथा राज्यसंरक्षणाय राज्ञां कृते प्रतिक्षणं धनस्य महती अपेक्षा विद्यते, तथैव विदुषां कृतेऽपि प्रतिपदम् अर्थज्ञानाय शब्दकोशस्य महती अपेक्षा भवति। **'एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति'** इति पातञ्जलमहाभाष्यानुसारं शब्दमहत्त्वं सुस्पष्टमेव। श्रुतिस्मृत्यादिशास्त्रज्ञानं शब्दार्थलिङ्गादिबोधककोषज्ञानाधीनम्। तच्च ज्ञानं साकल्येन प्रकृति-प्रत्यय-तदर्थ-बोधक-स्वरादि-सम्प्रापक-व्याकरणज्ञानाधीनम्। इत्थं शब्दशास्त्रस्य (व्याकरणशास्त्रस्य) शब्दकोषस्य च महत्त्वं स्पष्टमेव।

प्राचीनकाले तपयोगबलेन महर्षयः साक्षात् मन्त्रद्रष्टारो भवन्ति स्म। एकस्यापि शब्दस्य तत्त्वार्थज्ञाने लेशमात्रमपि शङ्कावसरः तेषां नाभूत्। अत एव वैयाकरणानाम् अयं सिद्धान्तः प्रसिध्यति यत् - "सर्वे सर्वार्थवाचकाः"। ततः कालक्रमेण तपोयोगादिह्रासमवलोक्य महर्षिः कश्यपो वेदानां दुर्बोधशब्दसमुदायं संगृह्य 'निघण्टु' नामकं वैदिककोषं रचयामास। गच्छति काले जनस्मृतिह्रासमवलोक्य निघण्टुग्रन्थस्थान् क्लिष्टान् शब्दान् सारल्येन बोधयितुं यास्कमुनिः निघण्टुव्याख्याभूतं निरुक्तनामकं ग्रन्थं प्राणयत्। एवमेवाग्रेऽपि दूषितान्नपानसंसर्गाचरणादिदोषैः ततोऽप्यधिकतमे तपश्चरणादि-क्षयेण बुद्धिह्रासे जाते निरुक्तज्ञानेऽपि अशक्ते नैके विपश्चितः लौकिकान् कोषान् अरचयन् ।

लौकिकसंस्कृतकोशपरम्परायां कोशकाराणां कोशो द्विविधः भवति, तद्यथा - नामतन्त्रं, लिङ्गतन्त्रञ्च इति। तत्र लिङ्गतन्त्रसम्बद्धकोशेषु संस्कृतशब्दानां लिङ्गनिर्देशो भवति। अयं कोशः प्रायेण गद्यात्मको भवति। नामतन्त्रात्मककोशस्यापि प्रकारद्वयं विद्यते। यथा - एकः समानार्थकशब्दसूचीकोशः अपरश्च अनेकार्थकोशः (नानार्थकोशः)।

संस्कृतवाङ्मये सम्प्रत्युपलभ्यमानेषु कोशग्रन्थेषु अत्यन्तं प्रधानः प्राचीनतमः प्रसिद्धतमश्च कोशः अमरसिंहविरचितः नामलिङ्गानुशासननामधेयः अमरकोशः। पुरा भारतवर्षे संस्कृताध्ययने प्रवृत्तिः अमरकोशपठनपूर्वकैव आसीत्। एतदनु काव्यानां शास्त्रग्रन्थानां च अध्ययने अध्यापने वा प्रवर्तन्ते स्म अन्तेवासिनो विद्यार्थिनः आचार्याश्च। "अष्टाध्यायी जगन्माता अमरकोशो जगत्पिता" इत्याभाणकं तु अमरकोशाध्ययनमहत्त्वं स्वयमेवोद्घोषयति ।

कवेरमरसिंहस्य कृतिरेषा सुनिर्मला।

आचन्द्रतारकं स्थेयान्नामलिङ्गानुशासनम्॥

अमरकोशात् प्राचीनाः संस्कृतकोशाः केवलामेकां प्रणालीमेवावलम्ब्य प्रणीता आसन्। कतिपयकोशाः नाममात्रतन्त्रभूता अपरे लिङ्गमात्रतन्त्रभूताः आसन्। एषामेव पूर्वकोशानामाधारं गृहीत्वा अमरसिंहो नामलिङ्गानुशासनं (अमरकोशं) व्यरचयत्। काण्डत्रयात्मकोऽयम् अमरकोशः। अस्मिन् शुद्धपर्यायाः, पर्यायभासः, अनिश्चिता अथवा अस्पष्टपर्याया इति त्रिविधं पर्यायाणां निर्देशो दृश्यते।

अमरकोशस्य प्रथमे काण्डे दशवर्गा वर्तन्ते। ते च स्वर्ग-व्योम-दिक्-काल-धी-शब्दादि-नाट्य-पातालभोगि-नरक-वारिवर्गाः। स्वर्गवर्गे - ७१, व्योमवर्गे -१, दिग्वर्गे-३५, कालवर्गे- ३१, धीवर्गे -१७, शब्दादिवर्गे -२५.१/२, नाट्यवर्गे - ३८, पातालभोगिवर्गे - ११, नरकवर्गे -३.१/२, वारिवर्गे -४५, श्लोकाः आहत्य अस्मिन् काण्डे २७८ अनुष्टुप्छन्दसि श्लोकाः सन्ति।

द्वितीयकाण्डे पृथ्वी-पुर-शैल-वनौषधि-सिंहादि-नृ-ब्रह्म-क्षत्रिय-वैश्य-शुद्राः इति दश वर्गा विद्यन्ते।

भूमिवर्गे - १८, पुरवर्गे - २०, शैलवर्गे - ८, वनौषधिवर्गे -१६९.१/२, सिंहादिवर्गे - ४३, मनुष्यवर्गे - १३९.१/२, ब्रह्मवर्गे - ५७.१/२, क्षत्रियवर्गे - ११९.१/२, वैश्यवर्गे - १११, शूद्रवर्गे - ४६.१/२ श्लोकाः, आहत्य काण्डेऽस्मिन् ७३२.१/२ अनुष्टुप्छन्दसि श्लोकाः विद्यन्ते।

तृतीये काण्डे विशेष्यनिघ्न-संकीर्ण-नानार्थ-अव्ययलिङ्गादिसङ्ग्रहाश्चैते पञ्चवर्गाः सन्ति। विशेष्यनिघ्नवर्गे - ११२, संकीर्णवर्गे - ४२.१/२, नानार्थवर्गे - २५६.१/२, अव्ययवर्गे - २३, लिङ्गादिसङ्ग्रहवर्गे - ४६ श्लोकाः सन्ति। आहत्य ४८० अनुष्टुभा बद्धाः श्लोकाः वर्तन्ते। अस्मिन् अमरकोशे १४९०.१/२ अनुष्टुभा बद्धाः श्लोकाः विद्यन्ते। २२५ श्लोकेषु नानार्थवर्णनं विद्यते। अवशिष्टभागे समानार्थाः शब्दाः सन्ति।

अमरकोशस्य नामान्तराणि

समाहृत्यान्यतन्त्राणि सङ्क्षिप्तैः प्रतिसंस्कृतैः।

सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्॥

इत्यत्र नामलिङ्गानुशासनम् इत्युल्लेखः प्राप्यते। इत्थं ग्रन्थकर्त्रोक्तरीत्यास्य ग्रन्थस्य नामलिङ्गानुशासनम् इति प्रथमं नाम। कोशोऽयं काण्डत्रयात्मकम् इति त्रिकाण्डचिन्तामणिः,

त्रिकाण्डविवेकः इति चोच्यते। अत एव 'त्रिकाण्डी' इति द्वितीयं नाम। देवभाषाशब्दैरारब्धत्वात् सङ्गृहीतत्वाच्च 'देवकोष' इति तृतीयं नाम। अमरसिंहेन विरचितत्वेन 'अमरकोशः' इति च चतुर्थेन नाम्नैव अयं कोशः विश्वप्रसिद्धः।

अमरकोशस्य रचयिता कालश्च

कोशमिमम् अमरसिंहः विरचयामास। वैदिक-ऐतिहासिकादिदेवतानां नामोल्लेखनात् प्रागेव मङ्गलश्लोकत्वेन बुद्धस्य नामकीर्तनं चकार, इत्यतः अयम् अमरसिंहः बौद्धधर्मावलम्बीति बहूनां इतिहासज्ञानां मतम्। विक्रमादित्यराजसभायां नवरत्नत्वेन विख्यातेषु विपश्चित्सु श्रीमानमर-सिंहोऽन्यतम इति विदुषाम् अभिप्रायः।

अमरसिंहस्यास्य कालविषये विद्यते नैकाः विचिकित्साः। केचित् क्रैस्ताब्दात् पश्चात् अष्टमशतकमिति, अन्ये षष्ठशतकात्प्रागिति, इतरे चतुर्थशतकमिति चास्य कालविषये बुधाः विवदन्ते।

काव्याध्ययने अमरकोशस्य तद्व्याख्यानाञ्च उपयोगः

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिवृत्तये कान्तासम्मिततयोपदेश युजे॥

आचार्यमम्मटः

इति काव्यप्रयोजनानि अभिहितानि। तानि इमानि प्रयोजनानि काव्यार्थस्य अवगमनेन रसानुभूत्या च एव सम्पाद्यन्ते न तु अन्यथा। अर्थावगमनं काव्यानुभूतिश्च पदपदार्थज्ञानपूर्वकं पदार्थज्ञानं शक्तिग्रहेण शक्तिग्रहः व्याकरणादिभिः भवतीति प्राचीनाः मन्यन्ते तदुक्तम् -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥

शब्दशक्तिप्रकाशिकायां जगदीशतर्कालंकारेण उद्धृतोऽयं श्लोकः। अत एव 'काव्याध्यापनं' कोशाध्ययनपूर्वकम् इति पण्डिताः निगदन्ति। उक्तञ्च भरतमुनिकृते नाट्यशास्त्रे भामहकृते काव्यालङ्कारे च।

न तच्छिल्पं न तच्छास्त्रं न सा विद्या न सा कला।
जायते यन्न काव्याङ्गम् अहो भारो महान् कवेः॥

अत एव सर्वासां विद्यानामेकमायतनं काव्यम् इति सिद्धम्। तस्माद् अमरकोशः अपि तादृशकाव्यस्य अवबोधाय प्रधानसाधनम्। कोशस्य सुष्ठु परिज्ञानादृते काव्यार्थस्य बोधोऽनुभूतिर्वा नैव सम्पद्यते। अत एव कवेः काव्यश्रमपरिपाकज्ञानं कोशज्ञानेनैव सिध्यति, न तु अन्यथा। एतदुक्तं राजशेखरेण काव्यमीमांसायाम् -

शब्दानां विविनक्ति गुम्फनविधिना मोदते सूक्तिभिः
सान्द्रं लेढि रसामृतं विचिनुते तात्पर्यमुद्रां च यः।
पुण्यैः सङ्घटते विवेक्तृविरहादन्तर्मुखं ताम्यताम्
केषामेव कदाचिदेव सुधियां काव्यश्रमज्ञो जनः॥

अत्र पुण्यवशात् कवेः काव्यश्रमः साफल्यमाप्नोति इति कथनावसरे काव्यार्थावगमनद्वारा एव तादृशं सार्थक्यं सूचितमिति प्रतिभाति।

अन्येषु बहुषु कोशेषु विद्यमानेष्वपि अमरकोशस्य मान्यता लोकप्रियता च सर्वत्र वरीवर्ति। अत्र कारणमेतद् यत् केचित् कोशग्रन्थाः केवलं पर्यायशब्दान् अपरे केवलं नानार्थशब्दान् एव व्यवृण्वन्, किन्तु अमरसिंहः तद्रचिते ग्रन्थे प्रत्येकं शब्दानां सुस्पष्टानर्थान् प्रादर्शयत्। इमे प्रसिद्धाः कोशाः सन्ति -

	कोषाः	**रचयितारः**
१.	निरुक्तम्	यास्काचार्यः
२.	नामलिङ्गानुशासनम्	अमरसिंहः
३.	वाचस्पत्यम्	तारानाथतर्कवाचस्पतिः
४.	भावप्रकाशः	भावमिश्रः
५.	अभिधानरत्नमाला	हलायुधः
६.	शब्दकल्पद्रुमः	राधाकान्तदेवबहादुरः
७.	उणादिकोषः	रामशर्मा
८.	त्रिकाण्डशेषः	पुरुषोत्तमदेवः
९.	अभिधानचिन्तामणिः	हेमचन्द्रः
१०.	वैजयन्ती	यादवप्रकाशाचार्यः
११.	अव्ययकोषः	महादेवः

१२.	नानार्थशब्दकोषः	मेदिनीकरः
१३.	निघण्टुः	महर्षिः कश्यपः
१४.	वैदिककोशः	डॉ. सूर्यकान्तः
१५.	न्यायकोशः	वामनाचार्यः झलकीकरः
१६.	संस्कृत-वाङ्मय-कोशः	डॉ. श्रीधर-भास्कर-वर्णेकरः
१७.	शिवराम आप्टे कोशः	शिवरामः

शब्दार्थाः

वरीवर्ति	अतिशयेन वर्तते
व्यवृण्वन्	विवृतवन्तः
क्लिष्टान्	कठिनान्
कामधुक्	कामनापूरकः
जनस्मृतिह्रासः	जनानां स्मृतेः ह्रासः
साकल्येन	सम्पूर्णेन

अभ्यासः

१. अधोलिखितप्रश्नानाम् उत्तराणि लिखत -

(क) कस्य कोशस्य महती अपेक्षा भवति ?

(ख) के मन्त्रद्रष्टारः भवन्ति स्म ?

(ग) वैदिककोशस्य रचयिता कः ?

(घ) केन निरुक्तनामको ग्रन्थो रचितः ?

(ङ) अमरकोशस्य रचयिता कः ?

(च) अमरकोशस्य कति नामानि प्रसिद्धानि सन्ति ? कानि च तानि ?

(छ) केषाञ्चित् प्रसिद्धकोशानां नामानि लिखत ?

२. सन्धिविच्छेदं कुरुत -

सन्धिविच्छेदः

(क) कृतेऽपि - ..... + ...।

(ख) सम्यग्ज्ञातः - ..... + ...।

(ग) इत्याभाणकम् - ..... + ...।

(घ) शङ्कावसरः - ..... + ...।

(ङ) शब्दानुशासनं - ..... + ...।

(च) अस्मिन्नेव - ..... + ...।

३. यथायोग्यं समायोजयत -

(क)	(ख)
(क) पतञ्जलिः	अमरकोशः
(ख) यास्कः	अष्टाध्यायी
(ग) अमरसिंहः	महाभाष्यम्
(घ) पाणिनिः	राधाकान्तदेवबहादुरः
(ङ) शब्दकल्पद्रुमः	निरुक्तम्

४. अधोलिखितानां क्रियापदानाम् अन्येषु पुरुषवचनेषु रूपाणि लिखत -

अभूत्	.....	.....
दृश्यसे	.....	.....
एधि	.....	.....
आसम्	.....	.....
करिष्यामि	.....	.....
व्यरचयन्	.....	.....
आप्नुयात्	.....	.....

५. विभक्तिलिङ्गवचनादिनिर्देशपूर्वकं पदपरिचयं कुरुत -

पदम्	विभक्तिः	लिङ्गम्	वचनम्
साकल्येन	.....	.....	.....

अयम्	.....	.....	.....
वेदानां	.....	.....	.....
कोषान्	.....	.....	.....
विषये	.....	.....	.....
विदुषाम्	.....	.....	.....
विपश्चित्सु	.....	.....	.....

६. **प्रयोगपरिवर्तनं कुरुत -**

(क) नैके विपश्चितो लौकिकान् कोशान् अरचयन्।

(ख) कोशग्रन्थेषु अत्यन्तं प्रधानः प्राचीनतमः प्रसिद्धतमश्च कोशोऽयमस्ति।

(ग) अन्तेवासिनो विद्यार्थिनः आचार्याश्च अध्ययने अध्यापने वा प्रवर्तन्ते स्म।

(घ) कोशोऽयम् अमरसिंहेन व्यरच्यत।

(ङ) कोशस्य सुष्ठु परिज्ञानं विना काव्यार्थस्य बोधेन अनुभूत्या वा नैव सम्पद्यते।

७. **अधोलिखितपदान्याश्रित्य कारकविभक्ती निर्णयत -**

(क) निघण्टुनामकं वैदिककोशं रचयामास।

(ख) नैके विपश्चितः लौकिकान् कोशान् अरचयन्।

(ग) तपयोगबलेन महर्षयः साक्षात् मन्त्रद्रष्टारो भवन्ति स्म।

(घ) अमरसिंहेन अमरकोशः विरचितः।

(ङ) अमरकोशस्य चत्वारि नामानि प्रसिद्धानि वर्तन्ते।

८. **प्रसिद्धानां दशकोशग्रन्थानां नामानि लिखत ।**

योग्यता-विस्तारः

'अष्टाध्यायी जगन्माता अमरकोशो जगत्पिता' इति कथनानुसारं व्याकरणस्य शब्दकोशस्य च महत्त्वं स्पष्टं प्रतिभाति ।

संस्कृतसाहित्ये अमरसिंहप्रणीतस्य अमरकोशस्य प्रसिद्धिः सर्वत्र चकास्ति । अमरकोशे त्रीणि काण्डानि सन्ति । काण्डत्रये आहत्य १५३५ श्लोकाः सन्ति। अत्र अमरकोशस्य केचनश्लोकाः छात्राणां परिज्ञानाय प्रदत्ताः सन्तिः।

१. **स्वर्गवर्गः -**

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥
आदितेया दिविषदो लेखा अदितिनन्दनाः ।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ॥
बर्हिर्मुखाः क्रतुभुजो गीर्वाणादानवारयः।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ॥

२. **भूमिवर्गः -**

भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा ।
धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥
सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।
गोत्रा कुः पृथिवी पृथ्वी क्ष्माऽवनिर्मेदनी मही ॥
विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा ।
भूतधात्री रत्नगर्भा जगती सागराम्बरा ॥

३. **विशेष्यनिघ्नवर्गः -**

सुकृती पुण्यबान्धवो महेच्छस्तु महाशयः ।
हृदयालुः सुहृदयो महोत्साहो महोद्यमः ॥

पञ्चमः पाठः

रामस्य करुणो रसः

महाकविः भवभूतिः (श्रीकण्ठः) संस्कृतवाङ्मयस्य देदीप्यमानं नक्षत्रमिवास्ति। असौ दक्षिणभारतस्य पद्मपुरनामके नगरे जन्म अलभत। अस्य गुरुरासीत् कुमारिलभट्टः। प्रायः वीरशृङ्गार-रसप्रधाने काव्यजगति भवभूतिः करुणं रसम् आश्रित्य नाटकमरचयत्। अत एव उक्तम् "कारुण्यं भवभूतिरेव तनुते"। भवभूतिः विविधानां पात्राणां मनोवैज्ञानिकचित्रणस्य भावोन्मेषस्य, भावानां अन्तर्द्वन्द्वस्य च प्रभुत्ववान् रचयिता अस्ति। यत्र सर्वे कवयः प्रकृत्याः सुन्दरं रूपम् एव वर्णितवन्तः तत्रैव भवभूतिः प्रकृत्याः भयावहस्वरूपस्यापि स्वाभाविकं, हृदयग्राहिचित्रणमकरोत्। कवेः तिस्रः कृतयो विद्यन्ते। ता यथा - १. मालतीमाधवम् (प्रकरणम्)। २. महावीरचरितम् (नाटकम्)। ३. उत्तररामचरितम् (नाटकम्)।

'उत्तररामचरितं कवेरन्तिमं नाटकमस्ति। सप्ताङ्कसमन्वितमिदं नाटकम्। अत्र अङ्गीरसः करुणरसो वर्तते। नाटकेऽस्मिन् श्रीरामचन्द्रस्य राज्याभिषेकात् परः कथानकः वर्णितोऽस्ति। अत्र रामस्य वनात् प्रत्यावर्तनानन्तरं राज्याभिषेकादारभ्य लोकापवादेन सीताया वनवासः, लवकुशयोः जन्म, शम्बूकस्य वधः, अन्ततो वाल्मीक्याश्रमे सीतारामसम्मेलनपर्यन्तं सम्पूर्णा कथा वर्णिताऽस्ति। नाटकस्यास्य वैशिष्ट्यत्रयं विद्यते। तद्यथा - चित्रवीथिदर्शनम् (प्रथमाङ्के), छायाङ्कः (तृतीयाङ्के), गर्भाङ्कश्च (सप्तमाङ्के)। भवभूतिः महावीरचरिते, मालतीमाधवे च स्वपरिचयं सङ्केतितवान्। अस्य पूर्वजाः तैत्तिरीयशाखाध्यायिनः काश्यपगोत्रीया ब्राह्मणा आसन्। जननी जतुकरणी, पिता च नीलकण्ठः आसीत्। भवभूतिः न्यायमीमांसाव्याकरणशास्त्रेषु निष्णातत्वात् पदवाक्यप्रमाणज्ञः इत्युपाधिना विभूषितः। स्वपाण्डित्यविषये भवभूतिः स्वयमेवोल्लिखितवान् यद् - "यं ब्राह्मणमियं देवी वाग्वश्येवानुवर्तते" इति।

मङ्गलाचरणम्

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।

विन्देम देवतां वाचममृतामात्मनः कलाम्॥

प्रस्तुतोऽयं पाठः उत्तररामचरितस्य "छायाङ्क" इति नाम्नः तृतीयाङ्कादुद्धृतोऽस्ति।

(ततः प्रविशति नदीद्वयम्)

एका - सखि मुरले, किमसि सम्भ्रान्तेव ?

मुरला - सखि तमसे ! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम्। जानास्येव यथा वधूपरित्यागात् प्रभृति -

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।

पुटपाकप्रतीकाशो रामस्य करुणो रसः॥ १॥

अन्वयः - [गभीरत्वात् अनिर्भिन्नः अन्तर्गूढघनव्यथः रामस्य करुणः रसः पुटपाकप्रतीकाशः।]

मुरला - तेन च तथाविधेष्टजन-कष्टविनिपातजन्मना प्रकृष्टतां गतेन दीर्घशोकसन्तापेन सम्प्रत्यतितरां परिक्षीणो रामभद्रः। तमवलोक्य कम्पितमिव कुसुमसम्बन्धनं मे हृदयम्। अधुना च प्रतिनिर्वर्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशाः द्रष्टव्याः। तत्र च निसर्गधीरस्याप्येवं विधायामवस्थायामतिगम्भीराभोग-शोकक्षोभसंवेगात् पदे पदे महाप्रमादानि शोकस्थानानि शङ्कनीयानि रामभद्रस्य। तद् भगवति गोदावरि ! त्वया तत्र भवत्या सावधानया भवितव्यम्।

वीचिवातैः सीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान्।

मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेरितैस्तर्पयेति॥ २॥

अन्वयः - [सीकरक्षोदशीतैः पद्मकिञ्जल्कगन्धान् आकर्षद्भिः स्वैरं स्वैरं प्रेरितैः वीचिवातैः रामभद्रस्य मोहे मोहे जीवं तर्पय इति।]

तमसा - उचितमेव दाक्षिण्यं स्नेहस्य। सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्याद्य सन्निहितः।

मुरला - कथमिव ?

तमसा - तत्सर्वं श्रूयताम् - पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य निवृत्ते सति लक्ष्मणे सीता देवी प्राप्तप्रसववेदनमतिदुःखसंवेगादात्मानं गङ्गाप्रवाहे निक्षिप्तवती। तदैव तत्र दारकद्वयं च प्रसूता। भगवतीभ्यां पृथिवीभागीरथीभ्यामभ्युपपन्ना रसातलं च नीता। स्तन्यत्यागात् परेण दारकद्वयं च तस्य प्राचेतसस्य महर्षेः गङ्गादेव्या समर्पितं स्वयम्।

मुरला - (सविस्मयम्)

ईदृशानां विपाकोऽपि जायते परमाद्भुतः।

यत्रोपकरणीभावमायात्येवंविधो जनः॥३॥

अन्वयः - [ईदृशानां विपाकः अपि परमाद्भुतः जायते। यत्र एवं विधः जनः उपकरणीभावम् आयति।]

मुरला - अहमप्येतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽप्यागत एवेति तर्कयामि।

तमसा - तदियं गोदावरी हृदान्निर्गत्य -

परिपाण्डुदुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम्।

करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी॥४॥

अन्वयः - [परिपाण्डुदुर्बलकपोलसुन्दरम् बिलोलकबरीकम् आननम् दधती, जानकी करुणस्य मूर्तिः अथवा शरीरिणी विरहव्यथा इव वनम् एति।]

मुरला - इयं हि सा -

किसलयमिव मुग्धं बन्धनाद् विप्रलूनं

हृदयकमलशोषी दारुणो दीर्घशोकः।

ग्लपयति परिपाण्डु क्षाममस्याः शरीरं

शरदिज इव घर्मः केतकीगर्भपत्रम्॥५॥

अन्वयः - [हृदयकमलशोषीदारुणः दीर्घशोकः बन्धनाद् विप्रलूनम् मुग्धम् किसलयमिव परिपाण्डु क्षाममम् अस्याः शरीरं, शरदिजः घर्मः केतकीगर्भपत्रम् इव ग्लपयति।]

(इति परिक्रम्य निष्क्रान्ते]

(नेपथ्ये)

जात ! जात !

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता)

सीता - अहो, जानामि प्रियसखी वासन्ती व्याहरतीति।

सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै-

रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत्।

अन्वयः - [पुरा अग्रे लोलः यः करिकलभकः सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रैः वर्धितः अभूत्।]

सीता - किं तस्य ?

(पुनर्नेपथ्ये)

वध्वा सार्धं पयसि विहरन् सोऽयमन्येन दर्पा-

दुद्दामेन द्विरदपतिना संनिपत्याभियुक्तः॥६॥

अन्वयः - [सः अयं वध्वा सार्धं पयसि विहरन् अन्येन उद्दामेन द्विरदपतिना दर्पात् संनिपत्य अभियुक्तः।]

सीता - (ससम्भ्रमं कतिचित् पदानि गत्वा) आर्यपुत्र ! परित्रायस्व परित्रायस्व। मम तं पुत्रकम्। (विचिन्त्य) हा धिक् हा धिक्। तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति। हा आर्यपुत्र ! (इति मूर्च्छति)

(प्रविश्य)

समाश्वसिहि। समाश्वसिहि।

(नेपथ्ये) विमानराज अत्रैव स्थीयताम्।

सीता - (समाश्वस्य, ससाध्वोसल्लासम्) अहो जलभर-भरितमेघमन्थरस्तनित-गम्भीरमांसलः कुतोन्वेष भारती-निर्घोषो म्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युत्सुकयति।

तमसा - (सस्मितास्त्रम्) अयि वत्से !

अपरिस्फुटनिक्काणे कुतस्त्येऽपि त्वमीदृशी।

स्तनायित्नोर्मयूरीव चकितोत्कण्ठितं स्थिता॥७॥

अन्वयः - [स्तनयित्नोः अपरिस्फुटनिक्वाणे मयूरी इव त्वं कुतस्त्ये अपि ईदृशी चकितोत्कण्ठितं स्थिता।]

सीता - भगवति! किं भणसि अपरिस्फुटेति? स्वरसंयोगेन प्रत्यभिजानामि। नन्वार्यपुत्रेणैवैतद् व्याहृतम्।

तमसा - श्रूयते तपस्यतः किल शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा दण्डकारण्यमागत इति।

सीता - दिष्ट्या अपरिहीनधर्मः खलु स राजा।

(नेपथ्ये)

यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम्॥
एतानि तानि बहुकन्दरनिर्झराणि
गोदावरीपरिसरस्य गिरेस्तटानि॥८॥

अन्वयः - [यत्र द्रुमाः अपि मृगाः अपि मे बन्धवः प्रियसहचरः यानि चिरम् अध्यवात्सम्, एतानि बहुकन्दरनिर्झराणि गोदावरीपरिसरस्य गिरेः तानि तटानि ।]

तमसा - वत्से समाश्वसिहि, समाश्वसिहि।

(नेपथ्ये)

अनेन पञ्चवटीदर्शनेन -

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।
उत्पीड इव धूमस्य मोहः प्रागावृणोति माम्॥९॥

अन्वयः - [अन्तर्लीनस्य अद्य उद्दामं ज्वलिष्यतः दुःखाग्नेः धूमस्य उत्पीडः इव मोहः मां प्राग् आवृणोति।]

सीता - हा धिक्, हा धिक्, मां मन्दभागिनीं व्याहृत्योन्मीलितनेत्रनीलोत्पलो मूर्च्छित एव। हा कथं धरणीपृष्ठे निरुद्धनिःश्वासनिःसहं विपर्यस्तः ? भगवति तमसे ! परित्रायस्व, परित्रायस्व, जीवयार्यपुत्रम्।

(इति पादयोः पतति)

तमसा - **त्वमेव ननु कल्याणि ! संजीवय जगत्पतिम्।**
प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः॥१०॥

अन्वयः - [कल्याणि ! त्वम् एव ननु जगत्पतिं संजीवय, हि ते पाणिः प्रियस्पर्शः तत्र एष जनः निरतः।]

सीता - यद्भवतु तद् भवतु। यथा भगवत्याज्ञापयति। (इति ससम्भ्रमं निष्क्रान्ता)

(ततः प्रविशति भूम्यां निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामः।)

सीता - (किञ्चित्सहर्षम्) जाने पुनः प्रत्यागतमिव जीवितं त्रैलोक्यस्य।

रामः - हन्त भोः, किमेतत् ?

आश्ष्योतनं तु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो न सेकः।
आतप्तजीवितमनः परितर्पणोऽयं
सञ्जीवनौधिरसो हृदि नु प्रसक्तः॥ ११॥

अन्वयः - [हृदि हरिचन्दनपल्लवानाम् आश्ष्योतनं नु ? निष्पीडितेन्दुकरकन्दलजः सेकः नु ? आतप्तजीवितमनः परितर्पणः अयं सञ्जीवनौषधिरसः प्रसक्तः नु ?] अपि च -

स्पर्शः पुरापरिचितो नियतं स एव
सञ्जीवनश्च मनसः परितोषणश्च।
सन्तापजां सपदि यः परिहृत्य मूर्च्छा-
मानन्दनेन जडतां पुनरातनोति॥ १२॥

अन्वयः - [पुरा परिचितः संजीवनः च मनसः परितोषणः च नियतं स एव स्पर्शः यः सन्तापजां मूर्च्छां परिहृत्य सपदि आनन्दनेन पुनः जडताम् आतनोति।]

सीता - (ससाध्वसकरुणमुपसृत्य) एतावदिदानीं मम बहुत्तरम्।

रामः - (उपविश्य) न खलु वत्सलया देव्याऽभ्युपपन्नोऽस्मि ?

सीता - हा धिक्, हा धिक् किमित्यार्यपुत्रो मां मार्गिष्यते ?

रामः - भवतु, पश्यामि।

सीता - भगवति तमसे अपसराव तावत् मां प्रेक्ष्यानभ्यनुज्ञातेन संनिधानेन राजाधिकं कोपिष्यति।

तमसा - अयि वत्से, भागीरथीप्रसादाद् वनदेवतानामप्यदृश्यासि संवृत्ता।

सीता - अस्ति खल्वेतत् ?

रामः - हा प्रिये जानकि !

सीता - (ससाध्वसगद्गदम्) आर्यपुत्र, असदृशं खल्वेतदस्य वृत्तान्तस्य। (सास्रम्) भगवति किमिति व्रजमयी जन्मान्तरेष्वपि पुनरप्यसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्यैवं वत्सलस्यैवंवादिनः आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि ? अहमेवैतस्य हृदयं जानामि, ममैषः।

रामः - (सर्वतोऽवलोक्य) (सनिर्वेदम्) हा न किञ्चिदत्र। देवि -

प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः।
अद्याप्यानन्दयति मां त्वं पुनः क्वासि नन्दिनि ?॥ १४॥

अन्वयः - [स्नेहार्द्रशीतलः ते स्पर्शः मूर्तः प्रसादः इव अद्यापि माम् आनन्दयति, नन्दिनि ! त्वं पुनः क्व असि ?]

सीता - एते खलु तेऽगाधमानसन्दर्शितस्नेहसम्भारा आनन्दनिष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः। जाने प्रत्यनेन निष्कारणपरित्याग-शल्यितोऽपि बहुमतो मे जन्मलाभः।

रामः - (सर्वतोऽवलोक्य) हा, कथं नास्त्येव ? नन्वकरुणे वैदेहि !

सीता - अकरुणास्मि यैवं विधं त्वां पश्यन्त्येव जीवामि।

रामः - क्वासि प्रिये ! देवि ! प्रसीद प्रसीद। न मामेवं विधं त्यक्तुर्महसि। कष्टं भोः

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञाजाम्बवतो न यत्र न गतिः पुत्रस्य वायोरपि।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये ! क्वासि मे ?॥ ४५॥

अन्वयः - [प्रिये! यत्र मे कपीन्द्रसख्यम् अपि व्यर्थं, हरीणां वीर्यं वृथा, यत्र जाम्बवतः प्रजा न, वायोः पुत्रस्य अपि गतिः न, यत्र विश्वकर्मतनयः नलः अपि मार्गं कर्तुं न क्षमः, मे सौमित्रेः अपि पत्रिणाम् अविषये तत्र क्व असि।]

सीता - बहुमानितास्मि पूर्वविरहे।

रामः - दुःखायैव सुहृदामिदानीं रामदर्शनम्। कियच्चिरं त्वां रोदयिष्यामि? तदनुजानीहि मां गमनाय।

सीता - (तमसामाश्लिष्य) हा भगवति तमसे, गच्छतीदानीमार्यपुत्रः। किं करोमि ? (इति गच्छति)

तमसा - वत्से जानकि! समाश्वसिहि। विधिस्तवानुकूलो भविष्यति। तदायुष्मतोः कुशलवयोर्वर्षर्द्धिमङ्गलानि सम्पादयितुं भागीरथीपदान्तिकमेव गच्छावः।

रामः - अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे।

सीता - (सापेक्षम्) आर्यपुत्रः कः ?

वासन्ती - परिणीतमपि किम् ?

रामः - नहि, नहि, हिरण्यमयी सीताप्रतिकृतिः।

सीता - (सोच्छ्वासास्त्रम्) आर्यपुत्र! इदानीमसि त्वम्। अहो उत्खातितमिदानीं मे परित्यागशल्यमार्यपुत्रेण।

वासन्ती - महानयं व्यतिकरोऽस्माकं प्रसादः। गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम्।

रामः - तथास्तु ।

तमसा - अहो संविधानकम् -

एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक्पृथगिव श्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान्विकारान्
अम्भो यथा सलिलमेव हि तत्समस्तम्॥४७॥

अन्वयः - [एकः करुणः रसः एव निमित्तभेदाद् भिन्नः पृथक्-पृथग् विवर्तान् श्रयते इव यथा अम्भः आवर्तबुद्बुदतरङ्गमयान् विकारान्। (श्रयते) तत्समस्तं सलिलम् एव हि।]

(सर्वे निष्क्रान्ताः)

प्रस्तुतपाठस्य सारांशः -

सीतात्यागात् परं रामः शम्बूकवधाय दण्डकारण्यं व्रजति, यत्र स्वप्रियां सीतां स्मरन् विलापं करोति। सीताऽपि स्वपुत्रयोः कुशलवयोः वर्षग्रन्थौ वाल्मीक्याश्रमं याति। दण्डकारण्ये रामञ्च पश्यति। गङ्गायाः प्रसादेन अदृश्या सीता रामाय स्वशीतलस्पर्शेन नवजीवनं देदीयते।

श्रीरामस्य करुणविलापं श्रुत्वा सा स्वाकारणपरित्यागस्य दुःखं विस्मृत्य श्रीरामे स्निह्यति। राजधर्मपरिपालनाय त्यागात् परो रामविषयको विलापो रामस्य पत्नीव्रतं, सीतां प्रति प्रेमञ्च अभिव्यनक्ति। अत्र भवभूतेः करुणरसः पुनः पुनो दीप्तः।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।

आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥

लोकस्य जनस्य आराधनाय प्रसादनाय स्नेहम् अनुरागं दयां करुणां सौख्य च यदि वा जानकीमपि सीतामपि मुञ्चतः त्यजतः मम व्यथा दुःखं नास्ति इत्यर्थः।

शब्दार्थाः

पुटपाकप्रतीकाशः	पुटे, पात्रे वचनं तेन सदृशः
परिक्षीणो	अतीव कृशः
कुसुमसम्बन्धनं	कुसुमम् इव कोमलं बन्धनम्
अतिगम्भीराभोगः	अति गम्भीरः यः आभोगः विस्तारः
वीचिवातैः	तरङ्गवायुभिः
शीकरक्षोदशीतैः	जलबिन्दुद्वारा शीतलम्
पद्मकिञ्जल्कगन्धान्	कमलानां केसराः तेषां गन्धान्
स्वैरं स्वैरम्	मन्दं मन्दम्
प्राचेतसः	वाल्मीकेः
उपकरणीभावम्	सहायत्वं प्राप्नोति
परिपाण्डु	अतिशयं पीतवर्णम्
विलोलकबरीकमाननम्	चञ्चलः केशपाशः यस्मिन् तत् आननम्
विप्रलूनम्	विच्छिन्नम्
क्षामम्	कृशम्
स्वकरकलितैः	स्वहस्तेन दत्तैः
करिकलभकः	हस्तिशावकः

सन्निपत्याभियुक्तः	वेगात् समीपम् आगत्य आक्रान्तः
समाश्वसिहि	धैर्यं धारयतु
स्तनितः	गम्भीरः गर्जनः
निर्घोषः	स्वरः
अपरिस्फुटनिक्काणे	अस्पष्टे ध्वनितेऽस्मिन्
उत्पीडः	राशिः
नेत्रनीलोत्पलः	नेत्रे एव नीलकमले यस्य सः
सास्रया	अश्रुसहितया
सोल्हादोच्छ्वासः	आह्लादेन, उच्छ्वासेन च युक्तः
सन्तापजाम्	सन्तापेन जनितां, विरहदुःखोत्पन्नाम्
सपदि	शीघ्रमेव
परिहृत्य	दूरीकृत्य
पुनरातनोति	पुनः प्रसारयति
मार्गिष्यते	अन्विष्यते
प्रेक्ष्यानभ्यनुज्ञातेन	प्रेक्ष्य आज्ञया विना दृष्ट्वा
निरनुक्रोशा	निर्दया
स्नेहार्द्रशीतलः	स्नेहयुक्तः स्पर्शः
उल्लापाः	विलापाः
कपीन्द्रसख्यम्	वानराणाम् इन्द्रः कपीन्द्रः सुग्रीवः तेन मित्रता
हरीणाम्	वानराणाम्
पत्रिणाम्	बाणानाम्
उत्खातितम्	दूरीकृतम्
शल्यम्	कण्टकम्
व्यतिकरः	समागमः
प्रसादः	अनुग्रहः

अभ्यासः

१. वस्तुनिष्ठाः प्रश्नाः -

(क) 'उत्तररामचरितम्' इति नाटकस्य प्रणेता कः ?

(अ) भर्तृहरिः (आ) भवभूतिः

(इ) भासः (ई) कालिदासः

(ख) उत्तररामचरितम् इति नाटकस्य अङ्गीरसः कः ?

(अ) शृङ्गारः (आ) वीरः

(इ) करुणः (ई) शान्तः

(ग) तमसा, मुरला च के स्तः ?

(अ) पात्रद्वयम् (आ) लताद्वयम्

(इ) सखीद्वयम् (ई) नदीद्वयम्

(घ) छायारूपिणी सीता रामेण सह कुत्र अमिलत् ?

(अ) आश्रमे (आ) जनस्थाने

(इ) पञ्चवटीवने (ई) दण्डकारण्ये

(ङ) सीता कस्याः प्रसादाद् अदृश्याऽभवत् ?

(क) तमसायाः (ख) वनदेवतायाः

(ग) लोपामुद्रायाः (घ) भागीरथ्याः

(च) उत्तररामचरिते कति अङ्काः सन्ति ?

(क) पञ्च (ख) नव

(ग) सप्त (घ) षड्

२. अधोलिखितानां प्रश्नानामुत्तरं संस्कृतभाषया लिखत -

(क) प्रस्तुतोऽयं पाठः कुत उद्धृतोऽस्ति ?

(ख) भवभूतेः कति कृतयः सन्ति ? तेषां नामानि लिखत।

(ग) विदेहराजपुत्री का आसीत् ?

(घ) सीतायाः पुत्रयोः किम् अभिधानम् ?

(ङ) रामस्य अश्वमेध-सहधर्मचारिणी का आसीत् ?

(च) उत्तररामचरितस्य मङ्गलाचरणे कस्य वन्दनं विहितम् ?

३. **पूर्णवाक्येन प्रश्नान् समाधत्त -**

(क) पदवाक्यप्रमाणज्ञः कः ?

(ख) स्तन्यत्यागोपरान्तं सीतायाः दारकद्वयं कुत्र नीतम् ?

(ग) रामाय सीतायाः स्पर्शः कीदृशः आसीत् ?

(घ) तमसा सीतां कुत्र अनयत् ?

(ङ) गोदावरीहृदयात् आगता सीता कीदृशी आसीत् ?

(च) रामचन्द्रेण उच्चारितानि सीतायाः सम्बोधननामानि लिखत ?

४. **अधोनिर्दिष्टानां सन्धिपदानां सन्धिविच्छेदपूर्वकं सन्धिनाम विलिखत -**

	सन्धिपदम्	सन्धिच्छेदः	सन्धिनाम
(क)	विपाकोऽपि	.....	.....
(ख)	रामश्च	.....	.....
(ग)	प्रेरितैस्तर्पयेति	.....	.....
(घ)	अत्रैव	.....	.....
(ङ)	प्रत्यभिजानामि	.....	.....

५. **अधोलिखितेषु पदेषु ससूत्रं सन्धिं कुरुत -**

		सन्धिः	सन्धिसूत्रम्
(क)	वि + आहरति	.....	.....
(ख)	वर्धितस् + अभूत्	.....	.....
(ग)	प्राक् + आवृणोति	.....	.....
(घ)	तत्र + एषः	.....	.....
(ङ)	अद्य + अपि + आनन्दयति	.....	.....

६. निम्नलिखितानां समस्तपदानां समासनाम-निर्देशपुरस्सरं विग्रहं कुरुत -

	विग्रहः	समासनाम
(क) नीलोत्पलम्	.....	.....
(ख) घनव्यथः	.....	.....
(ग) स्वकरकलितैः	.....	.....
(घ) दीर्घशोकः	.....	.....
(ङ) पुटपाकप्रतीकाशः	.....	.....

७. कोष्ठकात् चित्वा शून्यस्थानं पूरयत -

संवृत्ता, स्वरसंयोगेन, प्रसादः, रामदर्शनम्, सञ्जीवनोपायस्तु

(क) ..... प्रत्यभिजानामि। नन्वार्यपुत्रेणैवैतद् व्याहृतम्।

(ख) भागीरथीप्रसादाद् वनदेवतानामप्यदृश्यासि .....।

(ग) महानयं व्यतिकरोऽस्माकं .....।

(घ) ..... मौलिक एव रामभद्रस्याद्य सन्निहितः।

(ङ) दुःखायैव सुहृदामिदानीं .....।

८. श्लोकांशान् यथोचितं मेलयत -

(क) प्रसाद एव मूर्तस्ते	कुतस्त्येऽपि त्वमीदृशी
(ख) मार्गं यत्र न विश्वकर्मतनयः	केतकीगर्भपत्रम्
(ग) पुटपाकप्रतीकाशो	स्पर्शः स्नेहार्द्रशीतलः
(घ) ईदृशानां विपाकोऽपि	रामस्य करुणो रसः
(ङ) अपरिस्फुटनिक्काणे	जायते परमाद्भूतः
(च) शरदिज इव घर्मः	कर्तुं नलोऽपि क्षमः

९. अधोलिखितानां पदानां शब्द-विभक्ति-वचन-निर्देशं कुरुत -

पदम्	शब्दः	विभक्तिः	वचनम्
(क) रामभद्रेण	.....	.....	.....
(ख) त्रैलोक्यस्य	.....	.....	.....
(ग) प्राचेतसस्य	.....	.....	.....

(घ) वीचिवातैः ....

(ङ) मनसः ....

(च) वध्वा ....

(छ) भूम्याम् ....

१०. प्रयोगपरिवर्तनं कुरुत -

(क) कवेः तिस्रः कृतयः सन्ति।

(ख) प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया।

(ग) त्वया तत्र सावधानतया भवितव्यम्।

(घ) न मामेवं विधं त्यक्तुम् अर्हसि।

(ङ) तदनुजानीहि मां गमनाय।

११. अधोलिखितानां तिङन्तानां पदानां धातुलकारपुरुषवचनानि लिखत।

	तिङन्तपदम्	धातुः	लकारः	पुरुषः	वचनम्
१.	तनोषि	.....	.....	.....	.....
२.	कोपिष्यामि	.....	.....	.....	.....
३.	ग्लापयेयुः	.....	.....	.....	.....
४.	स्यात्	.....	.....	.....	.....
५.	आज्ञापयन्तु	.....	.....	.....	.....

योग्यता-विस्तारः

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।

विन्देम देवतां वाचममृतामात्मनः कलाम्॥

इह महाकविः भवभूतिः उत्तररामचरितम् इति नाटकं रचयितुकाम आरम्भे विघ्ननाशार्थं रिरचिषितग्रन्थस्य परिसमाप्त्यर्थं च शिष्टपरम्परानिर्वाहात्मकं मङ्गलम् 'इदं कविभ्यः' इत्यनेन श्लोकेन विधत्ते। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते। वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च व्याख्यातारः अध्येतारश्च वृद्धियुक्ता यथा स्युः यस्य ग्रन्थस्यादौ मध्ये अन्ते च मङ्गलाचरणं क्रियते तस्य ग्रन्थस्य प्रसिद्धि ख्यातिः वृद्धिश्च भवति। अध्येतारः वृद्धियुक्ता

भवन्ति। तच्च मङ्गलं त्रिविधं भवति। तद्यथा - १. आशीर्वादात्मकम् २. नमस्कारात्मकम् ३. वस्तुनिर्देशात्मकञ्च।

अत्र नमस्कारात्मकं मङ्गलाचरणं विदधाति कविः। अत्र मङ्गलश्लोकः नान्दी। नन्दयति आनन्दयति जनान् इति नान्दी। नाटके मङ्गलार्थमादौ विहितं पद्यं नान्दीत्युच्यते। अस्य लक्षणं विश्वनाथेन साहित्यदर्पणे भणितम्।

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥
मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत॥

अर्थात् देवब्राह्मणनृपाणाम् आशीर्वचनयुक्ता स्तुतिः यत्र वर्तते सा नान्दीति उच्यते। नमः वाक् यस्मिन् द्वादशपदा अष्टपदा वा भवति। इयं द्वादशपदा नान्दी।

व्याकरणांशः -

१. **नमोवाकम्** - वच परिभाषणे इति धातोः क्विप्-प्रत्यये कृते वाक् इति रूपम्। तस्य वचनम् इत्यर्थः। नमः वाक् यस्मिन् स इति नमोवाक् इति बहुव्रीहिसमासः, तं नमोवाकम्।
२. **प्रशास्महे** - प्रपूर्वकात् इच्छार्थकात् शासु अनुशिष्टौ इति धातोः उत्तमपुरुषबहुवचने रूपम्। निर्दिशामः इत्यर्थः।
३. **विन्देम** - तौदादिकात् विद्लृ लाभे इत्यस्माद्धातोः विधिलिङि उत्तमपुरुषबहुवचने रूपम्।
४. **अमृताम्** - अविद्यमानं मृतं मरणं यस्याः सा अमृता इति बहुव्रीहिसमासः, ताम् अमृताम्। मरणरहिताम् इत्यर्थः।

उत्तररामचरितस्य छायाङ्के अन्यानि सूक्तानि -

१. लतायां पूर्वलूनायां प्रसवस्योद्भवः कुतः।
२. विना सीतादेव्यां किमिव हि न दुःखं रघुपते।
३. वीराणां समयो हि दारुणरसः स्नेहं बाधते।
४. वृद्धास्ते न विचारणीयचरिताः।
५. प्रसभः खलु प्रकर्षपर्यन्तः स्नेहस्य।
६. सुलभसौख्यमिदानीं बालत्वं भवति।

७. न त्वामवनिपृष्ठवर्तिनीमस्मत्प्रभावाद्।
वनदेवता अपि द्रक्ष्यन्ति किमुत मर्त्याः ?

८. स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते धवलमुरमुग्धा दुग्धकुल्येव दृष्टिः।

९. गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः।

१०. दलति हृदयं शोकोद्वेगाद् द्विधा तु न भिद्यते
वहति वकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम्॥

११. अयि कठोर! यशः किल ते प्रियं किमयशो ननु घोरमतः परं किमभवद्विपिने
हरिणीदृशः कथय नाथ ! कथं बत ! मन्यसे ?

१२. हा हा देवि ! स्फुटते हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा।
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि?॥

षष्ठः पाठः

राष्ट्राभिवर्धनसूक्तम्

प्रस्तुतोऽयं पाठ्यांशः अथर्ववेदस्य प्रथमकाण्डस्य एकोनत्रिंशत्तमसूक्तादुद्धृतोऽस्ति। अस्मिन् पाठ्यांशे अस्माकं राष्ट्रस्य अभिवृद्धये अनेकेषु मन्त्रेषु विशदं वर्णनम् अवाप्यते। वैदिकलौकिकवाङ्मयेषु अथर्ववेदः अनुपमं स्थानं भजते। अथर्ववेदः भौतिकविषयाणां विविधचिकित्सायाश्च वेदोऽस्ति। अपि चात्र राष्ट्रिया भावनापि परिदृश्यते। सूक्तेऽस्मिन् षण्मन्त्राः विद्यन्ते। सूक्तस्यास्य वसिष्ठः ऋषिः, ब्रह्मणस्पतिः अभिवर्तमणिः वा देवता, अनुष्टुप् छन्दः। तत्र प्रत्येकं मन्त्राः राष्ट्राभिवर्धनाय अस्मान् प्रेरयन्ति, शासति च। राष्ट्रं शत्रुभयरहितम् अभिवृद्धं भवतु।

संहितापाठः

अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे।
तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्धय॥ १॥

अन्वयः - येन अभीवर्तेन मणिना इन्द्रः अभिवावृधे तेन ब्रह्मणस्पते अस्मान् राष्ट्राय अभिवर्धय।

भावार्थः - हे ब्रह्मणस्पते ! येन अस्माकं पूर्वजाः महर्षयः राजर्षयश्च प्रभूतं धनं प्राप्य महातेजस्विनो बभूवुः। तथैव तस्य सर्वशक्तिमतो जगदीश्वरस्य अनन्तं सामर्थ्यम् उपकारञ्च विचार्य वयं परिपूर्णपुरुषार्थेन सह विद्याधनस्य स्वर्णादिधनस्य च प्राप्त्या सर्वतोभावेन राष्ट्रं पालयेम वर्धयेम च।

अभिवृत्य सपत्नानभि या नो अरातयः।
अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति॥ २॥

अन्वयः - अभिवृत्य सपत्नान् अभि याः नः अरातयः अभि प्रतन्यतं यः नः दुरस्यति, अभि तिष्ठ।

भावार्थः - अस्मिन् ऋचि राष्ट्ररक्षार्थं शत्रोः पराजयः विधेयः। विपक्षिणः, अदातॄन्, युयुत्सून्, दुराचारिणश्च परितः अभिवृत्य तान् पराजयेत।

अभि त्वा देवः सविताभि षोमो अवीवृधत्।
अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि॥ ३॥

अन्वयः - देवः सविता, सोमः त्वा अभि अवीवृधत् विश्वा भूतानि त्वा अभि यथा अभीवर्तः अससि।

भावार्थः - सूक्ष्मातिसूक्ष्मस्य स्थूलातिस्थूलस्य च पदार्थयोः रचनोपकाराभ्यां तस्य परमेश्वरस्य महिमा दरीदृश्यते। तेनैव परमात्मना प्रदत्तेन बलेन शूरवीरपुरुषाः रणभूमौ राक्षसान् विजित्य शान्तिं वितन्वन्ति ।

अभीवर्तो अभिभवः सपत्नक्षयणो मणिः।

राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे॥४॥

अन्वयः - अभीवर्तः अभिभवः सपत्नक्षयणः मणिः मह्यं राष्ट्राय सपत्ने पराभुवे बध्यताम्।

भावार्थः - राजलक्ष्म्याः प्रभावविजयार्थं नृपो मणिरत्नादीन् धारयित्वा स्वस्य प्रभूत्वं अभिवर्ध्य शत्रून् पराभूय नितरां राष्ट्राभिवर्धनं विदधीत।

उदसौ सूर्यो अगादुदिदं मामकं वचः।

यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा॥५॥

अन्वयः- असौ सूर्यः उत् अगात् इदं मामकं वचः यथा अहं शत्रुहाः सपत्नहा असपत्नः असानि।

भावार्थः - अधिपः राजसिंहासनमधिष्ठाय राजोद्घोषणं विदध्यात् यथा धरणीं सूर्यः प्रकाशयति तथैव राजोद्घोषणमिदं प्रकाशयति यत् अस्माकं राष्ट्रे उपद्रवम् अराजकतां च न प्रसारयेत्।

सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः।

यथाहमेषां वीराणां विराजानि जनस्य च॥६॥

अन्वयः - यथा सपत्नक्षयणः वृषा विषासहिः अहम् अभिराष्ट्रः एषां वीराणां च जनस्य विराजानि।

भावार्थः - शत्रूणां नाशकः प्रजानां परिपोषकः स्वसामर्थ्येन सिंहासनं समारुह्य शूरवीरान् विदुषश्च सत्कारपूर्वमहं विराजानि।

शब्दार्थाः

अभिवर्तेन	सर्वतोभावेन विजेतृणा
अभिवावृधे	अभितः सर्वतः प्रवृद्धोऽभूत्
ब्रह्मणस्पते	वेदराशेरधिपते

अभिवृत्य	अभिमुखं पर्यावृत्य
अरातयः	अदातारः
दुरस्यति	दुष्टम् अभिचारादिरूपं क्षुद्रं कर्म कर्तुम् इच्छति ।
अवीवृधत्	अभितः समृद्धम् अकार्षीत्
विश्वा	विश्वानि, निखिलानि
राष्ट्राय	राष्ट्राभिवृद्धये
सपत्नक्षयणः	शत्रूणां क्षयकरः
अभिभवः	अभिभवनं, पराजयः
पराभुवे	पराभवनाय
अगात्	उदितवान्
असानि	भवानि
वृषा	वर्षकः
अभिराष्ट्रः	स्वराष्ट्रं परराष्ट्रं च अभिगतः अधिपतित्वेन प्राप्तः
विषासहिः	विजेता

अभ्यासः

१. **वस्तुनिष्ठाः प्रश्नाः -**

(क) सूक्तेऽस्मिन् प्रयुक्तं छन्दः -

(अ) त्रिष्टुप् (आ) अनुष्टुप्

(इ) पङ्क्तिः (ई) बृहती

(ख) सूक्तेऽमुष्मिन् कति ऋचः सन्ति -

(अ) एकोनत्रिंशत् (आ) एकोनचत्वारिंशत्

(इ) पञ्चदश (ई) षट्

(ग) राष्ट्राभिवर्धनसूक्तं केन वेदेन सम्बद्धं वर्तते -

(अ) भैषज्यवेदेन (आ) ब्रह्मवेदेन

(इ) अङ्गिरोवेदः (ई) उपर्युक्तसर्वैः

(घ) अस्य सूक्तस्य देवता -

(अ) हिरण्यगर्भः (आ) ब्रह्मणस्पतिः, अभिवर्तमणिः

(इ) अग्निः (ई) वायुः

(ङ) राष्ट्राभिवर्धनसूक्तं कस्मात् काण्डादुद्धृतोऽस्ति -

(अ) प्रथमकाण्डात् (आ) द्वितीयकाण्डात्

(इ) चतुर्थकाण्डात् **(ई) नवमकाण्डात्**

२. अधोलिखितानां प्रश्नानां संस्कृतभाषया उत्तराणि लिखत -

(क) केन इन्द्रः अभिवावृधे ?

(ख) अधिपः कमधिष्ठाय राजोद्घोषणं विदध्यात् ?

(ग) राष्ट्ररक्षार्थं कः विधेयः ?

(घ) अस्मिन् सूक्ते कति मन्त्राः सन्ति ?

(ङ) सपत्नक्षयणः इत्यस्य कोऽर्थः ?

(च) राष्ट्राभिवर्धनसूक्तस्य ऋषिः कः ?

३. रिक्तस्थानपूर्तिः क्रियताम् -

(क) अभीवर्तेन मणिना .....।

(ख) ..... यो नो दुरस्यति।

(ग) अभित्वा ..... यथाससि।

(घ) अभीवर्तो अभिभवः .....।

(ङ) ..... मामकं वचः।

(च) यथाहमेषां वीराणां .....।

४. यथायोग्यं मेलयत -

(क) अभिवृत्य	प्रजानाम्
(ख) तिष्ठ	चतुर्थ्येकवचनम्
(ग) मह्यम्	निखिलानि
(घ) पराभुवे	क्षयकरः
(ङ) असपत्नः	सम्बोधनम्

(च) विराजानि — उत्तमपुरुषः

(छ) ब्रह्मणस्पते — नञ्तत्पुरुषसमासः

(ज) सपत्नक्षयणः — चतुर्थ्येकवचनम्

(झ) विश्धा — लोट्लकारः

(ञ) जनस्य — ल्यप्प्रत्ययः

५. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत।

	सन्धिविच्छेदः	सन्धिनामः
येनेन्द्रः	.....	.....
तेनास्मान्	.....	.....
ब्रह्मणस्पतेऽभिवर्धय	.....	.....
नोऽरातयः	.....	.....
तथैव	.....	.....
भूतान्यभिवर्तः	.....	.....

६. उचितं पदं चित्वा शून्यस्थानानि पूरयत -

(क) तेनास्मान् ब्रह्मणस्पतेऽभि ..... वर्धय। (राष्ट्राय/देशाय)

(ख) ..... समारुह्य शूरवीरान् विदुषश्च सत्कारपूर्वमहं विराजानि। (वृक्षं/सिंहासनं)

(ग) ..... राक्षसान् विजित्य शान्तिं वितन्वन्ति। (जन्मभूमौ/रणभूमौ)

(घ) अभिपृतन्यन्तं ..... यो नो दुरस्यति। (तिष्ठामि/तिष्ठाभि)

(ङ) तस्य ..... महिमा दरीदृश्यते। (परमेश्वरस्य/श्रीनारायणस्य)

७. अधो विद्यमानानां पदानां विभक्तिं लिङ्गं वचनञ्च लिखत -

	विभक्तिः	लिङ्गम्	वचनम्
वीराणाम्	.....	.....	.....
राष्ट्राय	.....	.....	.....
अभिभवः	.....	.....	.....
मणिना	.....	.....	.....
अस्मान्	.....	.....	.....

रणभूमौ	.....	.....	.....
ब्रह्मणस्पते	.....	.....	.....

८. अधोलिखितपदानां धातुलकारपुरुषवचनानि लिखत -

		धातुः	लकारः	पुरुषः	वचनम्
(क)	अगात्	.....	.....	.....	.....
(ख)	विराजानि	.....	.....	.....	.....
(ग)	तिष्ठ	.....	.....	.....	.....
(घ)	वितन्वन्ति	.....	.....	.....	.....
(ङ)	विदधीत	.....	.....	.....	.....
(च)	पराजयेत	.....	.....	.....	.....

९. प्रयोगपरिवर्तनं कुरुत -

(क) राष्ट्राभिवर्धनाय अस्मान् मन्त्राः प्रेरयन्ति।

(ख) राष्ट्रिया भावना अपि परिदृश्यते।

(ग) राजा दुराचारिणः परितः अभिवृत्य तान् पराजयेत।

(घ) शूरवीरपुरुषाः रणभूमौ राक्षसान् विजित्य शान्तिं वितन्वन्ति।

(ङ) नृपः नितरां राष्ट्राभिवर्धनं विदधीत।

९. अभिवर्तेन मणिना ..... राष्ट्राय वर्धय इति मन्त्रस्य तात्पर्यं स्पष्टयत।

योग्यता-विस्तारः

अभिवृत्य = अभि + वृ + ल्यप्, अभीवावृधे = अभि + वृध् + लिट् (प्रथमपुरुषैकवचनम्) विराजानि = वि + राज् + लोट् (उत्तमपुरुषैकवचनम्) असपत्नः = न सपत्नः इति, (नञ्तत्पुरुषः), असौ = अदस्, (प्रथमैकवचनम्), मामकम् = अस्मद् + अण् (मम इदम्), शत्रुहाः = शत्रून् हन्ति यः सः (शत्रु + हन् + क्विप्)

सप्तमः पाठः

महामदो यवनो भारतम् अलुलुण्ठत्

कवेः भावयित्रीप्रतिभायाः समुद्भूतं कर्म अस्ति काव्यम्। तच्च काव्यं ध्वनि-गुणीभूतव्यङ्ग्याभ्यां द्विधा मतम्। तत्र पुनः दृश्यं श्रव्यं चेति द्विधा। तत्र श्रव्यकाव्यं पुनः द्विविधं, गद्यं पद्यञ्च। निखिलसंस्कृतवाङ्मये छन्दोमयात् पद्यात्परं गद्यकाव्यस्य समुद्भवः। प्रथमं गद्यं कृष्णयजुर्वेदस्य तैत्तिरीयशाखायां लभ्यते। यथा - हेमपरीक्षणस्थानं भवति निकषं तथैव कविपरीक्षणस्थानं भवति गद्यकाव्यम्। निकषे कषिता सुवर्णस्य रेखैव सुवर्णस्य शुद्धतां स्फुटयति तथैव गद्यस्यैका पङ्क्तिरेव कवेः रससिद्धान्तं वाक्पटुतां चिन्तनशैलीं च चारु प्रकाशयति। अतः प्रसिद्धेयमुक्तिः - "गद्यं कवीनां निकषं वदन्ति" इति। पद्यकाव्यस्य तु आदौ छन्दसि आलोकपातो भवति। किन्तु गद्यकाव्ये प्रथमालोकपातः पदसन्निवेशे जायते।

बाणभट्टादारभ्य गद्यकाव्यपरम्परायां वर्तमानेषु कविषु अम्बिकादत्तव्यासः प्रसिद्धं स्थानं भजते। अयं जयपुरवास्तव्यः कविः पुराणकर्तुः व्यासस्य द्वितीयावतारः इति लोकश्रुतिः। घटिकाशतकः, शतावधानी, सुकविः, आधुनिकबाणः इत्याद्युपाधिभिः विभूषितोऽभूदयं कविः। एष संस्कृतभाषया हिन्दिभाषया च बहून् ग्रन्थान् रचयामास। तद्विरचितेषु ग्रन्थेषु शिवराजविजयः इति ऐतिहासिकं गद्यकाव्यं महत्स्थानं धारयति। महाराष्ट्राधिपं शिवराजमवलम्ब्य काव्यमिदं विरचितम्। ऐतिहासिकवृत्तान्ताधारेण अस्य काव्यस्य संग्रन्थनादियम् आख्यायिका इति निगद्यते। अत्र त्रयो विरामाः, द्वादश निःश्वासाश्च वर्तन्ते। वीररसप्रधानं काव्यमिदम्। इह नायकोऽस्ति शिवाजिमहाराजः।

अधर्मस्य मूलविग्रहा महामदा यवनाः यदा अस्माकं भारतदेशम् आक्रम्य अस्मदीयां परम्परां नीतिं संस्कृतिञ्च व्यनाशयन् तथा श्रुतिस्मृत्यादिग्रन्थान् प्राज्वलयन् मन्दिराणि च अलुण्ठयन् तदा महाराष्ट्रप्रदेशे सनातनधर्मस्य रक्षणार्थं "कार्यं वा साधयेयम्, देहं वा पातयेयम्" इति उद्घोषयन् अग्रेसरोऽभूत् शिवराजनामा वीरः। शिवराजस्य जननी जीजाबाई जनकश्च शाहजी भोसले आसीत्।

योगिराजो ब्रह्मचारिमुखाद् यवनदुराचारं शृणोति इति, तत्रादौ कालकलापमहामदस्य भारताक्रमणम्, महामदस्य सोमतीर्थध्वंसः, सनातनराज्यध्वंसः, यवनराज्यारम्भः, महाराष्ट्रप्रदेशे

सनातनधर्मरक्षकः मुगलशासनसमुत्पाटनपटुः शिवराजः इत्येते विषयाः क्रमशः अस्मिन् पाठे विवृताः। प्रस्तुतोऽयं पाठ्यांशः शिवराजविजयाख्यस्य गद्यकाव्यस्य प्रथमविरामस्य प्रथमनिःश्वासाद् सङ्गृहीतोऽस्ति।

मूलपाठः

तत् संश्रुत्य भारतवर्षीय-दशा-संस्मरण-सञ्जात-शोको हृदयस्थप्रसादसम्भारोद्विरण-श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वंसनघोषणैर्योगिराजस्य धैर्यमवधीरय" इति कण्ठं रुन्धतो बाष्पानविगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य ब्रह्मचारिगुरुः प्रवक्तुमारभत -

भगवन्! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तो-दीरणैर्न दीर्य्यते, लोहसारमयं हृदयम्, यत् संस्मृत्य यावनान् परस्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्य्यवंश्यांश्चाऽभिमन्यामहे।

उपक्रममुमाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिव वदनम्, निपतद्वारिबिन्दुनी नयने, अञ्चितरोमकञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानं च स्वरम्, अवागच्छत् 'सकलानर्थमयः, सकलवञ्चनामयः, सकलपापमयः, सकलोपद्रवमयश्चायं वृत्तान्तः इति, अतएव तत्स्मरणमात्रेणापि खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्लापयिषामि, न वा चिखेदयिषामि इति च विचिन्त्य -

मुने! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कलनः सकलकालनः करालः कालः। स एव कदाचित् पयः पूर-पूरितान्यकूपारतलानि मरूकरोति। सिंह-व्याघ्र-भल्लूक-गण्डक-फेरु-शश-सहस्रव्याप्तान्यरण्यानि जनपदीकरोति। मन्दिर-प्रासाद-हर्म्य-श्रृङ्गाटक-चत्वरोद्यानतडाग-गोष्ठमयानि नगराणि च काननीकरोति। निरीक्ष्यतां कदाचिद् अस्मिन्नेव भारतवर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्षवाताऽऽतप-हिमसहानि तपांसि अतापिषत। सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्य्यन्ते, स्मृतयः समृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसंक्षेपेण कथय यवनराज्यवृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम् इति कथयित्वा तूष्णीमवतस्थे।

अथ स मुनिः धैर्येण प्रसादेन प्रतापेन तेजसा वीर्येण विक्रमेण शान्त्या श्रिया सौख्येन धर्मेण विद्यया च सममेव परलोकं सनाथितवति तत्र भवति वीरविक्रमादित्ये, शनैः शनैः पारस्परिकविरोध-विशिथिलीकृत-स्नेहबन्धनेषु राजसु, भामिनीभ्रूभङ्ग-भूरिभाव-प्रभाव-पराभूत-वैभवेषु भटेषु, स्वार्थ-चिन्ता-सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, इन्द्रस्त्वं वरुणस्त्वं कुवेरस्त्वम् इति वर्णनामात्रसक्तेषु बुधजनेषु, कश्चन गजनीस्थाननिवासी महामदो यवनः ससेनः प्राविशद् भारते वर्षे। स च प्रजा विलुण्ठ्य मन्दिराणि निपात्य, प्रतिमा विभिद्य परश्शतान् जनांश्च दासीकृत्य शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्।

एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरदेशचूडायितं सोमनाथ-तीर्थमपि धूलीचकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यते, परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्ह-वैदुर्यपद्मराग-माणिक्य-मुक्ताफलादिजटितानि कपाटानि स्तम्भान् गृहावग्रहणीः, भित्तीः, वलभीः, विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय शतद्वयमणसुवर्ण-शृङ्खलावलम्बिनीं चञ्चच्चाकचिक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां प्रसह्य सङ्गृह्य महादेव-मूर्तावपि गदाम् उदतूतुलत्।

अथ वीर!, गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, वन्दीकृता वयम्, सञ्चितममलं यशः इतोऽपि न शाम्यति ते क्रोधश्चेदस्मान् ताडय, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्डय, कर्तय, ज्वलय किन्तु त्यजेमाम् अकिञ्चित्करीं जडां महादेवप्रतिमाम्। यद्येवं न स्वीकरोषि तद् गृहाणोऽन्यदपि सुवर्णकोटिद्वयम्, त्रायस्व, मैनां भगवन्मूर्तिं स्प्राक्षीः इति साम्रेडं कथयत्सु रुदत्सु पतत्सु, विलुण्ठत्सु, प्रणमत्सु च पूजकवर्गेषु 'नाहं मूर्तीर्विक्रीणामि, किन्तु भिनद्मि' इति सङ्गर्ज्य जनताया हाहाकार–कलकलमाकर्णयन् घोरगदया मूर्तिमतुत्रुटत्। गदापातसमकालमेव चानेकार्बुदपद्ममुद्रा-मूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त। स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धुनदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत्।

अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं सकष्टञ्च प्राणांस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहाबुद्दीननामा प्रथमं गजनीदेशमाक्रम्य, महामदकुलं धर्मराजलोकाध्वन्यध्वनीनं विधाय, सर्वाः प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा

गोरदेशे बहून् गृहान् निर्माय चतुरङ्गिण्याऽनीकिन्या भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तरद्वादशतमितेऽब्दे (१२५०) दिल्लीमश्वयाम्बभूव।

ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रञ्च पारम्परिकविरोधज्वरग्रस्तं विस्मृतराजनीतिं भारतवर्षदुर्भाग्यायमाणमाकलय्यानायासेनोभावपि विशस्य, वाराणसीपर्यन्त-मखण्डमण्डलकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार। तेन वाराणस्यामपि बहवोऽस्थिगिरयः प्रचिताः रिङ्क्तरङ्गभङ्गा गङ्गापि शोणितशोणा शोणीकृता, परस्सहस्राणि च देवमन्दिराणि भूमिसात्कृतानि।

स एव प्राधान्येन भारते यावनराज्याङ्कुराऽऽरोपकोऽभूत्। तस्यैव च कश्चित् क्रीतदासः कुतुबुद्दीननामा प्रथमभारतसम्राट् सञ्जातः।

तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाह-नामा यद्यपि गूढशत्रुर्भारतवर्षस्य तथापि शान्तिप्रियोविद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगं गृहीतविग्रह इव चाधर्मः आलमगीरोपाधिधारी अवरङ्गजीवः (औरङ्गजीवः) सम्प्रति दिल्लीवल्लभतां कलङ्कयति। अस्यैव पताका केकयेषु, मत्स्येषु, मगधेषु, अङ्गेषु, बङ्गेषु, कलिङ्गेषु च दोधूयन्ते, केवलं दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः।

दक्षिणदेशो हि पर्वतबहुलोऽस्ति अरण्यानीसङ्कुलश्चास्तीति चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्रतमस्यैवाऽऽत्मीयो दक्षिणदेशशासकत्वेन शास्तिखान-नामा प्रेष्यत इति श्रूयते। महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुलकृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणां, भूषणं भटानां, निधिर्नीतीनां कुलभवनं कौसलानां पारावारः परमोत्साहानां कश्चन प्रातः स्मरणीयः स्वधर्माऽऽग्रहग्रहग्रहिलः, शिव इव धृतावतारः शिववीरश्चास्मिन् पुण्यनगरान्नेदीयस्वेव सिंहदुर्गे ससेनो निवसति। विजयपुराधीश्वरेण साम्प्रतमस्य प्रवृद्धवैरम्। "कार्यं वा साधयेयं देहं वा पातयेयम्" इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनां सतां त्रैवर्णिकस्य, आर्यकुलस्य, धर्मस्य भारतवर्षस्य च आशासन्तान-वितानस्यायमेवऽऽश्रयः। इयमेव वर्तमाना दशा भारतवर्षस्य। किमधिकं विनिवेदयामो योगबलावगतसकलगोप्यतमवृत्तान्तेषु योगिराजेषु इति कथयित्वा विरराम।

शब्दार्थाः

अविगणय्य	अगणयित्वा
प्रमृज्य	उन्मील्य
दीर्य्यते	विदारयति
श्वसिमः	श्वासं स्वीकुर्मः
जिग्लापयिषामि	ग्लापयितुं न वाञ्छामि
चिखेदयिषामि	खेदं जनयितुं नेच्छामि
यायजूकैः	यागकर्तृभिः
राजसूयादियज्ञाः	राजसूयप्रभृतयः
व्ययाजिषत	विहिताः
अतापिषत	तापिताः
मन्दुरीक्रियन्ते	वाजिशालीक्रियन्ते
फेरुः	शृगालः
गण्डकः	गण्डकः
म्लेच्छैः	यवनैः
तूष्णीमवतस्थे	मौनम् स्थितवान्
सनाथितवति	नाथसहितं कृतवति/याते
विलुण्ठ्य	लुण्ठनं कृत्वा
अनैषीत्	नीतवान्
ज्ञातास्वादः	सम्प्राप्तविलुण्ठनरसः
अलुलुण्ठत्	लुण्ठितवान्
उदतूतुलत्	उदतोलयत्
मा स्प्राक्षीः	मा स्पृश
साम्रेडम्	असकृत्

अतुत्रुटत्	अत्रुटयत्
क्रमेलकः	उष्ट्रः
रिङ्क्तरङ्गभङ्गा	चञ्चलोर्मिबहुला
शोणितशोणा	रक्तरञ्जिता
अकार्षुः	अकुर्वन्
अदीदलन्	अदलयन्
केकयेषु	पञ्जावप्रदेशे
दोधूयन्ते	पौनःपुन्येन समुच्छ्रियन्ते
पारावारः	पारङ्गतः
विरराम	व्यरमत्

अभ्यासः

१. **अधोलिखिताः प्रश्नाः संस्कृतभाषया समाधेयाः -**

(क) आर्यवंशस्य रसना कीदृशी ?

(ख) ब्रह्मचारिगुरुः कथं प्रवक्तुमारभत ?

(ग) दक्षिणदेशः कीदृश आसीत् ?

(घ) ज्ञातास्वादः कति वारं भारतमलुलुण्ठत् ?

(ङ) विक्रमादित्यः केन सह परलोकं गतः ?

(च) कान्यकुब्जेश्वरः क आसीत् ?

(छ) शिवराजः कीदृशीं प्रतिज्ञामकरोत् ?

२. **पूर्णवाक्येन उत्तरत -**

(क) भारतवर्षाक्रमणात् परं महामदो यवनः किम् अकरोत् ?

(ख) नाहं मूर्तीर्विक्रीणामि किन्तु भिनद्मि इति कः दुराचारी उक्तवान् ?

(ग) महामदो यवनः सोमनाथमन्दिरस्य कीदृशीं घण्टाम् अलुलुण्ठत् ?

(घ) राज्ञां पारस्परिकविरोधो यदा प्रवृद्धं तदा कः भारतवर्षम् आक्रामत् ?

(ङ) मूर्तौ गदापातसमकालमेव कानि परितः अवाकीर्यन्त ?

(च) यवनकाले दिल्लीश्वरः क आसीत् ?

(छ) शिववीरः कीदृशः ?

३. रिक्तस्थानं पूरयत -

(क) धिगस्मान्, येऽद्यापि जीवामः ..... अभिमन्यामहे।

(ख) मुने ! विलक्षणोऽयं भगवान् ..... करालः कालः।

(ग) सिंह-व्याघ्र-भल्लूक-गण्डक ..... काननीकरोति।

(घ) वाराणस्यामपि बहवोऽस्थिगिरयः ..... भूमिसात्कृतानि।

(ङ) तमारभ्याद्यावधि ..... राज्यमकार्षुः।

४. अधः प्रदत्तानां पदानां विग्रहवाक्यसहितं समासं निर्णयत -

	विग्रहवाक्यम्	समासः
दग्धमुखः	.....	.....
शीतलशोणिताः	.....	.....
रिङ्क्तरङ्गभङ्गा	.....	.....
गूढशत्रुः	.....	.....
विद्वत्प्रियः	.....	.....
दम्भोलिघटिता	.....	.....
दारुणदानवदन्तोदीरणैः	.....	.....
भारतवर्षीयदशासंस्मरणसञ्जातशोकः	.....	.....
हरिद्राद्रवक्षालितम्	.....	.....
निपतद्वारिबिन्दुनी	.....	.....
पयःपूरपूरितानि	.....	.....
सकलकलनः	.....	.....

५. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम निर्णयत -

		सन्धिविच्छेदः	सन्धिनाम
(क)	तस्यैव	.....	.....
(ख)	येऽद्यापि	.....	.....

(ग)	अस्मिन्नेव	.....	.....
(घ)	रत्नान्यप्यारोप्य	.....	.....
(ङ)	जनांश्च	.....	.....
(च)	केनापि	.....	.....
(छ)	मूर्तावपि	.....	.....
(ज)	गृहाणोऽन्यदपि	.....	.....
(झ)	परस्सहस्राणि	.....	.....
(ञ)	दम्भोलिघटितेयम्	.....	.....
(ट)	महामदो यवनः	.....	.....
(ठ)	तन्नाहमेनम्	.....	.....
(ड)	विद्वत्प्रियश्च	.....	.....

६. रेखाङ्कितपदानि आदाय प्रश्ननिर्माणं कुरुत -

(क) शहाबुद्दीनेन गङ्गा शोणितशोणा विहिता।

(ख) महामदो दुष्टः सप्ताशीत्युत्तरसहस्रतमे वैक्रमाब्दे प्राणान् अत्यजत्।

(ग) शिववीरः महाराष्ट्राणां मुकुटमणिरासीत्।

(घ) शिववीरः सिंहदुर्गे ससेनो निवसति स्म।

(ङ) अकबरशाहनामा गूढशत्रुर्भारतवर्षस्य तथापि शान्तिप्रियो विद्वत्प्रियश्च।

(च) अकबरशाह-नामकस्य प्रपौत्रो मूर्तिमदिव कलियुगम्, गृहीतविग्रह इव चाधर्मः, आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिल्लीवल्लभतां कलङ्कयति।

७. विशेष्यम् उचितविशेषणेन सह मेलयत -

ब्रह्मचारिगुरुः	यवनशोणितपिपासाकुलकृपाणः
वदनम्	विलक्षणोऽयम्
भगवान्	गुर्जरदेशचूडायितम्
गङ्गा	कथयत्सु रुदत्सु प्रणमत्सु च
यवनः	हरिद्राद्रवक्षालितमिव

सोमनाथतीर्थम्	भारतवर्षीयदशासंस्मरणसञ्जातशोकः
पूजकवर्गेषु	रिङ्क्तरङ्गभङ्गा
शिवराजः	ज्ञातास्वादः

८. प्रयोगपरिवर्तनं क्रियताम् -

(क) यवनाः अस्माकं भारतदेशम् आक्रम्य अस्मदीयां परम्परां नीतिं संस्कृतिञ्च व्यनाशयन्।

(ख) कार्यं वा साधयेयं देहं वा पातयेयम्।

(ग) अवरङ्गजीवः (औरङ्गजीवः) सम्प्रति दिल्लीवल्लभतां कलङ्कयति।

(घ) स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्।

(ङ) सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्य्यन्ते, स्मृतयः समृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते।

९. सोमनाथ-मन्दिर-लुण्ठन-वृत्तान्तं स्ववचोभिः स्पष्टयत।

१०. महामदस्य यवनस्य भारताक्रमणं तथा दुष्कर्म स्वगिरा विवृणुत।

११. 'अयं पाठः अस्मान् किं शिक्षयति' इति संस्कृतभाषया प्रकटयत।

योग्यता-विस्तारः

संश्रुत्य - समुपसर्गपूर्वात् श्रृणोतेः "समानकर्तृकयोः पूर्वकाले" इति क्त्वाप्रत्यये ततः "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इति ल्यपि रूपम्।

भारतवर्षीयदशासंस्मरणसञ्जातशोकः - भारतवर्षस्येति विग्रहे भारतवर्षशब्दात् छप्रत्यये छस्य "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति ईयादेशे भारतवर्षीया इति सिध्यति। भारतवर्षीया चासौ दशा भारतवर्षीयदशा इति कर्मधारयसमासः। भारतवर्षीयदशायाः संस्मरणं भारतवर्षीयदशासंस्मरणम् इति षष्ठीतत्पुरुषः। भारतवर्षीयदसासंस्मरणेन सञ्जातः भारतवर्षीयदशासंस्मरणसञ्जातः इति तृतीयातत्पुरुषः। भारतवर्षीदशासंस्मरणसञ्जातः शोको यस्य स भारतवर्षीयदशासंस्मरणसञ्जातशोकः इति बहुव्रीहिसमासः।

हृदयस्थप्रसादसम्भारोद्गिरणश्रमेण - हृदये तिष्ठतीति विग्रहे हृदयोपपदे स्था धातोः "सुपि स्थः" इति सूत्रेण कप्रत्यये हृदयस्थशब्दो निष्पन्नः। हृदयस्थश्चासौ प्रसादसम्भारश्चेति हृदयस्थप्रसादसम्भारः इति कर्मधारयसमासः। तस्य उद्गिरणं हृदयस्थप्रसाद-सम्भारोद्गिरणमिति

षष्ठीतत्पुरुषः। तस्मिन् श्रमः हृदयस्थप्रसादसम्भारोद्भिरणश्रमः, तेन हृदयस्थप्रसादसम्भारोद्भिरणश्रमेण इति सप्तमीतत्पुरुषः।

दम्भोलिघटिता - दम्भोलिना घटिता दम्भोलिघटिता इति तृतीयातत्पुरुषः।

दारुणदानवोदन्तोदीरणैः - दारुणाः चामी दानवाश्च दारुणदानवाः इति कर्मधारयसमासः। दारुणदानवानाम् उदन्तः दारुणदानवोदन्तः इति षष्ठीतत्पुरुषः। दारुणदानवोदन्तस्य उदीरणानि, तैः दारुणदानवोदन्तोदीरणैः इति षष्ठीतत्पुरुषः।

भस्मसात् - भस्मशब्दात् "विभाषा साति कात्स्न्र्ये" इति सूत्रेण सातिप्रत्ययेन भस्मसात् इति पदं निष्पन्नम्।

विमनायमानम् - विगतं मनः यस्य स विमनाः इति बहुव्रीहिः। विमनाः इव आचरतीति विमनःशब्दात् क्यषि शानचि पुंसि द्वितीयैकवचने रूपम्।

हरिद्राद्रवक्षालितम् - हरिद्रायाः द्रवः हरिद्राद्रवः इति षष्ठीतत्पुरुषः। तेन क्षालितं हरिद्रा-द्रवक्षालितम् इति तृतीयातत्पुरुषः।

निपतद्वारिबिन्दुनी - वारीणां बिन्दवः वारिबिन्दवः इति षष्ठीतत्पुरुषः। निपतन्तो वारिबिन्दवो याभ्यां ते निपतद्वारिबिन्दुनी इति बहुव्रीहिः।

अञ्चितरोमकञ्चुकम् - रोमाणां कञ्चुकाः रोमकञ्चुकाः इति षष्ठीतत्पुरुषः। अञ्चिताः रोमकञ्चुकाः यत्र तदिति बहुव्रीहिः।

जिग्लापयिषामि - 'ग्लै हर्षक्षये' इति धातोः पुकि णिचि सनि लटि मिपि रूपम्।

सकलकलाकलापकलनः - सकला याः कलाः सकलकलाः इति कर्मधारयः। सकलकलानां कलापः सकलकलाकलापः इति षष्ठीतत्पुरुषः। तस्य कलनः सकलकलाकलापकलनः इति षष्ठीतत्पुरुषः।

पयःपूरपूरितानि - पयसां पूरः पयःपूरः इति षष्ठीतत्पुरुषः। तेन पूरितानि पयःपूरितानि इति तृतीयातत्पुरुषः।

काननीकरोति - अकाननं काननं करोति इति काननशब्दात् "अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः" इति कृधातोर्लटि तिपि रूपम्।

सनाथितवति - नाथेन सह वर्तते सनाथ इति सहार्थबहुव्रीहिः। सनाथं करोति सनाथयति ततः ण्यन्तात् सनाथेः क्तवतुप्रत्यये ततः सप्तम्यां ङौ सनाथितवति इति रूपम्।

पारस्परिकविरोधविशिथिलीकृतस्नेहबन्धनेषु - पारस्परिकविरोधः कर्मधारयसमासः। तेन विशिथिलीकृतः इति तृतीयतत्पुरुषः। स्नेहस्य बन्धनम् इति षष्ठीतत्पुरषः। पारस्परिकविरोध-विशिथिलीकृतं स्नेहबन्धनं येषां ते पारस्परिकविरोधविशिथिलीकृतस्नेह-बन्धनाः इति बहुव्रीहिः। तेषु पारस्परिक.....बन्धनेषु इति।

स्वार्थचिन्तासन्तानवितानैकतानेषु - स्वार्थानां चिन्ताः इति स्वार्थचिन्ताः इति षष्ठीतत्पुरुषः। तासां सन्तानम् इति स्वार्थचिन्तासन्तानम् इति षष्ठीतत्पुरुषः। तस्य वितानम् इति स्वार्थचिन्तासन्तानवितानम् इति षष्ठीतत्पुरुषः। तस्मिन् एकतानाः इति स्वार्थचिन्तासन्तानवितानैकतानाः इति सप्तमीतत्पुरुषः। तेषु स्वार्थ.....वितानैकतानेषु।

गुर्जरदेशचूडायितम् - गुर्जरदेशस्य चूडायितं गुर्जरदेशचूडायितम् इति षष्ठीतत्पुरुषः।

वैदूर्यपद्मरागमाणिक्यमुक्ताफलजटितानि - वैदूर्यञ्च पद्मरागश्च माणिक्यञ्च मुक्ताफलञ्च वैदूर्यपद्मरागमाणिक्यमुक्ताफलानि इति इतरेतरद्वन्द्वसमासः, तैः जटितानि इति तृतीयातत्पुरुषः।

हाहाकारकलकलम् - हाहाकारञ्च कलकलञ्च हाहाकारकलकलम् इति समाहारद्वन्द्वसमासः।

दग्धमुखः - दग्धं मुखं यस्य सः इति बहुव्रीहिसमासः।

शीतलशोणितान् - शीतलानि शोणितानि येषां ते शीतलशोणिताः तान् इति बहुव्रीहिसमासः।

रिङ्क्तरङ्गभङ्गा - तरङ्गाणां भङ्गाः तरङ्गभङ्गा इति षष्ठीतत्पुरुषः। रिङ्क्तन्तः तरङ्गभङ्गा यस्याः सा रिङ्क्तरङ्गभङ्गा इति बहुव्रीहिः।

यवनशोणितपिपासाकुलकृपाणः - यवनानां शोणितं यवनशोणितम् इति षष्ठीतत्पुरुषः। तस्य पिपासा इति यवनशोणितपिपासा इति षष्ठीतत्पुरुषः। तया आकुलः इति यवनशोणित-पिपासाकुलः इति तृतीयातत्पुरुषः। तादृक् कृपाणो यस्य स इति यवनशोणितपिपासाकुलकृपाणः इति बहुव्रीहिः।

अष्टमः पाठः

भावैक्यसन्देशः

विस्मृतभेदाः सन्तो

निर्मलभावापन्नाः।

एकीभावं हृदयारूढं सततं कुर्वन्तु

भो: भोः सततं कुर्वन्तु ॥ विस्मृत... ॥१॥

भावार्थः - जनाः परस्परभेदभावं विस्मरेयुः। प्रत्येकं मनुष्याणां मनसि निर्मलभाव आस्ताम्। सर्वेषां हृदि समानो भावोऽस्तु।

पूर्वजमुनिजनकविजनवाञ्छा सर्वेषामैक्यं

सुखिनस्सर्वे सन्त्विति गानं तेषां बहुहृद्यम्।

भाषाधनमतजातिविभेदो हृदये मा भवतु

दुःखितदीनजनानुन्नेतुं हस्ताः प्रसरन्तु

भोः भोः हस्ताः प्रसरन्तु ॥ विस्मृत... ॥२॥

भावार्थः - पूर्वजानां मुनीनां कवीनाञ्च अभिलाष एक एव यत् सर्वे सुखिनस्सन्तु। केषामपि मनसि जातिभेदः, मतभेदः, भाषाभेदः, धनिकनिर्धनभेदश्च मा भवेत्। अपि च दुःखितानां दीनानां चोपकारार्थं हस्तं प्रसार्य अग्रेसरा भवन्तु।

गङ्गातुङ्गाकावेरीजलमस्माकं मत्वा

कृतसङ्कल्पाः कार्यं कर्तुम् आलस्यं हित्वा।

सुवर्णपुष्पां पृथिवीमेतां क्रष्टुम् आयान्तु

प्रवहतु कामं स्वेदस्रोतः धैर्यं मा जहतु

भोः भोः धैर्यं मा जहतु॥ विस्मृत.....॥३॥

भावार्थः - गङ्गा, तुङ्गा, कावेरी इत्यादीनां नदीनां पूतं जलमस्माकमेव मत्वा आलस्यं त्यक्त्वा कृतसङ्कल्पाः सन्तः कार्यमग्ना भवन्तु। स्वर्णकुसुमसदृशीं भूमिं कर्षयितुम् आगच्छन्तु। अधिकस्वेदे सत्यपि धैर्यं न त्यक्तव्यम्।

घर्षणलुण्ठनवञ्चनहननं प्रलयं संयातु

स्नेहस्रोतः प्रवहतु भ्रातुर्भावो हृदि लसतु।

अनिलः सलिलम् अनलः सर्वं सर्वेषामेकम्

प्रवहति रक्तमभक्तं मातुः भेदो मा भवतु

भो: भोः भेदो मा भवतु॥ विस्मृत... ॥४॥

भावार्थः - घर्षणम्, लुण्ठनम्, वञ्चनम्, हननञ्च सर्वथा प्रलयं प्राप्नोतु। स्नेहभावना, सहोदरभावना च अस्माकं हृदि प्रसारिता भवतु। वायुजलाग्नयः सर्वेषां कृते समाना भवन्तु। समेषां वपुष्षु मातुः रक्तमेव प्रवहति। अतः भेदभावो मा भवतु।

शब्दार्थाः

अनिलः	अग्निः
निर्मलभावापन्नः	निर्मलभावं प्राप्ताः/शुद्धभावं प्राप्ताः
कृतसङ्कल्पाः	सङ्कल्पः कृतः यैः ते
बहुहृद्यम्	विस्तृतहृदयम्/उदारहृदयम्
अभक्तम्	अभिन्नम्
स्वेदः	घर्मः/उष्मा
जहतु	त्यजन्तु
विस्मृतभेदाः	भेदः विस्मृतः यैः ते
हृदयारूढम्	हृदये धारयित्वा
संयातु	सम्यक् रूपेण गच्छतु

अभ्यासः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) जनाः किं विस्मरेयुः ?

(ख) सर्वेषां वपुष्षु किं प्रवहति ?

(ग) पूर्वजानां मुनीनां कवीनां च कः अभिलाषः ?

(घ) अस्माकं हृदि किं प्रसारिता भवेत् ?

(ङ) अधिकस्वेदेऽपि किं न त्यक्तव्यम् ?

२. **रिक्तस्थानं पूरयत -**

(क) गङ्गातुङ्गाकावेरी ..... आलस्यं हित्वा।

(ख) दुःखितदीनजनानुन्नेतुं .....।

(ग) प्रत्येकं मनुष्याणां ..... आस्ताम्।

(घ) आलस्यं त्यक्त्वा ..... कार्यमग्ना भवन्तु ।

(ङ) ..... तेषां बहुहृद्यम्।

३. **कोष्ठके विद्यमानानां पदानां लिङ्गविभक्तिवचनानि लिख्यन्ताम् -**

	लिङ्गम्	विभक्तिः	वचनम्
हृदये	.....	.....	.....
धैर्यम्	.....	.....	.....
सर्वेषाम्	.....	.....	.....
अनिलः	.....	.....	.....
मातुः	.....	.....	.....
पृथिवी	.....	.....	.....

४. **अधोलिखितानां पदानां सन्धिं विभज्य सूत्रं लिखत -**

	सन्धिविच्छेदः	सूत्रम्
(क) सन्त्विति	.....	.....
(ख) भेदो मा	.....	.....
(ग) संयातु	.....	.....
(घ) सुखिनस्सर्वे	.....	.....
(ङ) हृदयारूढम्	.....	.....

५. लकारपुरुषवचनानि लेखितव्यानि -

	लकारः	पुरुषः	वचनम्
(क) कुर्वन्तु	.....	.....	.....
(ख) प्रवहति	.....	.....	.....
(ग) सन्ति	.....	.....	.....
(घ) जहतु	.....	.....	.....
(ङ) हन्ति	.....	.....	.....
(च) लसतु	.....	.....	.....

६. अधोलिखितपदानां प्रकृति-प्रत्ययविभागं कुरुत -

	प्रकृतिः	प्रत्ययः
(क) सन्तः	.....	.....
(ख) मत्वा	.....	.....
(ग) हित्वा	.....	.....
(घ) कर्तुम्	.....	.....
(ङ) त्यक्तव्यम्	.....	.....
(च) हननम्	.....	.....

७. कोष्ठके प्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयत -

आयान्तु,	कुर्वन्तु,	जहतु,	संयातु,	भवतु

(क) स्वेदस्रोतः धैर्यं मा .....।

(ख) सुवर्णपुष्पां पृथिवीमेतां क्रष्टुम् .....।

(ग) एकीभावं हृदयारूढं सततं .....।

(घ) घर्षणलुण्ठनवञ्चनहननं प्रलयं .....।

(ङ) प्रवहति रक्तमभक्त मातुः भेदो मा .....।

८. अधोलिखितैः शब्दैः वाक्यानि रचयत -

(क) निर्मलभावापन्नाः ....

(ख) सर्वेषामैक्यम् ....

(ग) आलस्यं हित्वा ....

(घ) घर्षण-लुण्ठन-वञ्चन-हननम् ....

(ङ) मातुः ....

९. प्रयोगपरिवर्तनं कुरुत -

(क) धैर्यं मा जहतु।

(ख) भवन्तः स्वर्णकुसुमसदृशीं भूमीं कर्षयितुम् आगच्छन्तु।

(ग) मनुष्याणां मनसि निर्मलभावः आस्ताम्।

(घ) मनसि जातिभेदः, मतभेदः, भाषाभेदः, धनिकनिर्धनभेदश्च मा भवेत्।

(ङ) घर्षणं लुण्ठनं वञ्चनं हननञ्च सर्वथा प्रलयं प्राप्नोतु।

१०. पाठ्यांशस्य सारं संस्कृतभाषया मातृभाषया आङ्ग्लभाषया वा लिखत।

योग्यता-विस्तारः

कविः - विद्वान् जि.महाबलेश्वर-भट्टः।

जन्म - १२-६-१९४८

जन्मस्थानम् - हित्तलहल्ली, यल्लापुर-उपमण्डलम्, उत्तरकन्नडराज्यम्।

समवाप्तराष्ट्रपतिपुरस्कारः।

क्वचित्पृथिवीशय्यः क्वचिदपि च पर्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्॥
यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम्।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम्॥
दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने।
प्रीतिः साधुजने नयो नृपजने विद्वज्जने स्वार्जवम्॥


शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता।
ये चैवं पुरुषाः कलासु कुशला तेष्वेव लोकस्थितिः॥
प्रिया नाय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम्।
त्वसन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः॥
विपद्युच्चैः स्थेयं पदमनुविधेयं च महताम्।
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम्॥
लाङ्गुलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते॥
परिवर्तिनि संसारे मृतः को वा न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम्॥

नवमः पाठः

लकारार्थः

अष्टाध्याय्यास्तृतीयेऽध्याये धातुभ्यो विहिता दश लकारप्रत्ययाः विद्यन्ते। ते च यथा - लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्, इति। 'ल्' इति वर्णात् परं माहेश्वरसूत्रक्रमेण अ इ उ ऋ ए ओ इति षड् वर्णाः योजयितव्याः। तस्मात् 'ट्' इति अक्षरं योजयितव्यम्। तदा लट् लिट् लुट् लृट् लेट् लोट् इति षड् लकारा लभ्यन्ते। एतेषामन्ते टकारस्य इत्त्वात् एते टित्-लकारा अपि कथ्यन्ते। तथैव 'ल्' इत्यस्मात् परं माहेश्वरसूत्रस्य अ इ उ ऋ इति चत्वारो वर्णा योजनीयाः। अन्ते 'ङ्' इति योजनीयम्। तदा लङ् लिङ् लुङ् लृङ् एते चत्वारो लकाराः प्राप्यन्ते। एतेषामन्ते ङकारस्य इत्त्वाद् इमे ङित्-लकारा अपि कथ्यन्ते। इत्थं टिल्लकाराः षट्, ङिल्लकाराश्चत्वारः, आहत्य दश लकारा भवन्ति। एतेषु पञ्चमो लेट्-लकारः वेद एव प्रयुज्यते। अतः नव लकारा एव शिष्यन्ते। तत्र पुनः विधिलिङ्-आशीर्लिङ्-भेदाभ्यां लिङ्-लकारो द्विविधः। तथा च लोके अपि दश लकाराः। कस्मिन्नर्थे इमे लकारा भवन्तीति जानीमः।

लकारो द्विविधः, स च - सार्वधातुकः आर्धधातुकश्च। अधः प्रदत्तया सारण्या एतस्य भेदं सुष्ठु जानीत -



सार्वधातुकलकाराः

वर्तमाने लट् *(पा.सू. ३.२.१२३)* -

वर्तमानार्थे स्थिताद्धातोः लट् भवति। प्रारब्धोऽपरिसमाप्तश्च कालो वर्तमानः। तस्मिन् वर्तमानार्थे वर्तमानाद् धातोर्लट् प्रत्ययो भवति। देवदत्तः पठति। पचति। भवति।

अनद्यतने लङ् *(पा.सू. ३.२.१११)* -

न विद्यते अद्यतनं यस्मिन्, तद् अनद्यतनम्। अनद्यतनभूतार्थवृत्तेः धातोः लङ् स्यात्। अर्थात् अविद्यमानाद्यतने भूतेऽर्थे वर्तमानाद् धातोर्लङ् प्रत्ययो भवति। ह्यः देवदत्तः अकरोत्। अहरत्। अभवत्।

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् *(पा.सू. ३.३.१६१)* -

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु धातोः लिङ् स्यात्। अर्थात् विधिः, निमन्त्रणम्, आमन्त्रणम्, अधीष्टः, संप्रश्नः, प्रार्थनम्, इत्येतेष्वर्थेषु धातोर्लिङ् प्रत्ययो भवति।

विधिः - विधि इत्युक्ते प्रेरणम् इति। उदा - कटं कुर्यात् । वस्त्रं क्षालयेः ।

निमन्त्रणम् - नियोगकरणम् इति। उदा - इह श्राद्धे भवान् भुञ्जीत। इह भवानासीत।

आमन्त्रणम् - कामाचारकरणम् इति। इह भवानासीत। उदा - इह भवान् भुञ्जीत। अत्र कामाचारानुज्ञा वर्तते।

अधीष्टः - सत्कारपूर्वको व्यापारोऽधीष्टः। उदा - भवान् माणवकम् अध्यापयेद्। माणवकं भवानुपनयेत।

संप्रश्नः - सम्प्रधारणं संप्रश्नः इति। उदा - किं नु खलु भो व्याकरणमधीयीय ?

प्रार्थनम् - प्रार्थनं याचना इति। उदा - मां व्याकरणम् अध्यापयेत्। भवान् मे अन्नं दद्यात्।

लोट् च *(पा.सू. ३.३.१६२)* -

विध्याद्यर्थेषु आशिषि च धातोः लोट् स्यात्। उदाहरणम् - भवतो मङ्गलम् आस्ताम्। त्वम् आयुष्मान् एधि।

आर्धधातुकलकारः

परोक्षे लिट् *(पा.सू. ३.२.११५)* -

भूतानद्यतनपरोक्षार्थवृत्तेः धातोः लिट् स्यात्। उदाहरणम् - रामो बभूव। चकार। जहार। प्रयोक्तुः इन्द्रियागोचरत्वं परोक्षत्वम् इत्येव सर्वसम्मतम्।

छन्दसि लिट् *(पा.सू. ३.२.१०५)* -

छन्दसि विषये धातोर्लिट् स्यात्। उदाहरणम् - अहं सूर्यमुभयतो ददर्श। अहं द्यावापृथिवी आततान।

अनद्यतने लुट् *(पा.सू. ३.३.१५)* -

भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यात्। उदाहरणम् - देवदत्तः श्वः कर्ता। श्वो भोक्ता। अहं श्वः गन्तास्मि।

लृट् शेषे च *(पा.सू. ३.३.१३)* -

भविष्यदर्थाद्धातोर्लृट् स्यात्क्रियार्थायां क्रियायामसत्यां सत्यां च। अर्थात् शुद्धे भविष्यति काले, चकारात् क्रियार्थायां क्रियायां चोपपदे, धातोः लृट् भवति। उदाहरणम् - अद्य श्वो वा भविष्यति। अहं अद्य सायं श्वः परश्व प्रपरश्वो वा गमिष्यामि।

आशिषि लिङ्लोटौ *(पा.सू. ३.३.१७३)* -

आशंसनमाशीः। अप्राप्तस्येष्टस्यार्थस्य प्राप्तुमिच्छा। आशीर्विशिष्टेऽर्थे वर्तमानाद् धातोर्लिङ्लोटौ प्रत्ययौ भवतः। उदाहरणम् - चिरं जीव्याद् भवान्। आयुष्यं भूयात्। शत्रुर्म्रियात्। लोडपि - चिरं जीवतु भवान्।

लुङ् *(पा.सू. ३.२.११०)* -

भूतार्थवृत्तेः धातोः लुङ् स्यात्। उदाहरणम् - देवदत्तः अभूत्। अहम् अध्ययनम् अकार्षम्।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ *(पा.सू. ३.३.१३९)* -

हेतुहेतमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात् क्रियाया अनिष्पत्तौ गम्यमानायाम्। अर्थात् लिङ्निमित्ते भविष्यति काले लृङ् प्रत्ययो भवति क्रियातिपत्तौ सत्याम्। उदाहरणम् - सुवृष्टिश्चेदभविष्यत् सुभिक्षमभविष्यत्। यज्ञोऽभविष्यच्चेत् सुवृष्टिरभविष्यत्। भवान् घृतेन अभोक्ष्यत् यदि मत्समीपमासिष्यत। यदि त्वम् आदर्शविद्यालये अपठिष्यः तर्हि वेदम् अवेदिष्यः।

भूते च *(पा.सू. ३.३.१४०)* -

भूते च काले लिङ्निमित्ते क्रियातिपत्तौ सत्यां लृङ् प्रत्ययो भवति। उदाहरणम् - दृष्टो मया भवत्पुत्रोऽन्नार्थी चङ्क्रम्यमाणः, अपरश्च द्विजो ब्राह्मणार्थी। यदि स तेन दृष्टोऽभविष्यत्, तदा अभिक्ष्यत। न तु भुक्तवान्, अन्येन पथा स गतः।

शब्दार्थाः

प्रारब्धः	आरम्भो जातः
अपरिसमाप्तः	न समाप्तः
अनद्यतनम्	न विद्यते अद्यतनं यस्मिन्
भुञ्जीत	अश्नीयात्
आसीत	उपविशेत्
अधीयीय	पठेयम्
ददर्श	अपश्यम्
आततान	अतनवम्
जहार	अहरत्
सुभिक्षम्	सम्यक् अन्नम्
अभिक्ष्यत	अयाचिष्यत्
आसिष्यत	उपावेक्ष्यत्

अभ्यासः

१. अधोलिखितानां प्रश्नानामुत्तराणि लिखत -

(क) लकाराः कति ? के च ते ?

(ख) टित्-लकाराः के ?

(ग) लकारस्य भेदद्वयं किम् ?

(घ) लिट्-लकारः कस्मिन् भेदे अन्तर्भवति ?

(ङ) प्रारब्धोऽपरिसमाप्तश्च इति कस्य लकारस्य लक्षणम् ?

(च) आमन्त्रणम् इत्यस्य कोऽर्थः ?

(छ) अनद्यतने भूते कः लकारः प्रयुज्यते ?

२. रिक्तस्थानपूर्तिः क्रियताम् -

(क) विधि ..... लिङ्।

(ख) ..... क्रियातिपत्तौ।

(ग) ..... लोटौ।

(घ) भविष्यत्यनद्यतनेऽर्थे ..... स्यात्।

(ङ) ..... अभविष्यत् ..... सुभिक्षम् .....।

३. 'क' खण्डं 'ख' खण्डेन 'ख' खण्डं 'ग' खण्डेन मेलयत -

	(क)	(ख)	(ग)
(क)	देवदत्तः पठति	लङ्-लकारः	क्रियातिपत्तौ
(ख)	रामो बभूव	लुट्-लकारः	अनद्यने भूते
(ग)	शिष्यः श्वो पठिता	लृङ्-लकारः	वर्तमाने
(घ)	वेदमध्यैष्यत चेत्	लट्-लकारः	अनद्यतनेभविष्यति
(ङ)	गार्गी वेदमध्यैत	लिट्-लकारः	परोक्षेऽनद्यतनेभूते

४. अधोलिखितानां पदानां सन्धिविच्छेदं सन्धिमेलनं वा ससूत्रं निर्दिशत।

		सन्धिविच्छेदं	सूत्रम्
(क)	अष्टाध्याय्यास्तृतीयेऽध्याये	.....	.....
(ख)	धातुभ्यस् + विहिताः	.....	.....
(ग)	आर्धधातुकश्च	.....	.....
(घ)	इति + एतेषु + अर्थषु	.....	.....
(ङ)	कामाचारानुज्ञा	.....	.....
(च)	अन्नम् + दद्यात्	.....	.....
(छ)	अप्राप्तस्येष्टस्य	.....	.....
(ज)	लोट् + अपि	.....	.....
(झ)	तथैव	.....	.....
(ञ)	छात्रांश्च	.....	.....

५. दशलकाराणां सूत्राणि यथाक्रमं लिखत -

यथा - वर्तमाने लट् = लट् लकारः

१. ....।

२. ....।

३. ....।

४. ....।

५. ....।

६. ....।

७. ....।

८. ....।

९. ....।

१०. ....।

६. विध्यादीनां षण्णामुदाहरणपुरस्सरमर्थं लिखत -

यथा - विधिः = प्रेरणम्। उदा. कटं कुर्यात्।

१. ....।

२. ....।

३. ....।

४. ....।

५. ....।

७. निम्नलिखितपदेषु मूलधातुं लकारञ्च चिनुत -

		धातुः	लकारः
(क)	अकरोत्	.....	.....
(ख)	भुञ्जीत	.....	.....
(ग)	वर्तते	.....	.....
(घ)	दद्यात्	.....	.....
(ङ)	एधि	.....	.....

(च) जहार ....

(छ) भोक्ता ....

(ज) अभिक्ष्यत ....

योग्यता-विस्तारः

अभिज्ञावचने लृट् *(पा.सू. ३.२.११२)* -

स्मृतिबोधिन्युपपदे भूतानद्यतनेऽर्थे धातोर्लृट् स्यात्। लङोऽपवादोऽयम्। उदाहरणम् - स्मरषि कृष्ण ! आवां सान्दीपनि-आश्रमे अध्येष्यावहे।

लट् स्मे *(पा.सू. ३.२.११८)* -

स्म योगे धातोः लिटः स्थाने लट् प्रत्ययो भवति। उदाहरणम् - युधिष्ठिरो यजति स्म। कृष्णः अर्जुनमुपदिशति स्म।

वर्तमानसामीप्ये वर्तमानवद्वा *(पा.सू. ३. ३.१३१)* -

वर्तमाने ये प्रत्यया उक्ता ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः। उदाहरणम् - कदाऽऽगतोऽसि ? अयमहमागच्छामि अयमागमं वा। कदा गमिष्यसि ? एषोऽहं गच्छामि गमिष्यामि वा।

लट् वर्तमाने लेट् वेदे भूते लुङ्-लङ्-लिटस्तथा।

विध्याशिषास्तु लिङ्-लोटौ लुट्-लृट्-लृङ् च भविष्यति॥

दशमः पाठः

प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्

प्रस्तुतोऽयं पाठ्यांशः चरकसंहितायाः विमानस्थानस्य जनपदोध्वंसनीयविमानाध्यायाद्, तथा शारीरस्थानतः सङ्गृहीतो विद्यते। पाठेऽस्मिन् अधर्मस्य प्रकोपः, अयोगः, अतियोगः, मिथ्यायोगः, अशान्तिश्च इत्यादिविषया वर्णितास्सन्ति।

संसारेऽस्मिन् मुख्यतया आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकञ्चेति त्रिविधं दुःखं वरीवर्ति। तत्र प्रथमम् **आध्यात्मिकं दुःखम्** - आध्यात्मिकं दुःखं द्विविधम् - शारीरम्, मानसञ्चेति। **शारीरम्** - वातपित्तकफज्वरादिविपर्ययजनितं दुःखम्। **मानसम्** - कामक्रोधलोभमोहेर्ष्याभयादिजनितं दुःखम्। **आधिभौतिकं दुःखम्** - चतुर्विधभूतसमूहनिमित्तं मनुष्य-पशु-मृग-पक्षि-सरीसृप-दंश-मशक-यूक-मत्कुण-मत्स्य-मकर-ग्राहस्था-वरेभ्यः जरायुजाण्डजस्वेदजोद्भिज्जेभ्यः सकाशादुपजायते। **आधिदैविकं दुःखम्** - देवानामिदं दैवम्, दिवः प्रभवतीति वा दैवम्, तदधिकृत्य यदुपजायते शीतोष्णवातवर्षाऽशनिपातादिहेतुकं दुःखम्। उपर्युक्तम् आध्यात्मिकं दुःखमेव आयुर्वेदचरकसंहितायां "प्रज्ञापराधः" इत्युक्तम्। विश्वस्मिन् सर्वविधसुविधायां सम्पन्नायां सत्यामपि सर्वत्र अशान्तिरेव व्याप्ता। अशान्तेः समूलोच्छेदं विना प्रपञ्चेऽस्मिन् शान्तिः लब्धुं नैव शक्यते। अतः तस्या अशान्तेः मूलकारणं किमिति विषये पुरा ऋषयः चिन्तनमकुर्वन्। अशान्तेः मूलाधारस्तु मानवदुष्प्रवृत्तिरेव विद्यते। यथा - महर्षिः चरकः चरकसंहितायां प्रोक्तवान् -

"तमुवाच भगवानात्रेयः - सर्वेषामप्यग्निवेश! वाय्वादीनां यद् वैगुण्यमुपपद्यते तस्य मूलमधर्मः, तन्मूलं वाऽसत्कर्म पूर्वकृतं, तयोर्योनिः प्रज्ञाऽपराध एव। तद्यथा - यदा वै देशनगरनिगमजनपदप्रधाना धर्ममुत्क्रम्याऽधर्मेण प्रजां वर्त्तयन्ति, तदाश्रितोपाश्रिताः पौरजनपदा व्यवहारोपजीविनश्च तमधर्ममभिवर्धयन्ति, ततः सोऽधर्मः प्रसभं धर्ममन्तर्धत्ते। ततस्तेऽन्तर्हित-धर्माणो देवताभिरपि त्यज्यन्ते, तेषां तथाऽन्तर्हितधर्माणामधर्मप्रधानानामपक्रान्तदेवतानामृतवो व्यापद्यन्ते, तेन नापो यथाकालं देवो वर्षति, न वा वर्षति, विकृतं वा वर्षति, वाता न सम्यगभिवान्ति, क्षितिर्व्यापद्यते, सलिलान्युपशुष्यन्ति, ओषधयः स्वभावं परिहायापद्यन्ते विकृतिम्, तत उद्ध्वंसन्ते जनपदाः स्पृश्याभ्यवहार्यदोषात्।

तथा शस्त्रप्रभवस्यापि जनपदोद्धंसस्याधर्म एव हेतुर्भवति। येऽतिप्रवृद्धलोभक्रोध-मोहमानास्ते दुर्बलानवमत्यात्मस्वजनपरोपघाताय शस्त्रेण परस्परमभिक्रमन्ति, परान् वाऽभिक्रमन्ति परैर्वाभिक्राम्यन्ते। रक्षोगणादिभिर्वा विविधैर्भूतसंघैस्तमधर्ममन्यद्वाऽ-प्यपचारान्तरमुपलभ्याभिहन्यन्ते।

धीधृतिस्मृतिविभ्रंशः सम्प्राप्तिः कालकर्मणाम्।
आसात्म्यार्थागमश्चेति ज्ञातव्या दुःखहेतवः॥ १.९८॥
धीधृतिस्मृतिविभ्रष्टः कर्म यत् कुरुतेऽशुभम्।
प्रज्ञापराधं तं विद्यात् सर्वदोषप्रकोपनम्॥ १.१०२॥
उदीरणं गतिमतामुदीर्णानां च निग्रहः।
सेवनं साहसानां च नारीणां चातिसेवनम्॥ १.१०३॥
कर्मकालातिपातश्च मिथ्यारम्भश्च कर्मणाम्।
विनयाचारलोपश्च पूज्यानां चाभिधर्षणम्॥ १.१०४॥
ज्ञातानां स्वयमर्थानामहितानां निषेवणम्।
परमौन्मादिकानां च प्रत्ययानां निषेवणम्॥ १.१०५॥
अकालादेशसञ्चारो मैत्री सङ्क्लिष्टकर्मभिः।
इन्द्रियोपक्रमोक्तस्य सद्वृत्तस्य च वर्जनम्॥ १.१०६॥
ईर्ष्यामानभयक्रोधलोभमोहमदभ्रमाः।
तज्जं वा कर्म यत् क्लिष्टं क्लिष्टं यद्देहकर्म च॥ १.१०७॥
यच्चान्यदीदृशं कर्म रजोमोहसमुत्थितम्।
प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्॥ १.१०८॥
अतिलोभादसत्याद् वा नास्तिक्याद् वाप्यधर्मतः।
नरापचारान्नियतमुपसर्गः प्रवर्तते॥
ततोपचारान्नियतमपवर्जन्ति देवताः।
ताः सृजन्त्यद्भुतांस्तास्तु दिव्यनाभसभूमिजान्॥
त एव त्रिविधा लोके उत्पाता देवनिर्मिताः।
विचरन्ति विनाशाय रूपैः सम्बोधयन्ति च॥

पाठसारांशः

अत्यधिकलोभः, मिथ्याभाषणम्, नास्तिकता, वेदविहितकर्मणामनादरः, मानवोचितगुण-कर्तव्यानाम् अपरिपालनम् इत्यादिभिः क्रियाकलापैः प्रकृतिः अव्यवस्थिता भवति। प्रकृतेः अपचारं दूरीकर्तुं काश्चन अदृश्यशक्तिः कार्यं साधयतीति जनानां विश्वासो विद्यते। प्रकृतिवैपरित्याद् अदृश्यशक्तेः प्राकृतप्रचण्डोत्पात उद्भवति, स एव संसारस्थानां जनानां विनाशाय उग्ररूपेण समुपस्थितो भवति। तथाभूतशक्तिः मानवान् बोधयितुं प्रयतते यत् प्रतिकुलाचारेण मानवप्रकृत्योः प्रक्रिया दूषिता भवति। तेन सृष्टेः उपप्लवः विनाशो वा भवति। लोभाधिक्याद् एकः जनः अन्यस्य जनस्य, एकं राष्ट्रम् अपरराष्ट्रस्य प्रयोजनहनने संलग्नं भवति। फलतः उभयोः जनयोः राष्ट्रयोः च मध्ये मध्ये शान्तेः ह्रासो भवति।

तथा च जीवनमेव सङ्घर्षमयं भवति सर्वदा। नैतिकतारहितं कार्यं सम्यक् समाजं राष्ट्रं च स्थापयितुं न शक्नोति। नीत्युल्लङ्घनव्यवहारेण वेदादिग्रन्थेषु अश्रद्धा जायते। तेन तत्रस्थानां सद्गुणानां समुचितनीतिनियमानाञ्च ज्ञानाय जिज्ञासा एव न भवति, कुतो वा पालनम्? ईश्वरस्य प्रकृतेर्वा प्रदत्तनियमे निष्ठाभावान्मानवानां समस्तप्रजातीनां वा परस्परं स्नेहपूर्णस्य सौहार्दमयस्य व्यवहारस्य समाप्तिर्भवति। मिथः सौहार्दमयो व्यवहारस्तु ईश्वरस्य वेदादिशास्त्राणां वा आज्ञापालनादेव सम्भवति। उक्तञ्च श्रीमद्भगवद्गीतायाम् -

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥

शब्दार्थाः

आधिभौतिकम्	मानुषपशुमृगपक्षिसरीसृपस्थावरसम्बद्धं दुःखम्
आधिदैविकम्	दाहशीतातिवातादिवृष्ट्यादिहेतुकं दुःखम्
आध्यात्मिकम्	वातपित्तश्लेष्मकामक्रोधलोभमोहेर्ष्याजनितं दुःखम्
उपपद्यते	संप्राप्यते
अधर्मः	स्वकर्तव्यच्युतः
उत्क्रम्य	उल्लङ्घ्य

प्रसभम्	समुत्पन्नम्
अपक्रान्तः	उल्लङ्घितः
ऋतवो व्यापद्यन्ते	ऋतवो विपर्ययतां प्राप्नुवन्ति
विकृतम्	प्रतिकुलम्
अभिवान्ति	अभिचलन्ति
सलिलानि	जलानि
परिहायापद्यन्ते	परिवर्त्य प्राप्यन्ते
उध्वंसन्ते	नश्यन्ति
अभिक्रामन्ति	आक्रामन्ति
परान्	अन्यान्
रक्षोगणादिभिः	रक्षकसमूहैः
धीः	बुद्धिः
धृतिः	धैर्यम्
स्मृतिः	स्मरणम्
विभ्रंशः	विनष्टः
असात्म्यार्थः	मिथ्यार्थः
उदीरणम्	कथनम्
उदीर्णानाम्	उदितानाम्, महताम्
सेवनं साहसानाम्	दुष्कृतकार्याणां सेवनम् (परदारसंसर्गः)
निषेवणम्	सेवनम्
नरापचारात्	मानवानादरात्
अपवर्जन्ति	प्रतिकुलतां प्रापयन्ति
शिष्टाः	विद्वांसः
नाभसः	आकाशसम्बद्धः
भूमिजः	भूमिसम्बद्धः

अभ्यासः

१. सर्वान् प्रश्नान् समाधत्त -

(क) संसारेऽस्मिन् कतिविधं दुःखं वरीवर्ति ?

(ख) समेषां मनुष्याणामशान्तेः मूलकारणं किम् ?

(ग) असत्कर्मपूर्वकृतयोः योनिः कः ?

(घ) के स्वभावं परिहायापद्यन्ते विकृतिम् ?

(ङ) वातपित्तकफज्वरादिविपर्ययजनितं दुःखम् किम् ?

२. सर्वे प्रश्नाः समाधेयाः -

(क) आयुर्वेदचरकसंहितायां किं दुःखं प्रज्ञापराधः इति नाम्ना ज्ञायते ?

(ख) आधिदैविकं दुःखं किम् ?

(ग) धर्मं कः अन्तर्धत्ते ?

(घ) ऋतवः कदा व्यापद्यन्ते ?

(ङ) धीधृतिस्मृतिविभ्रष्टः कथं कर्म कुरुते ?

३. रिक्तस्थानं भरत -

(क) सर्वेषामप्यग्नि ..... अधर्मः।

(ख) शस्त्रप्रभावस्यापि ..... हेतुर्भवति।

(ग) धीधृतिस्मृति .....।

..... सर्वदोषप्रकोपनम्॥

(घ) उदीरणं गतिमता .....।

..... चातिसेवनम्॥

(ङ) यच्चान्यदीदृशं .....।

..... व्याधिकारणम्॥

(च) अतिलोभादसत्याद् .....।

..... प्रवर्तते॥

४. अधोलिखितपदानां विग्रहवाक्यपूर्वकं समासनाम लिखत -

	विग्रहवाक्यम्	समासनाम
(क) अधर्मप्रधानानाम्	.....	.....
(ख) धीधृतिस्मृतिविभ्रष्टः	.....	.....
(ग) दुःखहेतवः	.....	.....
(घ) विनयाचारलोपः	.....	.....
(ङ) ईर्ष्यामानभयक्रोधलोभमोहमदभ्रमाः	.....	.....
(च) व्याधिकारणम्	.....	.....
(छ) ब्रह्मद्विषः	.....	.....

५. अधोलिखितपदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि लिखत -

	सन्धिविच्छेदः	सन्धिसूत्राणि
(क) व्यापद्यन्ते	..... + ...	.....
(ख) सलिलान्युपशुष्यन्ति	..... + ...	.....
(ग) कुरुतेऽशुभम्	..... + ...	.....
(घ) परमौन्मादिकानाम्	..... + ...	.....
(ङ) इन्द्रियोपक्रमोक्तस्य	..... + ...	.....
(च) प्रज्ञापराधम्	..... + ...	.....

६. समुचितं युज्यताम् -

(क) नापो यथाकालं	सर्वदोषप्रकोपनम्
(ख) क्षितिः	देवो वर्षति
(ग) वाता न सम्यक्	उपशुष्यन्ति
(घ) जनपदाः	कर्म यत् कुरुतोऽशुभम्
(ङ) सलिलानि	अभिवान्ति
(च) प्रज्ञापराधं तं विद्यात्	व्यापद्यते
(छ) धीधृतिस्मृतिविभ्रष्टः	उध्वंसन्ते

७. **प्रदत्तस्य श्लोकस्य भावार्थं लिखत -**

ईर्ष्यामानभयक्रोधलोभमोहमदभ्रमाः।

तज्जं वा कर्म यत्क्लिष्टं क्लिष्टं यद्देहकर्म च॥

८. **प्रयोगपरिवर्तनं क्रियताम् -**

(क) धीधृतिस्मृतयः प्रज्ञाभेदाः भवन्ति।

(ख) नापो यथाकालं देवो वर्षति।

(ग) सलिलान्युपशुष्यन्ति।

(घ) अन्तर्हितधर्माणः देवताभिः त्यज्यन्ते।

(ङ) धीधृतिस्मृतिविभ्रष्टः अशुभं कर्म कुरुते।

९. **रेखाङ्कितपदान्याधृत्य कारकविभक्ती निर्दिशत -**

(क) औषधयः स्वभावं परिहायापद्यन्ते विकृतिम्।

(ख) प्रज्ञापराधं तं शिष्टा ब्रुवते व्याधिकारणम्।

(ग) अधर्मेण प्रजां वर्त्तयन्ति।

(घ) अन्तर्हितधर्माणः देवताभिः त्यज्यन्ते।

(ङ) जगत्यस्मिन् त्रिविधं दुःखं वर्तते।

१०. **दुःखत्रयमवलम्ब्य स्वकीयैः वाक्यैः स्वविचारान् प्रकटयत।**

योग्यताविस्तारः

चरकसंहिता आयुर्वेदशास्त्रस्य सुप्रसिद्धो ग्रन्थो विद्यते। ग्रन्थेऽस्मिन् अष्टस्थानानि वर्तन्ते। तत्र सूत्रस्थानम्, निदानस्थानम्, विमानस्थानम्, शारीरस्थानम्, इन्द्रियस्थानम्, चिकित्सास्थानम्, कल्पस्थानम्, सिद्धिस्थानञ्चेति।

प्रातःकाले व्यायामः नित्यं दन्तविशोधनम्।

स्वच्छजलेन सुस्नानं बुभुक्षायाञ्च भोजनम्॥

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः।

छान्दोग्योपनिषद् - ७.२६.०२

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्।
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत्॥

मनुस्मृतिः - २.५७

भोजनं प्राणरक्षार्थं विद्यते नात्र संशयः।
अधिकं हानये तस्मात् युक्ताहारपरो भवेत्॥

चरकसंहिता

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥
आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।
रस्याः स्निग्धा स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥

श्रीमद्भगवद्गीता - १७.१५.०८

मिताहारो नरः सोढुं शक्तः कष्टशतं सुखम्।
अनभ्यस्तो हि कष्टानां मध्यशनो विपद्यते।

सुमनवाटिका

तस्याशिताद्यादाहाराद् बलवर्णञ्च वर्धते।
तस्यर्तुसात्म्यं विदितं चेष्टाहारव्यापाश्रयम्॥

सूत्रस्थानम् - ६.३

उष्णमश्नीयात्, उष्णं हि भुज्यमानं स्वदते, भुक्तं चाग्निमौदार्यमुदीरयति, क्षिप्रं जरां गच्छति, वातमनुलोमयति, श्लेष्माणं च परिहासयति, तस्मादुष्णमश्नीयात्।

स्निग्धमश्नीयात्, स्निग्धं हि भुज्यमानं स्वदते, क्षिप्रं जरां गच्छति, वातमनुलोमयति, शरीरमुपचिनोति, दृढीकरोतीन्द्रियाणि, बलाभिवृद्धिमुपजनयति, वर्णप्रसादं चाभिनिवर्तयति, तस्मात् स्निग्धमश्नीयात्।

नातिद्रुतमश्नीयात्, अतिद्रुतं हि भुञ्जानस्योत्स्नेहनमवसादनं भोजनस्याप्रतिष्ठानं च भोज्यदोषः, साद्गुण्योपलब्धिच न नियता, तस्मान्नातिद्रुतमश्नीयात्।

अजल्पन्नहसन् तन्मना भुञ्जीत, जल्पतो हसतोऽन्यमनसो वा भुञ्जानस्य त एव दोषा भवन्ति य एवातिद्रुतमश्नतः, तस्मादजल्पन्नहसंस्तन्मना भुञ्जीत।

एकादशः पाठः

सुभाषितानि

अमृतवचनम्, सूक्तिः, सुभाषितम्, इत्यादयः पर्यायशब्दाः नीतिश्लोकस्यैव सन्ति। तच्छ्लोकः नीतिश्लोक इत्युच्यते, यच्छ्रुत्वा मनसि सन्तोषो जायते तथा च कर्तव्याकर्तव्यविषयान् ज्ञात्वा सुष्ठु जीवनं यापयितुं शक्यते। नीतिश्लोकाः इतरजनानां मनः क्लेशाय, अपरेषाम् अनादराय च न भवति। अपि तु सर्वेषां हिताय भवति। नीतिश्लोकेषु बुद्धिमत्ता-नैतिकता-विवेकशीलता-आध्यात्मिकतादयो गुणा भवन्ति। अतः अस्मिन् पाठे छात्राणां ज्ञानाय, सद्गुणानाम् अर्जनाय च केचननीतिश्लोकाः विविधविषयसम्बद्धाः अत्रः समुपस्थापिताः।

हिताशी स्यान्मिताशी स्यात्कालभोजी जितेन्द्रियः।
पश्यन् रोगान् बहून् कष्टान् बुद्धिमान् विषमाशनात्॥

भावार्थः - यो धीमान् सः अपथ्यभोजनाद् उत्पद्यमानान् रोगान्, तेभ्यः जायमानानि बहूनि कष्टानि च पश्यन् हितं भोजनं कुर्यात्। मितं भोजनं कुर्यात्। काले भोजनं कुर्यात्। तथा स जितेन्द्रियो भवेत्।

अत्यम्बुपानाद् विषमाशनाच्च दिवा च सुप्तेः निशि जागराच्च।
संरोधनान्मूत्रपुरीषयोश्च षड्भिः निदानैः प्रभवन्ति रोगाः॥

भावार्थः - अधिकजलस्य पानात्, अधिक-अपथ्यकरभोजनात्, दिने शयनात्, रात्रौ जागरणात्, मूत्रस्य, मलस्य च प्रतिरोधाद् एवं षड्भिः मूलकारणैः रोगाः सम्भवन्ति ।

आहारार्थं कर्म कुर्यादनिन्द्यं कुर्यादाहारं प्राणसन्धारणार्थम्।
प्राणाः सन्धार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखम्॥

भावार्थः - आहारार्थं निन्दितं कर्म न कुर्यात्। केवलं प्राणधारणार्थम् आहारं स्वीकुर्यात्। परमतत्त्वस्य जिज्ञासार्थं प्राणानां धारणम्। दुःखस्य निवृत्तये तत्त्वस्य जिज्ञासा कर्तव्या।

स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम्।
तस्मात् स्नानं निषेवेत श्रीपुष्टारोग्यवर्धनम्॥

भावार्थः - श्रुतिस्मृत्यादिभिः मानवानां सर्वाः क्रियाः स्नानपूर्वकतया विहिताः। अतः श्रीपुष्टि-आरोग्यवर्धनार्थं स्नानम् अवश्यं करणीयम्।

प्राणायामेन युक्तेन सर्वरोगक्षयो भवेत्।
अयुक्ताभ्यासयोगेन सर्वरोगस्य सम्भवः॥

भावार्थः - विध्युक्तप्राणायामस्य अभ्यासेन सर्वे रोगाः क्षीणाः भवन्ति। अविध्युक्तप्राणायामस्य अभ्यासेन सर्वे रोगाः सम्भवन्ति।

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते॥

भावार्थः - हितकरम्, अहितकरम्, सुखकरम्, दुःखकरञ्च एवम् आयुः चतुर्धा भवति। एतादृशस्य आयुषः हितकरं किम् ? अहितकरं किम् ? आयुषः मानं कियत् ? इत्यादिविषयान् आयुर्वेदो निरूपयति।

समदोषः समाग्निश्च समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते॥

भावार्थः - यस्य वातपित्तकफादिदोषाः, जठराग्निः कायाग्निश्च, रसादिसप्तधातवः, पुरीषादिमलं च एताः क्रियाः समाः तथा यस्य आत्मा इन्द्रियाणि मनः च प्रसन्नं भवति सः स्वस्थः इति कथ्यते।

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने।
आयुः प्रज्ञा बलं वीर्यं तेजस्तेषां च जायते॥

भावार्थः - ये प्रतिदिनं सूर्यस्य नमस्कारान् कुर्वन्ति तेषां दीर्घायुः बुद्धिः बलं तेजः च वर्धते।

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः॥

भावार्थः - कार्यमचिन्तयित्वैव सहसा न कुर्वीत। कथञ्चिद् विवेकराहित्यम् आपदायाः परमापदं विद्यते। विवेकपुरस्सरं कार्यं कर्तुं जनं गुणलुब्धो वैभवः स्वयमेव वृणुते।

कृष्णो रक्षतु मां चराचरगुरुं कृष्णं नमस्याम्यहम्।
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः॥

भावार्थः - कृष्णो मां रक्षतु। चराचरस्य निखिलजगतो गुरुं श्रीकृष्णमहं नमस्करोमि। श्रीकृष्णः बहून् अमरशत्रून् निहतवान्। तस्मै श्रीकृष्णाय नमः।

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः॥

उद्योगिनं पुरुषसिंहं लक्ष्मीः उपैति = कार्यतत्परं सिंहवत् साहसिनं पुरुषं प्रति सम्पत् स्वयम् आगच्छति। दैवेन देयम् = देवः अनुगृह्णाति, इति कापुरुषाः = कुजनाः, वदन्ति, अतः दैवं निहत्य = अदृष्टे विश्वासं परित्यज्य आत्मशक्त्या, पौरुषं कुरु = पुरुषप्रयत्नं कुरु। यत्ने कृते, यदि न सिद्ध्यति = इष्टकार्यस्य सिद्धिः न भवति चेद् अत्र कः दोषः।

रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयताम्
अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतः मा ब्रूहि दीनं वचः॥

रे रे मित्र = भोः वयस्य ! चातक = चक्रवाक् पक्षिन्। सावधानमनसा = एकाग्रचित्तेन, क्षणं श्रूयताम् = एकं क्षणं शृणु। गगने अम्भोदाः = मेघाः, बहवः सन्ति, सर्वे अपि न एतादृशाः = किन्तु सर्वे मेघाः अपि एकप्रकाराः न भवन्ति। केचित् वृष्टिभिः = केचन मेघाः जलैः धरणीम् आर्द्रयन्ति = सिञ्चन्ति, केचित् = केचन मेघाः, वृथा = व्यर्थं गर्जन्ति, अतः यं यं पश्यसि = यं यं मेघं पश्यसि, तस्य तस्य पुरतः = तस्य तस्य मेघस्य पुरतः दीनं वचः = दीनवचनानि, मा ब्रूहि = मा वद। अतः स्वाभिमानी भव इत्यर्थः।

शब्दार्थाः

जितेन्द्रियः	**इन्द्रियं जितवान् यः**
हिताशी	सुष्ठु भोक्ता
कालभोजी	समये भोजनम्
अशनात्	भोजनात्
मिताशी	स्तोकभोक्ता
अम्बु	जलम्

विषमाशनात्	अजीर्णभोजनम्
सुप्तेः	शयनस्य
संरोधनात्	अवरोधनात्
पुरीषम्	विष्ठा
श्रुतिः	वेदः
नृणाम्	मनुष्याणाम्
निषेवेत	करणीयम्
अभिधीयते	कथ्यते
सहसा	अकस्मात्
न विदधीत	न कुर्वीत
परमापदाम्	महती विपद्

अभ्यासः

१. **वस्तुनिष्ठाः प्रश्नाः -**

(क) कति दोषाः ?

(अ) त्रयः (आ) द्वौ

(इ) पञ्चधा (ई) षड्

(ख) कति धातवः ?

(अ) सप्त (आ) चत्वारः

(इ) पञ्चधा (ई) त्रयः

(ग) मनः कदा प्रसन्नं भवति ?

(अ) मलत्यागस्य पश्चाद् (आ) शयनस्य अनन्तरम्

(इ) दुर्घटनायाः पश्चाद् (ई) कलहस्य अनन्तरम्

(घ) आदित्यस्य नमस्कारैः किं जायते ?

(अ) आयुः (आ) प्रज्ञा

(इ) तेजः (ई) उपरोक्तसर्वाणि

(ङ) केन प्रकारेण रोगाः क्षीणताम् आप्नुवन्ति ?

(अ) पठनेन (आ) भोजनेन

(इ) प्राणायामाभ्यासेन (ई) शयनेन

२. पूर्णवाक्येन प्रश्नान् समाधत्त -

(क) कैः षड्भिर्निदानैः रोगाः सम्भवन्ति ?

(ख) आहारार्थं किं कुर्यात् ?

(ग) कः आयुर्वेदः उच्यते ?

(घ) आदित्यस्य नमस्कारात् किं भवति ?

(ङ) लक्ष्मीः कम् उपैति ?

(च) आकाशे किम् अस्ति ?

(छ) सुभाषितकारः चातकं संबोध्य किं वदति ? तस्य सन्देशः कः?

(ज) कदा निन्दितं कर्म न कुर्यात् ?

३. समुचितं योजयत -

(क) प्राणायामेन युक्तेन	समधातुमलक्रियः
(ख) आदित्यस्य नमस्कारान्	मायुस्तस्य हिताहितम्
(ग) समदोषः समाग्निश्च	सर्वरोगक्षयो भवेत्
(घ) हिताहितं सुखं दुःखं	ये कुर्वन्ति दिने दिन
(ङ) कृष्णो रक्षतु मां चराचर-	गुरुं कृष्णं नमस्याम्यहम्
(च) आयुः प्रज्ञा बलं वीर्यं	तेजस्तेषां च जायते
(छ) अयुक्ताभ्यासयोगेन	सर्वरोगस्य संभवः

४. रिक्तस्थानानि पूरयत -

(क) हिताहितं सुखं ..... मायुर्वेदः स उच्यते॥

(ख) समदोषः समाग्निश्च ..... इत्यभिधीयते॥

(ग) आदित्यस्य ..... च जायते॥

(घ) प्राणायामेन ..... सर्वरोगस्य संभवः॥

(ङ) स्नानमूलाः ..... वर्धनम्॥

(च) सहसा विदधीत ..... स्वयमेव सम्पदः ॥

(छ) कृष्णो रक्षतु मां ..... कृष्णाय तस्मै नमः ॥

५. सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -

		विच्छेदः	सन्धिनाम
(क)	प्रत्यवेक्षेत	..... + ...	.....
(ख)	नमस्याम्यहम्	..... + ...	.....
(ग)	नैतादृशाः	..... + ...	.....
(घ)	नावसीदति	..... + ...	.....
(ङ)	विक्रमार्जितः	..... + ...	.....

६. विद्यमानानां पदानां विग्रहवाक्यं विलिख्य समासनाम लिखत -

		विग्रहवाक्यम्	समासनाम
(क)	पुरुषसिंहः	.....	.....
(ख)	पशुतुल्यम्	.....	.....
(ग)	आत्मशक्त्या	.....	.....
(घ)	मृगेन्द्रः	.....	.....
(ङ)	समदोषः	.....	.....
(च)	गुणलुब्धः	.....	.....
(छ)	जितेन्द्रियः	.....	.....

७. अधोलिखितपदानां पर्यायपदानि लिखत -

(क)	नरः	.....	(ख)	वर्त्म	.....
(ग)	करः	.....	(घ)	मूर्खः	.....
(ङ)	मित्रम्	.....	(च)	गगनम्	.....

८. अधोलिखितवाक्यानां प्रयोगं परिवर्तयत।

यथा - उद्योगिनं पुरुषसिंहं लक्ष्मीः उपैति।

उद्योगी पुरुषसिंहः लक्ष्म्या उपेयते।

(क) कृष्णो रक्षतु माम्।

(ख) आयुः बुद्धिः बलं तेजः च वर्धते।

(ग) कृष्णेन अमरशत्रवः विनिहताः।

(घ) इत्यादिविषयाः आयुर्वेदेन निरूप्यन्ते।

(ङ) षड्भिः मूलकारणैः रोगाः सम्भवन्ति।

९. अधोलिखितेषु प्रकृतिप्रत्ययौ विभजत -

	प्रकृतिः	प्रत्ययः
(क) पश्यन्	.....	+ .....
(ख) कुर्यात्	.....	+ .....
(ग) अभिधीयते	.....	+ .....
(घ) विदधीत	.....	+ .....
(ङ) उपैति	.....	+ .....
(च) श्रूयताम्	.....	+ .....
(छ) ब्रूहि	.....	+ .....

१०. "रे रे चातक सावधानमनसा ..... मा ब्रूहि दीनं वचः" श्लोकं पूरयित्वा किं छन्दः तस्य लक्षणं वा किम् इति स्पष्टयत।

योग्यता-विस्तारः

सुभाषितमित्यस्यार्थस्य सूक्तिस्सदुक्तिरिति। संस्कृतसाहित्ये सुभाषितानि विशिष्टकाव्यप्रकारत्वेन परिगणितानि। तानि सुभाषितानि प्रायो लोकनीतिबोधकानि, मानवजीवनस्य समुन्नतेः सहायकानि च भवन्ति। तेषामध्ययनेन मन उल्लसितं विकसितञ्च भवति। सुभाषितानि व्यवहारचातुर्यं बोधयन्ति, सन्मार्गम् उपदिशन्ति च।

न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सत्यं खलु वारिवाहाः परोपकाराय सतां विभूतिः॥

क्षारं जलं वारिमुचः पिबन्ति तदेव कृत्वा मधुरं वमन्ति।
सन्तस्तथा दुर्जनदुर्वचांसि पीत्वा च सूक्तानि समुद्गिरन्ति॥
आदित्यचन्द्रावनलानिलौ च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्॥
आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥
क्वचित्पृथिवीशय्यः क्वचिदपि च पर्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्॥
सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविताः पञ्चषास्
तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते।
द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः ! पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः॥
वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्ये पृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा-
दहह ! महतां निःसीमानश्चरित्रविभूतयः॥

द्वादशः पाठः

सर्वज्ञानमयी संस्कृतभाषा

मनुष्यस्य कृते सम्यक् व्यवहारनिर्वाहाय भाषायाः अपरिहार्या आवश्यकता विद्यते। प्रतिक्रोशं जलमिव भाषापि विभिद्यत इति अनुभववेद्यः प्रवादः। अत एव नानाजनानां व्यवहाराय विश्वस्मिन् विश्वे नैका भाषा जनिमलभन्त। तासु सर्वासु भाषासु प्राचीनतमा भाषितभाषा देवभाषा संस्कृतभाषाऽस्ति। वेदो नित्य इति कारणाद् वेदस्य भाषा संस्कृतं विश्वस्य प्राचीनतमा भाषा, सैषा अनपायिनी दैवी वाक्। विश्वस्य शाश्वतिकः प्राचीनतमश्च वाङ्मयविशेषो वेदः। स वेदः न ग्रन्थः केनापि न ग्रथित इति कारणात्। वेदस्तु ऋषिभिः दृष्टो वाङ्मयविशेषः। वेदस्य संस्कृतभाषामयत्वात् सर्वास्वपि भूमण्डलभाषासु प्राचीनतमा संस्कृतभाषा एव, बह्वीनां भाषाणां साक्षात् परम्परया वा जननी एषा, शब्दजालस्य स्रष्ट्री एषा भाषा। अस्याः संस्कृतभाषायाः एव विविधभाषाशब्दानां समुद्भवात् शब्दतत्त्वविदः संस्कृतभाषां ज्ञानविज्ञानयोर्विश्वभाषाणाञ्च जननीं पोषयित्रीं च मन्वते। अतः संस्कृतभाषा वाङ्मयं च विश्ववाङ्मये अद्वितीयं स्थानं विभूषयति।

अस्याः भाषायाः वैशिष्ट्यमस्ति यद् मानवमुखाद् यावतां ध्वनीनाम् उच्चारणं कर्तुं शक्यं तावन्तो ध्वनयः तैस्तैरक्षरसङ्केतैः उच्चारणस्थानेषु तथा उच्चार्यन्ते। यल्लिख्यते तदेवोच्चार्यते, लिखितस्य सङ्केतस्य उच्चारणकाले लोपः कर्तुं न हि शक्यः। अस्यां भाषायाम् उच्चारणस्थानस्य विशिष्टं वैज्ञानिकत्वं दृश्यते। स्वरव्यञ्जनादिवर्णानां व्यवस्था यावती अत्र दृश्यते अन्यासु भाषासु सा तथा नास्ति। अर्थगौरवाय सूत्ररूपेण प्रकटनमस्याः भाषायाः वैशिष्ट्यम्। पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।

वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश। इत्युक्तरीत्या चत्वारो वेदाः, षट् वेदाङ्गानि, अष्टादशपुराणानि, न्यायशास्त्रम्, मीमांसा, धर्मशास्त्रं चेति चतुर्दशविद्याः विद्यास्थानानि सन्ति। भारतीयपरम्परायां विद्यानाम् आधारा वर्तन्ते।

सूत्र-वृत्ति-वार्तिक-भाष्य-व्याख्यान-टिप्पणी-टीकोपटीकादिरूपेण गरीयसः अर्थस्य प्रकटनपरम्परा विश्वभाषासु संस्कृतशास्त्रपरम्पराया एव प्रववृते, ततो महर्षयः विचारान् सूत्रैः प्रकटितवन्तः। प्रत्येकं वस्तुनः गुण-वैशिष्ट्यप्रकटनाय संस्कृतभाषायाम् अनेकानि पर्याय-पदानि

विद्यन्ते। प्रत्येकं शब्दस्य प्रकृति-प्रत्ययोः संयोजनेन अर्थवैशिष्ट्यस्य प्रकाशनं भाषायाः अस्याः असाधारणो गुणः।

धर्म-अर्थ-काम-मोक्षपुरुषार्थबोधकैः वेद-वेदाङ्ग-दर्शन-खगोल-गणित-पुराण-इतिहास-विज्ञान-कला-प्रयोगवाङ्मयैः उदधिरिव गभीरा अनन्ता च विलसन्ती देववाणी सरसा-सुबोधा, नैव क्लिष्टा, नापि कठिना, अपि तु जनमानसहारिणी च विद्योततेतमाम्। न केवलं नैतिकाः, धार्मिकाः, आध्यात्मिकाः वा विषया अस्य वाङ्मयस्य शोभां वर्धयन्ति, अपि तु समकालिकाः लोकोपयोगिनः दैनन्दिनजीवने उपयोगिनः लौकिकाः वैज्ञानिकाः च विषया अत्र भूरिशः उपलभ्यन्ते, पुरा एव ग्रन्थाः संग्रथिताः अस्यां भाषायाम्। संस्कृतभाषा, भारती, सुरभारती, अमरवाणी, गीर्वाणगीः, देववाणी, देवभाषा, संस्कृतवाक्, अमृतवाणी इत्यादिभिः नामभिः सुप्रसिद्धा इयं भाषा। एषा भाषा भारतमभिव्याप्य प्राचीनकालादेव सर्वव्यवहारेषु उपयुक्ता, वियटनामपर्यन्तेषु विविध-देशेषु सामाजिकेषु, धार्मिकेषु च कार्येषु सश्रद्धं व्यवहारपथं नीता च। संस्कृतभाषा एषा नानाविधज्ञानानां विज्ञानानां च शेवधिः आकरस्वरूपा विराजते। तथा च -

वेदाः - ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेद-नामानः चत्वारो वेदाः प्रथन्ते। वेदः विश्वस्य सर्वाद्यः वाङ्मयविशेषः, ज्ञानराशिः, चिन्तनानां स्रोतः च विलसति। ज्ञानस्य, कर्मणः, उपासनायाः विज्ञानस्य च मूलं स्रोतः वेदः। अग्नेः, यज्ञस्य, सूर्यस्य, इन्द्रस्य, आत्मनः, सोमस्य, ब्रह्मणः, मनसः, स्वरशास्त्रस्य, धर्मस्य, प्राणानाम्, ब्रह्माण्डस्य, गणितस्य, खगोलस्य, भूगोलस्य, रसायनक्रियायाः, औषधेः, प्रकृति-संरक्षणोपायस्य, जगदुत्पत्तेः, पदार्थगुणस्य, जीवननियमस्य च विषये, धर्म-दर्शन-कला-यज्ञादिविधीनां च विषये ऋषीणां सार्वभौमिकं चिन्तनं विविधेषु वेदमन्त्रेषु दृश्यते। मन्त्रपारायणेन यज्ञानुष्ठानेन च कायिकी, वाचिकी, मानसिकी, पर्यावरणिकी च शुद्धिर्भवति। वेदे सम्पूर्णायाः वसुधायाः, तत्रस्थानां जनानां च मध्ये कुटुम्बभावना सम्यग् अभिव्यक्तास्ति। सर्वासां प्रजानां परस्परं सौहार्दस्य, कल्याणमार्गस्य, आरोग्यस्य, राष्ट्रसंरक्षणस्य, राष्ट्रसंवर्धनस्य, विश्वशान्तेः च उपायाः मानवानां हिताय वेदेषु ऋषिभिः दृष्टा चिरात् सर्वान् मानवान् प्रबोधयन्ति।

उपवेदाः - आयुर्वेदः ऋग्वेदस्य, धनुर्वेदः यजुर्वेदस्य, गान्धर्ववेदः सामवेदस्य, स्थापत्यवेदः अथर्ववेदस्य च उपवेदा विद्यन्ते। वैदिकं ज्ञानमाश्रितं स्वास्थ्यविज्ञानम् आयुर्वेदस्य विषयः। चरक-सुश्रुत-वाग्भट-प्रणीताः ग्रन्था अत्र विरचिता विद्यन्ते। युद्धकला धनुर्वेदस्य ज्ञानविषयो

भवति। गान्धर्ववेदस्य सर्वा अपि ललितकला विवेच्यविषयो वर्तते। स्थापत्यवेदस्य गृह-राजप्रासादादिनिर्माणविषयकं वास्तुशास्त्रं विवेच्यविषयोऽस्ति। इम उपवेदाः बीजरूपेण वेदेषु उपवेदेषु च विद्यमानं ज्ञानं कालान्तरे आधुनिककालिकानां नानाज्ञानानां प्रेरकम्, उद्बोधकं वा समभवत्।

वेदाङ्गानि - शिक्षा व्याकरणं छन्दः निरुक्तं ज्यौतिषं तथा।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः॥

इति षड् वेदस्य अङ्गानि सन्ति। शिक्षा नाम शुद्धोच्चारणस्य शास्त्रम्। आधुनिककालस्य फोनेटिक्स इत्यस्य मूलम् अत्र अन्वेष्टुं शक्यते। व्याकरणं साधुशब्दानां व्याख्यानाय प्रवृत्तं शास्त्रम्। अत्र सूत्राश्रयेण प्रवृत्तानां विविधभाषाव्याकरणानां मूलं स्रोतः व्याकरणम् अस्ति। सूत्रशैल्या ग्रथितं पाणिनीयं व्याकरणम् आधुनिक-कालिकस्य 'कम्प्यूटर-प्रोग्रामिंग' इत्यस्य अद्भुतं बौद्धिकं वैचित्र्यम् अस्ति। कम्प्यूटर-प्रोग्रामिंग कर्तुं दक्षतां प्राप्तुं च पाणिनीय-व्याकरणस्य अध्ययनं महते उपयोगाय भवति। गायत्र्युष्णिगनुष्टुभादिच्छन्दसाम् अक्षरनियमेन निदर्शकं छन्दश्शास्त्रं वर्तते। लौकिकच्छन्दस्सु अपि मात्राभिः अक्षरैः च निबद्धानां वृत्तानां निदर्शकं छन्दश्शास्त्रं विद्यते। सूत्रशैल्या ग्रथितं आचार्यपिङ्गलकृतं छन्दश्शास्त्रम् आधुनिककाले कोडिंग (कम्प्यूटर-प्रोग्रामिंग) ज्ञानस्य संवर्धनाय अद्भूतम् उपकरणम् अस्ति। निरुक्तं वेदशब्दानां निर्वचनम् अर्थं च निर्वक्ति। यूरोपीयभाषाशब्दानां रहस्यं निरुक्तेषु प्रोक्तैः निर्वचनैः ज्ञातुं शक्यते। आधुनिकस्य लिंग्विस्टिक्स इत्यस्य उद्भवः निरुक्तेषु प्रोक्तैः निर्वचनैः व्युत्पत्तिशास्त्रेण च संबद्धः वर्तते। ज्यौतिषं ज्योतिषां ग्रहनक्षत्रादीनां गणनं तदनुगुणं कालगणनं च निदर्शयति। ग्रहनक्षत्रादीनाम् आकाशकायानां रहस्यं सृष्टिरहस्यं च ज्यौतिषशास्त्रं समुद्घाटयति। कल्पश्च वेदानां श्रौतस्मार्तगृह्यकर्मसु धर्मकर्मसु च विनियोगं प्रकल्पयति। अत एव शुल्बसूत्राणि, श्रौतसूत्राणि, धर्मसूत्राणि इति कल्पान्तर्गततया त्रिधा सूत्रव्यवस्था प्रोक्ता। इमानि वेदाङ्गानि आधुनिके काले भारतीयां संस्कृतिम्, विद्यां तथा जनमानसं च अभिव्याप्य जनानां व्यवहारं प्रभावयन्ति।

दर्शनानि - चार्वाकम्, चतुर्विधं बौद्धं दर्शनम्, जैनं चेति षण्नास्तिकानि दर्शनानि विद्यन्ते। न्यायः, वैशेषिकम्, सांख्यम्, योगः, पूर्वमीमांसा, उत्तरमीमांसा इति षडास्तिकानि दर्शनानि सन्ति। एतेषु आस्तिकेषु दर्शनेषु वेदस्य प्रामाण्यम् अङ्गीक्रियते। न्याये, वैशिषिके च

तर्कशास्त्ररीत्या पदार्थचिन्तनं दर्शितम्। सांख्ये प्रकृति-पुरुषयोः ख्यातिचिन्तनं प्रकाशितम् अस्ति। योगशास्त्रे मानवचित्तस्य नियन्त्रणपूर्वकं कायिक-वाचिक-मानसिकस्वास्थ्यपूर्वकं साधनमार्गोपदेशः प्रदत्तः। विश्वस्मिन् नानारोगैः जनानां रक्षकत्वेन इदानीं योगशास्त्रं विराजते। जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायां कर्मोपासनामार्गाः उपदिष्टाः सन्ति। भगवता व्यासेन ब्रह्मसूत्रेषु उत्तरमीमांसासूत्रेषु मानवस्य पुनर्जन्मनिवृत्तये ब्रह्मणः चिन्तनम् आत्मचिन्तनं च दर्शितम् अस्ति। इत्थं संस्कृतं न केवलं लौकिकभाषा, अपि तु, कायिक-वाचिक-मानसिकस्वास्थ्यस्य उपदेशिकी, आत्मनो बोधिका च भाषा संस्कृतम् अस्ति।

आयुर्वेदशास्त्रम् - मनुष्याः सर्वदा आरोग्यवन्तः सुखिनश्च भवेयुः इति चिन्तयन्ति। अत एव स्वस्थयोः मनश्शरीरयोः कृते नैके उपायाः आयुर्वेदे उल्लिखितास्सन्ति। चरक-सुश्रुत-वाग्भट्टादयो महर्षयः आयुर्वेदे ग्रन्थान् विरचय्य विश्वस्मै महान्तम् उपकारम् अकुर्वन्। द्रव्यगुणविज्ञानम्, कायचिकित्सा, शल्यचिकित्सा, कुमारभृत्यम्, वाजीकरण्म् इत्यादयः आयुर्वेदविषयाः आधुनिके अपि वैद्यशास्त्रे मूलविषयत्वेन परिगणिताः सन्ति।

नीतिशास्त्रम् - विदुरनीतिः, नारदनीतिः, कौटिल्यस्य अर्थशास्त्रम्, कामन्दकीयनीतिः, शुक्रनीतिः, बृहस्पतिनीतिः चेति प्रसिद्धाः नीतिशास्त्रग्रन्थाः संस्कृतवाङ्मये उपलभ्यन्ते। नीतिकथानां संग्रहरूपं विष्णुशर्मणा रचितं पञ्चतन्त्रं कथामाध्यमेन बालकानां मनांसि परिष्कर्तुं विद्याः प्रबोधयितुं च विविधनीतीः बोधयति। सोमदेवस्य कथासरित्सागरः, भर्तृहरेः नीतिशतकम् इत्यादयः नीतिशास्त्रग्रन्थाः संस्कृतभाषायां विराजन्ते।

खगोलशास्त्रम् - कालगणनाक्षेत्रे भारतीयखगोलशास्त्रं विश्वस्मिन् सुविख्यातं वर्तते। खं नाम आकाशः। गोलस्य तात्पर्यं भवति गोलाकाररूपम्। गोलरूपेण आकाशस्य चिन्तनं खगोलो भवति। महाभारते कालस्य सूक्ष्मतमस्य विभागः कृतो दृश्यते।

काष्ठा निमेषा दशपञ्च चैव त्रिंशत्तु काष्ठा गणयेत् कलां ताम्।
त्रिंशत्कलाश्चापि भवेन्मुहूर्तो भागः कलायाः दशमश्च यः स्यात्॥

सूर्यचन्द्रग्रहणविषये नक्षत्रविषये च खगोलशास्त्रे चिन्तनं विद्यते। गणितम्, संहिता, होरा इति ज्यौतिषशास्त्रस्य अध्ययनार्थं त्रयो विभागाः सन्ति। आर्यभट्ट-वराहमिहिर-भास्कराचार्य-ब्रह्मगुप्तादीनां ग्रन्थेषु खगोलविज्ञानस्य विषयाः निरूपिता विद्यन्ते।

भौतिकशास्त्रम् - पृथिवी-अप्-तेजो-वायु-आकाश-नामकानां पञ्चानां भूतानां चिन्तनं न्यायशास्त्रे वैशेषिकशास्त्रे च समभूत्। ऋग्वेदस्य १०.१२९ नासदीये सूक्ते वैश्विकसृष्टिमधिकृत्य सूक्ष्मम् ऋषिदृष्टं चिन्तनं प्रत्यक्षं भवति। अथर्ववेदस्य पृथिवीसूक्ते भूमेः अन्तर्वर्तिनां खनिजानाम्, महार्घवस्तूनां च विषये चिन्तनं समुपलभ्यते। वैशेषिकसूत्रेषु महर्षिः कणादः भौतिकशास्त्रस्य विविधमूलसिद्धान्तान् सूत्रेषु आबबन्ध। महर्षिः कणादः परमाणुवादम् उपास्थापयत्। तत्रैव विश्वनिर्माणस्य चिन्तनमपि द्रष्टुं शक्यते। महर्षेः कपिलस्य साङ्ख्यदर्शने सत्कार्यवादस्य चिन्तनं तथा विश्वनिर्माणस्य चिन्तनमपि प्रत्यक्षं द्रष्टुं शक्यते।

रसायनशास्त्रं लौहशास्त्रं च - प्राचीनकालतः सुवर्णम्, रजतम्, ताम्रम्, शीशम्, त्रपुः, अयः, इति नाम्ना नानाधातवः प्रसिद्धाः उपयोगे समानीताः आसन्। आभरणरूपेण क्रयविक्रयव्यवहारसाधनत्वेन च सुवर्णरजतयोः उपयोगिता पुरा एव आसीत्। आयुर्वेदे सुवर्णस्य औषधरूपेण प्रयोगः हृदयरोगनिवारणभस्मरूपेण प्रयोगश्च अस्माकं प्राचीनानां सुमहद् योगदानम्। माक्षिकस्य मधुनः औषधरूपेण औषधवाहकत्वेन प्रयोगः वैद्यकक्षेत्रे अस्माकं प्राचीनानां सुमहद् योगदानम्। राजप्रासादादीनां शस्त्रादीनाञ्च निर्माणे अयसः उपयोगः पुरा भवति। डामस्कस्-खड्गत्वेन प्रसिद्धस्य खड्गस्य, कुतुब-स्तम्बस्य च लोहेन निर्माणतन्त्रज्ञानं भारतीयानाम् अस्माकं योगदानमेव। सुवर्णस्य अग्नौ तापनेन शुद्धिकरणक्रमः, विविधानाम् आभरणानां निर्माणक्रमश्च तदानीन्तनस्य निर्माणतन्त्रज्ञानस्य पराकाष्ठां प्रकाशयति।

वस्त्रनिर्माणम् - मनुष्याणां शरीरं वस्त्रं विभूषयति। भारते वस्त्रनिर्माणपरम्परा आसृष्टेः प्रवर्तते। वेदे एव वस्त्रोल्लेखो वर्तते। महाभारते ऊर्ण-कार्पास-कौशेयादिवस्त्राणां वयनस्य वर्णनं तथा वस्त्ररञ्जनविधिः विद्यते। वस्त्राणां विविधवर्णैः रञ्जनार्थं तथा अद्भूतनिर्माणार्थं च विधयः संस्कृतग्रन्थेषु उक्ताः सन्ति।

विविधवस्तूनां निर्माणम् - संस्कृते भक्ष्य-भोज्य-चोष्य-लेह्य-आहार-भाण्ड-इष्टक-पात्र-शकट-सूचिका-आयुध-सुगन्धद्रव्यादीनां विविधानां मानवानां कृते आवश्यकानां वस्तूनां निर्माण-तन्त्रज्ञानं चिरकालात् प्रवर्तितं ज्ञानं च भारते आसीत्। विविधाः ते पदार्थाः वेदे एव उल्लेखिताः वर्तन्ते। तेषां तेषां जनोपयोगिनां ज्ञानानाम् उपदेशकाः ते सर्वे ग्रन्थाः संस्कृतभाषायाम् एव प्रणीताः आसन्। विविधानां मानवानां कृते आवश्यकानां वस्तूनां निर्माणविधयः संस्कृतग्रन्थेषु उक्ताः च आसन्। आयुर्वेदस्य नाना भक्ष्य-भोज्य-चोष्य-लेह्यानां प्रयोगः इदं प्रमाणयति।

विज्ञानविषयकं चिन्तनम् - वायुप्रवाहतः उत्पन्नम् ऊर्जः, सामुद्रम् ऊर्जः, सौरम् ऊर्जं च प्राचीनकाले परिगणितम् अभिज्ञातं च आसन्। भरद्वाजमहर्षेः यन्त्रसर्वस्वम्, अगस्त्यस्य शक्तिसूत्रम्, ईश्वरस्य सौदामिनीकला, भरद्वाजस्यैव अंशुमत्तन्त्रम्, शाकटायनस्य वायुतत्त्वप्रकरणं वैश्वमारुततन्त्रं च, नारदस्य धूमप्रकरणम् इत्यादीनां विज्ञानविषयकाणां ग्रन्थानामुल्लेखाः दृश्यन्ते। भोजस्य समराङ्गणसूत्रधारम्, शौनकमहर्षेः व्योमयानतन्त्रम्, गर्गस्य यन्त्रकल्पः, नारायणस्य विमानचन्द्रिका, वाचस्पतेः यानबिन्दुः, दुण्ढिनाथस्य व्योमयानार्कप्रकाशिका, चक्रायणिमुनेः केतुयानप्रदीपिका इत्यादयः नैके ग्रन्था अपि विज्ञानविषयका एव।

वास्तुविज्ञानम् - भारतीयैः मनीषिभिः वास्तुविज्ञानविषये गहनं चिन्तनं विहितमस्ति। राजप्रासादनिर्माणे गगनचुम्बिनां मन्दिराणां गोपुराणां च निर्माणे वा वास्तुविज्ञानस्य अन्वेषणं प्राचीनानाम् ऋषीणां सुमहद् योगदानं विद्यते। अजन्ता-एल्लोरा-कैलासनाथ-प्रम्बणन्-बोरबदूरु-अंकोरवाट्-आलयनिर्माणादिषु भारतीयवास्तुशास्त्रस्य सिद्धान्तानाम् अनुसरणं दृश्यते। इदानीन्तने समयेऽपि आधुनिकाः वास्तुकाराः नानाविधनिर्माणे अनेकान् वास्तुशास्त्रस्य सिद्धान्तान् विज्ञानानुगुणं संयोजयन्ति, जनानां विश्वासं च संवर्धयन्ति। निवासे सर्वविधशान्त्यर्थम् आरोग्यतायै च वास्तुशास्त्रस्य सिद्धान्तान् अनुयोजयन्ति। विविधयन्त्रशालासु यन्त्रादिस्थापनविषये वास्तुशास्त्रस्योपयोगो बहुधा दृश्यते।

इतिहासः पुराणानि च - महर्षिणा वाल्मीकिना विरचितं रामायणम् आदिकाव्यमिति सर्वैः ज्ञायते। महर्षिणा वेदव्यासेन प्रणीतं महाभारतम् अपरमैतिहासिकं काव्यमिति सुप्रसिद्धम्। अष्टादश पुराणान्यपि वेदव्यासेन महर्षिणा विरचितानि सन्ति। एतेषु अस्माकं देशस्य प्राचीनेतिहासस्य ज्ञानाय बहवः सामग्रयः उपलभ्यन्ते। राजभिः वशमानीताः नानाप्रदेशाः येषु भारतीया संस्कृतिः प्रचारे अवर्तत, राजवंशाः ये शासनम् अकुर्वन्, राजमार्गाः निर्मिताः, कुल्याः खाताः, सरांसि निर्मितानि इति च ज्ञानं महाभारतात्, पुराणेभ्यश्च ज्ञायते।

सर्वाणि इमानि वैज्ञानिकानि चिन्तनानि सर्वादौ संस्कृतभाषया एव ऋषिभिः प्रवर्तितानि, चिन्तितानि ग्रन्थरूपेण संदृब्धानि च तैः। तत् सर्वं ज्ञानं संस्कृतभाषया एव परम्परया अस्मान् प्राप्नोत्। तत् सर्वं ज्ञानम् अद्य वैज्ञानिकानां प्रयोगैः महिम्नः अतिशयं गच्छति। अतः संस्कृतभाषा, या भाषितभाषा, सा सर्वज्ञानमयी विराजते इति वक्तुं शक्यते।

शब्दार्थः

प्रवादः	उक्तिः
अपरिहार्यम्	अनिवार्यम्
खगोलः	व्योममण्डलम्
निरामयाः	व्याधिरहिताः
विरचय्य	प्रणीय
शल्यक्रिया	शस्त्रोपचारः
विपलम्	क्षणांशः
अनपायिनी	विकाररहिता/स्थिरा
स्रष्ट्री	सर्जनकर्त्री
पोषयित्री	भरित्री
गरीयसी	श्रेष्ठा
भूरिशः	बहवः
शेवधिः	निधिः
ललितकला	शृङ्गारानुगुणा कला
स्थापत्यवेदः	अथर्ववेदस्य उपवेदः
आबबन्ध	बन्धनम् अकरोत्
चोष्य	चोषणयोग्यम्/आम्रफलादि
भाषितभाषा	लौकिकभाषा
उदधिरिव	समुद्र इव
संदृब्धानि	संग्रथितानि
प्रववृते	प्रावर्तत
ऊर्जः	शक्तिः
सौदामिनी कला	तडित्कला
वशमानिताः	वशं संप्राप्ताः

अभ्यासः

१. **एकपदेन उत्तरं देयम् -**

(क) सर्वासु भाषासु प्राचीनतमा भाषितभाषा का ?

(ख) संस्कृतभाषा केषां शेवधिः आकरस्वरूपा विद्यते ?

(ग) उपासनायाः विज्ञानस्य च मूलं स्रोतः किम् ?

(घ) अथर्ववेदस्य उपवेदः कः ?

(ङ) कर्मोपासनामार्गाः कुत्र उपदिष्टाः वर्तन्ते ?

(च) परमाणुवादं कः उपास्थापयत् ?

२. **एकवाक्येन उत्तरत -**

(क) अपरमैतिहासिकं काव्यमिति केन प्रणीतं किन्नाम तस्य ?

(ख) संस्कृतभाषायाः वैशिष्ट्यं लिखत।

(ग) उपवेदाः केषां प्रेरकाः उद्बोधकाः वा समभवन् ?

(घ) स्वस्थयोः मनश्शरीरयोः कृते उपायाः कुत्रोल्लिखिताः सन्ति ?

(ङ) खगोलविदां केषाञ्चिद् आचार्याणां नामानि लिखत।

(च) महाभारतात् पुराणेभ्यश्च किं ज्ञायते ?

(छ) वेदः इति ग्रन्थः कथं न ?

३. **अधः प्रदत्तानां शब्दानां समासविग्रहौ विधेयौ -**

	विग्रहः	**समासः**
(क) भूमण्डलभाषासु	.....	.....
(ख) महर्षिसंस्कृतायाम्	.....	.....
(ग) सर्वव्यवहारेषु	.....	.....
(घ) ज्ञानविज्ञानयोः	.....	.....
(ङ) कालस्यगणनाक्षेत्रे	.....	.....
(च) वायुप्रवाहतः	.....	.....

४. **प्रकृतिप्रत्ययौ विभजत -**

	प्रकृतिः + **प्रत्ययः**
(क) वेदः	..... + ...

(ख) शक्यः ..... + ...

(ग) प्रकटितवन्तः ..... + ...

(घ) शेवधिः ..... + ...

(ङ) प्रदत्तः ..... + ...

(च) अन्वेष्टुम् ..... + ...

५. पर्यायपदानि लिखत -

(क) संस्कृतभाषा .....।

(ख) श्रुतिः .....।

(ग) खगोलशास्त्रम् .....।

(घ) विश्वः .....।

(ङ) वेदव्यासः .....।

६. अधोलिखितानां पदानां सन्धिविच्छेदपूर्वकं सन्धिसूत्राणि निर्दिशत -

	सन्धिविच्छेदः	सन्धिसूत्राणि
(क) यल्लिख्यते	..... + ...	.....
(ख) सर्वास्वपि	..... + ...	.....
(ग) नैकाः	..... + ...	.....
(घ) वेदस्याहुः	..... + ...	.....
(ङ) छन्दश्शास्त्रम्	..... + ...	.....
(च) प्रचारेऽवर्तत	..... + ...	.....

७. कोष्ठकाच्चित्वा शून्यस्थानं भरत -

महाभारतम्, नित्यः, नीतिशास्त्रग्रन्थाः, व्यवहारनिर्वाहाय, ज्योतिषशास्त्रस्य

(क) ..... भाषायाः अपरिहार्यावश्यकता विद्यते।

(ख) वेदः ..... इति कारणात् वेदस्य भाषा संस्कृतम्।

(ग) ..... संस्कृतवाङ्मये उपलभ्यन्ते।

(घ) गणितम्, संहिता, होरा इति ..... अध्ययनार्थं त्रयो विभागाः सन्ति।

(ङ) ..... अपरमैतिहासिकं काव्यमिति सुप्रसिद्धम्।

८. समुचितं योजयत -

(क)	धर्मार्थकाममोक्षाः	न्याय-वैशेषिक-साङ्ख्यादीनि
(ख)	ऋग्यजुःसामाथर्वाणः	बौद्धदर्शनम्
(ग)	चतुर्विधम्	चत्वारो वेदाः
(घ)	आस्तिकदर्शनानि	पुरुषार्थचतुष्टयम्
(ङ)	ऋग्वेदः	धनुर्वेदः
(च)	यजुर्वेदः	स्थापत्यवेदः
(छ)	सामवेदः	आयुर्वेदः
(ज)	अथर्ववेदः	गन्धर्ववेदः

९. कोष्ठकात् चित्वा तत्तत्सम्बद्धविषयान् लिखत -

सुवर्ण-रजत-ताम्रादयः, अर्थशास्त्र-नीतिशतक-पञ्चतन्त्रकर्तारः, आयुर्वेदशास्त्रज्ञाः, खगोलिविदः, भक्ष्य-भोज्य-चोष्य-लेह्यादयः।

(क) चरक-सुश्रुत-वाग्भट्टादयः .....।

(ख) कौटिल्य-भर्तृहरि-विष्णुशर्माणः .....।

(ग) आर्यभट्ट-वराहमिहिर-भास्कराचार्यः .....।

(घ) रसायनशास्त्रम् .....।

(ङ) विविधवस्तूनां निर्माणम् .....।

१०. रेखाङ्कितपदानुसारं कारकं निर्दिशत -

(क) संस्कृतं विश्वस्य प्राचीनतमा भाषा विद्यते।

(ख) अर्थगौरवाय सूत्ररूपेण प्रकटनमस्याः भाषायाः वैशिष्ट्यम्।

(ग) विश्वस्मिन् नाना रोगेभ्यो जनानां रक्षकत्वेन योगशास्त्रं विराजते।


(घ) नीतिशास्त्रग्रन्थाः संस्कृतभाषायां विराजन्ते।

(ङ) मनुष्याणां शरीरं वस्त्रं विभूषयति।

११. 'सर्वज्ञानमयी संस्कृतभाषा' इत्यधिकृत्य संस्कृतभाषया मातृभाषया वा स्वविचारान् प्रकटयत।

योग्यताविस्तरः

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश॥



वैदिकवाङ्मये वास्तुविज्ञानम्।

अन्तरा द्यां च पृथिवीं च यद् व्यचस्तेन शालां प्रति गृह्णामि त इमाम् ।

यदन्तरिक्षं रजसो विमानं तत् कृण्वेऽहमुदरं शेवधिभ्यः।

तेन शालां प्रति गृह्णामि तस्मै ॥

अथर्ववेद.९/३/१५

अथर्ववेदे गृहनिर्णाणाय शालायाः भूमिः शुद्धा भवेत्। सूर्यरश्मिभिः प्रकाशिता भवेत्। अहं भवत्याः कृते विभिन्नां प्रकोष्ठयुक्तां शालां निर्माय सुखेन निवसामि। एषा विमानयुक्तशाला सुखदायिनी भविष्यति ।

ऊर्जस्वती पयस्वती पृथिव्यां निर्मिता मिता ।

विश्वान्नं विभ्रती शाले मा हिंसीः प्रतिगृह्णतः॥

अथर्ववेद.९/३/१६

अथर्ववेदे ऊर्जस्वती इत्युक्ते (Cosmic Energy) पृथ्वी पश्चिमदिशातः पूर्वदिशायां भ्रमति तेन ऊर्जायाः प्रवाहः उत्तरध्रुवतः दक्षिणध्रुवपर्यन्तं प्रवहति । कोऽपि वस्तु अतिवेगेन भ्रमति तर्हि स्वतः एव ऊर्जायाः प्रवाहो जायते । तेन ऊर्जस्वति भवति । तस्याः भ्रमणेन ऊर्जा उत्तरदिशातः आरभ्य दक्षिणदिशायां प्रवहति । तेन कारणेन उत्तरदिशायाः अथवा पूर्वदिशायाः अथवा ईशानकोणस्य वास्तुशास्त्रे अधिकं महत्त्वं वर्तते।

या द्विपक्षा चतुष्पक्षा षट्पक्षा या निमीयते ।

अष्टपक्षां दशपक्षां शालां मानस्य पत्नीमग्निर्गर्भ इवा शये ॥

अथर्ववेद.९/३/२१

यथा गर्भावस्थायां उदरे शिशुः सुरक्षितो भवति । स सम्यक् विश्रान्तिं प्राप्नोति । यथा शरीरे जठराग्निः प्रज्वलति । यथा जठरे अग्निः प्रज्वलितो भूत्वाऽपि शरीरस्य हानिं नैव करोति, अपितु शरीरस्य पुष्टिं करोति तथैव मनुष्यैरपि द्विपक्षा चतुष्पक्षादि शाला निर्मातव्याः।

वैदिकवाङ्मये रसायनविज्ञानम् -

आधुनिकविज्ञानानुसारं रसायनविज्ञानस्य तिस्रः प्रमुखाः शाखाः सन्ति। यथा - भौतिकरसायनम्, अकार्वनिकं रसायनम्, कार्वनिकं रसायनं चेति। एतेषां विषये वेदेषु अपि

प्रमाणानि प्राप्यन्ते। यथा - भौतिकरसायने भौतिकजगतः उत्पत्तिविषयकं विवेचनं भवति, तथैव वेदेषु नासदीयसूक्त-पुरुषसूक्त-हिरण्यगर्भसूक्तानि सृष्ट्युत्पत्तिविषयकं वर्णनं प्रस्तौति। अकार्वनिकरसायनान्तर्गते धातुजरसायनस्य वर्णनं लभ्यते। अस्मिन् विषये वेदेऽपि धातूनां मिश्रणेन वस्तुविन्यासवर्णनं प्राप्यते। यथा -

हरिते त्रीणि रजसे त्रीणि अयसा त्रीणि तपसाविष्ठितानि।

अथर्ववेदः - ५.२८.१

गोपथब्राह्मणे एकेन धातुना अपरधातोः योजनस्य विधिः वर्णितोऽस्ति।

यथा - लवणेन सुवर्णं सन्दध्यात् सुवर्णेन रजतं रजतेन लोहं लोहेन सीसं सिसेन।

गोपथब्राह्मणं पूर्वभागः - १.१४

एतदतिरिच्य वेदेषु रजतशुद्धिः, लौहभेदः, धातुहननम्, क्षारनिर्माणादिकञ्च बहुविध-रासायनिक-प्रयोगोऽत्र वर्णिताः सन्ति।

त्रयोदशः पाठः

सहसा विदधीत न क्रियाम्

महाकविः भारविः शैवमतावलम्बी, प्रकाण्डपण्डितः, राजनीतिज्ञः, वीररसवर्णनकुशलः, अलङ्कृतशैल्याः प्रवर्तकः च आसीत्। महाकविभारविणा निजपरिवारस्य, निवासस्थानस्य पितुः, पितामहस्य, गुरोर्वा विषये कोऽप्युल्लेखो न कृतः किरातार्जुनीये। दण्डिविरचितम् अवन्तिसुन्दरीकथानुसारं कुशिकगोत्रीयः ब्राह्मणः आसीत् भारविः। स आनन्दपुरे निवसति स्म। ततः परं स वरारप्रान्तम् अचलपुरम् (एचिलपुरम्) आगत्य निवासम् अकरोत्। अस्मिन्नेव वंशे नारायणस्वामी जातः। तस्य पुत्र एव दामोदरः आसीत्। अयमेव 'दामोदरः' इति नाम्ना ख्यातः अभवत्। तत्र भारविविषयकः श्लोकः प्राप्यते। स यथा -

स मेधावी कविर्विद्वान् भारविः प्रभवां गिराम्।
अनुरुध्याकरोन्मैत्रीं नरेन्द्रे विष्णुवर्धने॥

इत्थं भारविः दण्डिनः प्रपितामहः आसीत्। तस्य स्थितिकालः ६०० ईसवीयसमीपे मन्यते। किरातार्जुनीयं महाकाव्यम् अनेनैव प्रणीतम्। किरातश्च अर्जुनश्च किरातार्जुनौ इति द्वन्द्वसमासः। 'तौ अधिकृत्य कृतं काव्यम्' इति विग्रहे "शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः" इति सूत्रेण छ-प्रत्ययेन 'किरातार्जुनीयम्' इति पदं सिध्यति। महाभारतमुपजीव्य विरचितमिदं महाकाव्यम्। अस्मिन् अष्टादश सर्गा विद्यन्ते। एतत् बृहत्त्रय्यां प्रथमस्थाने परिगणितम्। संस्कृतविद्वत्समाजे **'भारवेरर्थगौरवम्' नारिकेलफलसम्मितं वचो भारवेः, स्फुटता न पदैरपाकृता, सहसा विदधीत न क्रियाम्** इत्यादिनि आभणकानि सुप्रसिद्धानि एव। प्रस्तुतोऽयं पाठ्यांशः किरातार्जुनीयमहाकाव्यस्य द्वितीयसर्गात् सङ्गृहीतः।

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते॥ १॥

अन्वयः - अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ! तव गिरां विस्तरे, आदर्श इव विमला मतिः अभिदृश्यते।

भावार्थः - प्रमाणबाधारहितः सुष्ठु वाग्भिः विलसितः, श्रेयस्करो मङ्गलजनकः तव वचसि निर्मलः शुद्धः तव वाण्यां तादृश्येव विमला विशारदा मतिः अभिदृश्यते।

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।

वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः॥२॥

अन्वयः - क्रियां सहसा न विदधीत, अविवेकः आपदां परमं पदं हि विमृश्यकारिणं गुणलुब्धाः सम्पदः स्वयं वृणते।

भावार्थः - कार्यमचिन्तयित्वैव सहसा न कुर्वीत, कथञ्चिद् विवेकराहित्यम् आपदायाः परमं पदं विद्यते। विवेकपुरस्सरं कार्यं कर्तुं जनं गुणलुब्धो वैभवः स्वयमेव वृणुते।

अभिवर्षति योऽनुपालयन्विधिबीजानि विवेकवारिणा।

स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति॥३॥

अन्वयः - यः विधिबीजानि विवेकवारिणा अनुपालयन् अभिवर्षति सः फलशालिनीं क्रियां लोकः शरदम् इव अधितिष्ठति।

भावार्थः - यः जनः विधिबीजसदृशम् आत्मकर्तव्यं विवेकवारिणा प्रतीक्षमाणः संरक्षन्नभिषिञ्चति स जनः समृद्धफलं शरदृतावाप्नोति। तेनैव क्रमेण निरतं फलति समृद्धां क्रियां याति। तस्य कार्यं कदापि निष्फलं न सङ्गच्छते।

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्।

सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम्॥४॥

अन्वयः - मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनां सुकृतः परिशुद्ध आगमः दीप इव अर्थदर्शनं कुरुते।

भावार्थः - अन्धकारेण समः संशयेनाच्छादिते दुर्ज्ञेये कार्यानुष्ठाने विचारशीलानां जनानाम् अभ्यस्तं निश्चितं शास्त्रं दीपसदृशं यथार्थवस्तुनः दर्शनं कारयति।

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः।

विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः॥५॥

अन्वयः - स्पृहणीयगुणैः महात्मभिः चरिते वर्त्मनि मनः यच्छतां विधिहेतुः आगसां अहेतुः विनिपातः अपि समुन्नतेः समः।

भावार्थः - स्पृहणीयगुणैः = लोकश्लाघ्यैर्गुणैर्महात्मभिः साधुभिश्चरितेऽनुष्ठिते वर्त्मनि आचारे मनो यच्छतां पुरुषाणां दैविकानर्थोऽपि (अपराधयुक्तोऽनर्थोऽपि) समुन्नतेः तुल्यं भवति।

शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम्।

विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः॥६॥

अन्वयः - जिगीषवः विजितक्रोधरयाः गरीयसीम् अदूषितायतिं फलनिष्पत्तिं विगणय्य पौरुषं शिवम् औपयिकं नयन्ति।

भावार्थः - विजयेच्छवो राजानः क्रोधवेगं विजित्य गरीयसीम् अदूषितां प्रभूतां फलसिद्धिं विगणय्य = विचार्य पुरुषकारं पौरुषं शिवमनुकूलमुपायमाधारीकृत्य प्रयोगं विदधते।

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः।

अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते॥७॥

अन्वयः - उदेतुमिच्छता पुरः रोषमयं तिमिरं धिया अपनेयम् अंशुमता अपि प्रभया निशाकृतं तमः अविभिद्य न उदीयते।

भावार्थः - अभ्युदेतुमिच्छन् राजा प्राक् रोषमयं तिमिरं = क्रोधं धिया विवेकबुद्ध्या दूरं कुर्यात्। यथा भगवान् सूर्योऽपि तेजसा रात्र्यन्धम् अभित्त्वा नोदेति = भित्त्वैवोदेति इत्यर्थः।

बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः।

क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः॥८॥

अन्वयः - बलवान् अपि यः कोपजन्मनः तमसः अभिभवं नः रुणद्धि सः क्षयपक्षः सकलाः ऐन्दवीः कलाः इव शक्तिसम्पदः हन्ति।

भावार्थः - बलवाञ्छूरोऽपि यो नृपः क्रोधोत्पन्नम् अन्धकारं न नाशयति सः शूरोऽपि स्वस्य सकलं सामर्थ्यं वैभवञ्च नाशयति। यथा कृष्णपक्षः चन्द्रमसः षोडशकलां विनाशयति। अतः क्रोधोत्पन्नान्धकारो नाशयितव्य इत्यर्थः।

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम्।

अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः॥९॥

अन्वयः - यः समवृत्तिः समये मार्दवं तिग्मतां च तनोति सः मेदिनीपतिः विवस्वान् इव ओजसा लोकम् अधितिष्ठति।

भावार्थः - यः राजा समभावापन्नः सन् समये मृदुवृत्तित्वं तीक्ष्णवृत्तित्वञ्च आवश्यकतानुसारं तनोति, सः अधिपतिः सूर्यमिव स्वविक्रमेण आसंसारम् आक्रामयति, लोकमधितिष्ठति च। यथा रविरपि ऋतुभेदेन समवृत्तिं प्राप्नोति।

श्रुतमप्यधिगम्य ये रिपून्विनयन्ते न शरीरजन्मनः।

जनयन्त्यचिराय सम्पदामयशस्ते खलु चापलाशयम्॥ १०॥

अन्वयः - ये श्रुतम् अधिगम्य अपि शरीरजन्मनः रिपून् न विनयन्ते, ते अचिराय सम्पदां चापलाश्रयम् अयशः जनयन्ति खलु।

भावार्थः - ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनो देहप्रभवान् रिपून् कामक्रोधलोभादीन् न नियच्छन्ति, ते खलु अचिराय सम्पदाम् अस्थैर्यनिबन्धनम् अयशः दुष्कृतिं जनयन्ति।

उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः।

अनपायि निबर्हणं द्विषां न तितिक्षा सममस्ति साधनम् ॥ ११॥

अन्वयः - आयतेः भृशम् उपकारकं भूरिणः कर्मफलस्य प्रसवः अनपायि द्विषां निबर्हणं तितिक्षासमं साधनं नास्ति।

भावार्थः - भविष्यकालस्य भृशम् उपकारकं प्रभूतस्य कर्मफलस्य कारणं शत्रूणां विनाशकम् एवं गुणकं क्षमातुल्यं नान्यत् साधनम्।

शब्दार्थाः

अपवर्जितविप्लवे	प्रमाणबाधारहिते
सहसा	झटिति
गुणलुब्धाः	गुणानुरक्ताः
विधिबीजसदृशम्	विधिविधानसदृशम्
दुर्ज्ञेये	दुर्गमे
स्पृहणीयगुणैः	श्लाघ्यगुणैः
वर्त्मनि	मार्गे
दैविकानर्थः	अपराधयुक्तः
अविभिद्य	न विभिद्य
विवस्वान्	रविः
मेदिनीपतिः	चन्द्रमाः
समभावापन्नः	तुल्यभावयुतः

बहुच्छला	बहुव्यजा
समवृत्तिम्	समानवृत्तियुक्तः, तम्
श्रुतम्	शास्त्रम्
रोषमयम्	तिमिरमयम्
अभ्युदेतुम्	उदयस्येच्छा
अयशः	न यशः

अभ्यासः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) किरातार्जुनीयमहाकाव्यस्य रचयिता कः?

(ख) भारविः कस्य प्रपितामहः आसीत् ?

(ग) किरातार्जुनीयमहाकाव्ये कति सर्गाः सन्ति ?

(घ) महाकवेः भारवेः स्थितिकालः कः ?

(ङ) 'सहसा विदधीत न क्रियाम्' अस्याः पङ्क्तेः कोऽर्थः ?

(च) नारिकेलफलसम्मितं कस्य वचः ?

२. **रिक्तस्थानानि पूरयत -**

(क) ..... मङ्गलास्पदे।

(ख) .....यच्छतां मनः।

(ग) सहसा विदधीत .....।

(घ) ..... स्वयमेव सम्पदः।

(ङ) बलवानपि कोप.....।

(च) ..... मेदिनीपतिः।

(छ) श्रुतमप्यधिगम्य .....।

(ज) शिवमौपयिकं गरीयसी .....।

..... जिगीषवः ॥

३. समुचितं मेलनं कुरुत -

(अ)

(क)	कुमारसम्भवम्	माघः
(ख)	किरातार्जुनीयम्	कालिदासः
(ग)	नैषधीयचरितम्	भारविः
(घ)	शिशुपालवधम्	श्रीहर्षः

(आ)

(क)	कालिदासस्य	सन्ति त्रयो गुणाः
(ख)	भारवेः	पदलालित्यम्
(ग)	दण्डिनः	अर्थगौरवम्
(घ)	माघे	उपमा

४. अधोलिखितपदैः वाक्यनिर्माणं कुरुत -

(क) गिराम् .....।

(ख) कुर्वीत .....।

(ग) वर्त्मनि .....।

(घ) विगणय्य .....।

(ङ) दीयते .....।

(च) हन्ति .....।

(छ) सहसा .....।

५. कोष्ठके प्रदत्तानि पदानि चित्वा शून्यस्थानं पूरयत -

विमृश्यकारिणम्, पौरुषम्, कलाः, कर्मफलस्य, विवस्वान्

(क) विगणय्य नयन्ति ..... विजितक्रोधरया जिगीषवः।

(ख) मेदिनीपतिः ..... इव ओजसा लोकमधितिष्ठति।

(ग) सकला ऐन्दवीः ..... इव शक्तिसम्पदः हन्ति।

(घ) ..... गुणलुब्धाः सम्पदः स्वयं वृणते।

(ङ) उपकारकरमायतेर्भृशं प्रसवः ..... भूरिणः।

६. अधोलिखितानां शब्दानां समासनिर्देशपुरस्सरं विग्रहवाक्यं लिखत -

		विग्रहः	समासः
(क)	अपवर्जितविप्लवे	.....	.....
(ख)	अर्थगौरवम्	.....	.....
(ग)	विशेषसम्पदः	.....	.....
(घ)	अविवेकः	.....	.....
(ङ)	गुणलुब्धाः	.....	.....
(च)	प्रशमाभरणम्	.....	.....
(छ)	कृत्यविधौ	.....	.....
(ज)	अर्थदर्शनम्	.....	.....
(झ)	अहेतुः	.....	.....

७. मञ्जूषायां विद्यमानानां शब्दानां सन्धिविच्छेदपूर्वकं सन्धिसूत्रं लिखत -

		सन्धिविच्छेदः	सन्धिसूत्रम्
(क)	तथापि	.....	.....
(ख)	योऽनुपालयन्	.....	.....
(ग)	इवाधितिष्ठति	.....	.....
(घ)	भवत्यलङ्क्रिया	.....	.....
(ङ)	इवार्थदर्शनम्	.....	.....

८. प्रयोगपरिवर्तनं कुरुत -

(क) कार्यम् अचिन्तयित्वैव सहसा न कुर्वीत।

(ख) तस्य कार्येण कदापि निष्फलेन न सङ्गम्यते।

(ग) शास्त्रं दीपसदृशं यथार्थवस्तुनः दर्शनं कारयति।

(घ) रविरपि ऋतुभेदेन समवृत्तिं प्राप्नोति।

(ङ) अयशसा दुष्कृतिः जन्यते।

९. अधोलिखितानां श्लोकानां भावार्थं संस्कृतभाषया/मातृभाषया लिखत -

(क) सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणुते हि विमृश्यकारिणं गुणलब्धाः स्वयमेव सम्पदः॥

(ख) मतिभेदमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः कुरुते दीप दूवार्थदर्शनम्॥

योग्यता-विस्तारः

- हितं मनोहारि च दुर्लभं वचः
- न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।
- सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।
- स किं सखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किं प्रभुः।
- वरं विरोधोऽपि समं महात्मभिः।
- निरत्ययं साम न दानवर्जितम्।
- न भूरिदानं विरहय्य सत्क्रियाम्।
- गुणानुरोधेन विना न सत्क्रिया।
- अहो दुरन्ता बलवद्विरोधिता।
- तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः।
- व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
- अबन्ध्यकोपस्य विरहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।
- अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः।
- विचित्ररूपाः खलु चित्तवृत्तयः।
- परैरपर्य्यासितवीर्य्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम्।
- व्रजन्ति शत्रूनवधूय निःस्पृहाः समेन सिद्धिं मुनयो न भूभृतः।
- निराश्रया हन्त हता मनस्विता।
- अरिषु हि विजयार्थिनः क्षितीशाः विदधति सोपधि सन्धिदूषणानि।

चतुर्दशः पाठः

गोरक्षणम्

भारतसंविधानस्य राजनीतिनिर्देशकत्वेषु अन्यतमे अष्टचत्वारिंशत्तमे (४८) अनुच्छेदे गवाम्, वत्सानां दोह्यानाञ्च प्रजातीनां रक्षणाय निर्देशः प्रदत्तो वर्तते। संस्कृतसुभाषितेष्वपि गवां रक्षणाय निर्देशो दत्तोऽस्ति। न केवलमिदम्, तत्प्रजातीनां रक्षणं धार्मिकदृष्ट्या क्रियते। अपि तु राष्ट्रस्यार्थिक-विकासाय (न केवलानां प्रसूतिमवेहि मां कामदुहां प्रसन्नाम्। रघुवंशम् ११.६३), स्वास्थ्यदृष्ट्यापि गवां दोह्यानां तत्प्रजातीनाञ्च संरक्षणमावश्यकमिति संस्कृतसुभाषितेषु शास्त्रग्रन्थेषु चोच्यते। तद्यथोक्तम् -

अमृतं ह्यव्ययं दिव्यं क्षरन्ति च वहन्ति च।
अमृतायतनं चैताः सर्वलोकनमस्कृताः॥
तेजसा वपुषा चैव गावो वह्निसमा भुवि।
गावो हि सुमहत्तेजः प्राणिनां च सुखप्रदाः॥
बुद्धिमाकाङ्क्षता नित्यं गावः कार्याः प्रदक्षिणाः॥

सुदक्षिणादिलीपयोः नन्दिनीसेवामुद्दिश्य वसिष्ठोक्तः गोसेवाक्रमोऽत्र प्रास्तुत्यं भजते सुभाषितत्वात्, गोवंशनिर्वहणस्य तत्र काव्ये वर्णितत्वाच्च। तद्यथोक्तम् -

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः॥
प्रयातां प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि।

(रघुवंशम् - १.८९,९०)

अनुक्षणं नन्दिन्याः गोः आवश्यकताः पूरय, जलतृणादिदानेन रक्षय चेति रघुवंशे उक्तम्। तत्रैव द्वितीयसर्गे राजकृतां सेवामाह इत्थम् -

आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च।
अव्याहृतः स्वैरगतेः स तस्याः सम्राट्-समाराधनतत्परोऽभूत्॥

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।

जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥

अत्र श्लोकद्वयेन भारतीयपरम्परायां गोसेवा तद्रक्षणं च कथं करणीयमिति प्रकाशितमस्ति। 'तृणदानोपचाराभ्यां कपिलामपि पूजयेत्' इति सहस्रशः वर्षेभ्यः पूर्वं भारतात् सुदूरे आदिशता काम्बोजियादेशराजेन यशोवर्मणा गवां पालनेऽनुसरणीयो व्यवहारो निर्दिष्टः। अपि च गवां पालननिर्वहणविषये इत्थमुपदिष्टमस्ति -

सन्ताड्या न तु पादेन गवां मध्ये न च व्रजेत्।

मङ्गल्यायतनं देव्यः तस्मात्पूज्याः सदैव हि॥

प्रचारे वा निवाते वा बुधो नोद्वेजयेत गाः।

तृषिता ह्यभिवीक्ष्यन्त्यो नरं हन्युः सबान्धवम्॥

गोधनं राष्ट्रधनं हि विटपर्वण्युच्यते। गावः क्षीरेण, घृतेन च लोकं धारयन्ति, ताः कृषिकार्योपकारितया धान्यानि बीजानि च जनयन्ति, यज्ञयागादीन् जनाः घृताहुतिभिः प्रवर्तयन्ति। गाव एव मुनीनां धारणे प्रधानं कारणम्, क्षुत्तृष्णापीडिता बलीवर्दाः भारान् वहन्ति, ते बलीवर्दाः वस्तूनाम् आनयने प्रेषणे च सूक्ष्मपथेऽपि महदुपकुर्वन्ति। तदुक्तमनुशासनपर्वणि -

धारयन्ति प्रजाश्चैव पयसा हविषा तथा।

एतासां तनयांश्चापि पयसा हविषा तथा॥

जनयन्ति च धान्यानि बीजानि विविधानि च।

ततो यज्ञाः प्रवर्तन्ते हव्यं कव्यं च सर्वशः॥

पयो दधि घृतं चैव पुण्याश्चैताः सुराधिप।

वहन्ति विविधान् भारान् क्षुत्तृष्णापरिपीडिताः॥

वासवाकूटवाहिन्यः कर्मणा सुकृतेन च ।

मुनींश्चापि धारयन्तीह प्रजाश्चैवापि कर्मणा ॥

गावो महार्थाः पुण्याश्च तारयन्ति च मानवान्।

धारयन्ति प्रजाश्चेमाः हविषा पयसा तथा ॥

अत्र यज्ञयागयोः लोकोपकारित्वं मत्वा तत्करणमुपदिष्टमस्ति। यतो यज्ञयागादयः पर्जन्यकारणीभूता इति, उक्तञ्च गीतायाम् -

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः।

यज्ञाद्भवति पर्जन्यो यज्ञकर्मसमुद्भवः ॥

अत एव यज्ञयागयोः लोकोपकारित्वमुपस्थापितं वर्तते। एतादृशं प्रवर्तितं चक्रं यः उपघातयति सः अघायुरिति, मोघं स जीवति इति चात्र प्रतिपादितम्। अत एव एतादृशलोकव्यवस्थायाः सम्यगुपकल्पनं धारणञ्च राज्ञः निर्वाहकस्य च कर्तव्यम्।

आयुर्वेदग्रन्थे गव्यस्य महत्त्वमित्थमभ्यधायि -

गव्यं पवित्रं च रसायनं च पथ्यं च हृद्यं बलबुद्धिदं स्यात्।

आयुःप्रदं रक्तविकारहारि त्रिदोषहृद्रोगविषप्रदं स्यात्॥

एतादृशानां गवां संरक्षणम्, तासां राष्ट्रविकासे दयापूर्णदृष्ट्या योजनं च संस्कृत-सुभाषितेषूक्तरीत्या च भवेत्।

शब्दार्थाः

अमृतम्	पयः
अमृतायतनम्	अमृतस्वरूपाम्
वपुषा	शरीरेण
सर्वसुखप्रदा	सर्वफलप्रदात्री
वृद्धिमाकाङ्क्षता	वृद्धिं कामयता
निषण्णायाम्	उपविष्टायाम्
पीताम्भसि	पीतं जलं यया तस्याम्
कवलैः	ग्रासैः
अव्याहृतः	अकथितः
स्वैरगते	ध्वनिकृते
निषेदुषीम्	

सन्ताड्य	सम्पीड्य
मङ्गल्यायतनम्	मङ्गलस्वरूपाम्
निवाते	आश्रये/निवासे
तृषिता	पिपासिता
हविषा	हवनीयद्रव्येण
जनयन्ति	उत्पादयन्ति
कव्यम्	पितृभ्यो दीयमानं द्रव्यम्
गव्यम्	गोजनितं द्रव्यम्
बलबुद्धिदम्	बलबुद्धिदातृ/ओजोधिदातृ
त्रिदोषः	कफवातपित्तजनितदोषः
हृद्रोगः	हृदयसम्बद्धरोगः
बलीवर्दः	वृषभः

अभ्यासः

१. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -**

(क) भारतीयसंविधानस्य कतमेऽनुच्छेदे गोरक्षणमित्यस्य निर्देशो विद्यते ?

(ख) राष्ट्रस्यार्थिक-विकासाय कस्याः प्रजातेः संरक्षणमावश्यकम् ?

(ग) अमृतायतनस्वरूपाः काः सर्वलोकनमस्कृताः?

(घ) सर्वसुखप्रदा का ?

(ङ) तृणदानोपचाराभ्यां कां पूजयेत् ?

(च) तृषिता ह्यभिवीक्ष्यन्त्यो गावः कं हन्युः ?

(छ) बलबुद्धिदं किं भवति ?

२. **पूर्णवाक्येन प्रश्नान् समाधत्त -**

(क) गावः किमर्थं सदैव पूज्याः भवन्ति ?

(ख) गावो महार्थाः पुण्याश्च कान् तारयन्ति ?

(ग) काः हविषा पयसा च प्रजाः धारयन्ति ?

(घ) पर्जन्यादन्नसंभव इति कुत्र वर्णितम् ?

(ङ) धान्यानि विविधबीजानि च के धारयन्ति ?

(च) गव्यं कथं भवति ?

३. रिक्तस्थानानि पूरयत -

(क) अमृतं ह्यव्ययं .....नमस्कृताः ॥

(ख) गावो हि सुमहत्तेजः.....सर्वसुखप्रदा ॥

(ग) सन्ताड्या न तु .....व्रजेत्।

(घ) धारयन्ति ..... हविषा तथा।

(ङ) गव्यं पवित्रं च ..... विषप्रदं स्यात् ॥

४. श्लोकांशान् युङ्क्ष्व -

(क) तेजसा वपुषा चैव	प्राणिनाञ्च सुखप्रदा
(ख) गावो हि सुमहत्तेजः	बुधो नोद्वेजयेत गाः
(ग) प्रचारे वा निवाते वा	गावो वह्निसमा भुवि
(घ) तृषिता ह्यभिवीक्ष्यन्त्यो	पयसा हविषा तथा
(ङ) धारयन्ति प्रजाश्चैव	नरं हन्युः सबान्धवम्

५. अधोलिखितशब्दानां प्रकृतिप्रत्ययौ विविङ्क्ष्व -

	प्रकृतिः	प्रत्ययः
(क)	नमस्कृताः	..... + ...
(ख)	तृषिता	..... + ...
(ग)	रक्तविकारहारि	..... + ...
(घ)	गव्यम्	..... + ...
(ङ)	उक्तम्	..... + ...
(च)	कार्याः	..... + ...

६. प्रस्तुतानां शब्दानां सन्धिविच्छेदपूर्वं सन्धिसूत्राणि निर्दिशत -

		सन्धिविच्छेदः	सूत्राणि
(क)	अमृतायतनम्	..... + ...	.....
(ख)	चैताः	..... + ...	.....
(ग)	कवलैस्तृणानाम्	..... + ...	.....
(घ)	अन्वगच्छत्	..... + ...	.....
(ङ)	नोद्वेजयेत	..... + ...	.....
(च)	तनयांश्चापि	..... + ... + ...	.....
(छ)	प्रजाश्चैवापि	..... + ... + ... + ...	.....

७. अधोलिखितानां शब्दानां विग्रहवाक्यनिर्देशपुरस्सरं समासं लिखत -

		विग्रहः	समासः
(क)	संस्कृतसुभाषितेषु	.....	.....
(ख)	दंशनिवारणैः	.....	.....
(ग)	समाराधनतत्परः	.....	.....
(घ)	माङ्गल्यायतनम्	.....	.....
(ङ)	सर्वसुखप्रदाः	.....	.....

८. अधोलिखितक्रियापदानां लकार-पुरुष-वचनानि निर्दिशत।

		लकारः	पुरुषः	वचनम्
(क)	क्षरन्ति	.....	.....	.....
(ख)	आचरेः	.....	.....	.....
(ग)	पिबेः	.....	.....	.....
(घ)	व्रजेम	.....	.....	.....
(ङ)	पूरय	.....	.....	.....
(च)	धारयन्ति	.....	.....	.....
(छ)	हन्युः	.....	.....	.....
(ज)	प्रवर्तन्ते	.....	.....	.....

(छ)	तारयन्ति	.....	.....	.....
(ङ)	उपघातयति	.....	.....	.....
(ट)	पूजयथ	.....	.....	.....
(ठ)	भजेते	.....	.....	.....

९. अधोलिखितश्लोकस्थान् सुबन्त-तिङन्त-कृदन्त-तद्धितान्त-अव्यय-शब्दान् विभज्य यथाक्रमं स्थापयत

सन्ताड्या न तु पादेन गवां मध्ये न च व्रजेत्।
मङ्गल्यायतनं देव्यः तस्मात्पूज्याः सदैव हि॥
गव्यं पवित्रं च रसायनं च पथ्यं च हृद्यं बलबुद्धिदं स्यात्।
आयुःप्रदं रक्तविकारहारि त्रिदोषहृद्रोगविषप्रदं स्यात्॥
स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥

(क) सुबन्तः .....।
(ख) तिङन्तः .....।
(ग) कृदन्तः .....।
(घ) तद्धितान्तः .....।
(ङ) अव्ययम् .....।

योग्यताविस्तरः

अस्माकं भारतीयसंस्कृतौ गोः स्थानं महत्त्वपूर्णमस्ति। जनाः गां मातृरूपेण पूजयन्ति। वेदेष्वपि गां रुद्राणां माता, वसूनां पुत्री, अदितेः पुत्राणां भगिनी तथा च अमृततत्त्वस्य भाण्डारः इत्युक्त्वा सा अवध्या इति कथितम्। यथा -

माता रुद्राणां दुहिता वसूनां स्वसाऽऽदित्यानाममृतस्य नाभिः।
प्र नु वोचं चिकितुषे जनाय मा गामनागामादितिं वधिष्ट॥

ऋग्वेदः - ८.१०१.१५

पुनश्च अथर्ववेदस्य एकस्मिन् मन्त्रे उद्धृतमस्ति यत् ते गावः नष्टाः न भवन्तु, चौराः न चोरयन्तु, शत्रवः कष्टं न प्रयच्छन्तु च। यथा -

न ता नशन्ति न दभाति तस्करो नासामामित्रो व्यथिराः दधर्षति।
देवांश्च याभिर्यजते ददाति च ज्योतित्ताभिः सचते गोपतिः सह॥

अथर्ववेदः - ४.२१.३

एवं प्रकारेण वेदे गवाम् अस्माकं सर्वोत्कृष्टं धनम् इत्युक्त्वा इन्द्रादिदेवानां सम्मुखे गोधनं प्राप्तुं कामना वर्तते। यथा -

गावो भगो गाव इन्द्रो म इष्टद्रावः सोमस्य प्रथमस्य भक्षः।
इमा या गावः स जनास इन्द्र इच्छामि हृदि मनसा चिदिन्द्रम्॥

अथर्ववेदः - ४.२१.५

एवमेव अथर्ववेदे गोरक्षणविषये बलं प्रदाय कथितमस्ति हे गौ ! त्वं बहु सन्ततिना युक्ता भव। भवत्याः कृते सुमधुरं भोजनं जलञ्च अस्मिन् संसारे भवतु। तथा च भवत्याः रक्षां सदैव रुद्रस्य शस्त्राणि कुर्वन्तु। यथा -

प्रजावती सूयवसे रुशन्ति शुद्धा अपः सुप्रापणे पिबन्तीः।
मा व स्तेन ईशत माघशंसः परि वो रुद्रस्य हेतिर्वृणक्तु॥

अथर्ववेदः - ४.२१.७

अनेन प्रकारेण अथर्ववेदस्य तृतीयकाण्डस्य चतुर्दशसूक्तं गोष्ठसूक्तनाम्ना अभिहितम्। यस्मिन् गवाम् उपयोगः तासां महत्ताविषये च स्पष्टरूपेण उल्लेखः प्राप्यते। यथा -

सं वो गोष्ठेन सुषदा सं रय्या सं सुभूत्या।
अहर्जातस्य यन्नाम तेना वः सं सृजामसि॥१॥

सं वः सृजत्वर्यमा सं पूषा सं बृहस्पतिः।
समिन्द्रो यो धनंजयो मयि पुष्यत यद्वसु॥२॥
संजग्माना अबिभ्युषीरस्मिन्गोष्ठे करीषिणीः।
बिभ्रतीः सोम्यं मध्वनमीवा उपेतन॥३॥

इहैव गाव एतनेहो शकेव पुष्यत।
इहैवोत प्र जायध्वं मयि संज्ञानमस्तु वः॥४॥
शिवो वो गोष्ठो भवतु शारिशाकेव पुष्यत।
इहैवोत प्र जायध्वं मया वः सं सृजामसि॥५॥
मया गावो गोपतिना सचध्वमयं वो गोष्ठ इह पोषयिष्णुः।
रायस्पोषेण बहुला भवन्तीर्जीवा जीवन्तीरुप वः सदेम॥६॥

अथर्ववेदः - ३.१४.१-६

पञ्चदशः पाठः

भारतीयाः प्राचीनाः वैज्ञानिकाः

'विशेषेण ज्ञायते अनेन' इत्यस्मिन्नर्थे 'वि' इत्युपसर्गपूर्वात् 'ज्ञा अवबोधने' इत्यस्मात् धातोः "करणाधिकरणयोश्च" इति सूत्रेण ल्युटि प्रत्यये 'विज्ञानम्' इति शब्दो व्युत्पन्नोऽस्ति। 'विज्ञानमधीते विज्ञानं वेत्ति वा' इत्यस्मिन्नर्थे विज्ञानशब्दात् ठक्-प्रत्यये 'वैज्ञानिकः' इति शब्दो निष्पद्यते। विज्ञानस्य परिभाषा शास्त्रेषु इत्थं भणिता -

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।

अमरकोशः - १/५/६

अमरकोशानुसारं शिल्पादिविषयकं ज्ञानं विज्ञानम् इत्युच्यते।

चतुर्दशानां विद्यानां धारणं हि यथार्थतः।
विज्ञानमितरं विद्याद्येन धर्मो विवर्धते॥

इति च कूर्मपुराणे -

भारतवर्षे प्राचीनकालतः ज्ञानविज्ञानयोः सुदीर्घा परम्परा वरीवर्ति। सुप्रसिद्धा आधुनिका वैज्ञानिकाः यथा - श्री जगदीशचन्द्रवसुः, श्री हरगोविन्दखुराना, श्री प्रफुल्लचन्द्र रायः, श्री सत्येन्द्रनाथवसुः, श्री सि.वि.रमणः, श्री श्रीनिवासरामानुजः, श्री शान्तिस्वरूपभटनागरः, श्री ए.पी.जे.अब्दुलकलामः, श्री अनिलकाकोडकरः, श्री सि.एन्. आर्. रावः, श्री एम.एस् स्वामिनाथः, श्री सुब्रह्मण्यं चन्द्रशेखरः, श्री वेङ्कटरामन् रामकृष्णन्, श्री अग्निव्रतनैष्ठिकः इत्यादीनां वैज्ञानिकानां विषये वयं जानीमः। यथा अद्यत्वे वैज्ञानिकाः नानाविधान् आविष्कारान् कृतवन्तः तथा पुराकाले अपि वैज्ञानिकाः, संशोधकाश्च बहवः अजायन्त, ते नानाविधेषु विषयेषु नैकान् आविष्कारान् चक्रुः, अनेकान् विज्ञानविषयसंवलितान् ग्रन्थांश्च समदृभन्। तेषु केषाञ्चन वैज्ञानिकानां सामान्यः परिचयः पाठेऽस्मिन् प्रस्तूयते। इह प्राचीनानां वैज्ञानिकानां योगदानस्य ज्ञानेन परिचयेन च विद्यार्थिनः प्रेरणामवाप्य नवीनतथ्यानाम् उन्मोचने दत्तमनस्का भवेयुः।

आर्यभट्टः

एको महान् गणितज्ञः, ज्योतिर्विद् च आर्यभट्टो बभूव। षड्भत्युत्तरचतुश्शततमे वर्षे (४७६) मगधदेशे आर्यभटो जनिमलभत इति तेनैव प्रणीते 'आर्यभटीयम्' इत्याख्ये ग्रन्थे उल्लेखोऽस्ति।

अयं वैज्ञानिकः त्रयोविंशे वयसि एव आर्यभटीयं विरचयामास। ग्रन्थेऽस्मिन् महासंख्या अपि अक्षरैः, शब्दैः वा कथं सङ्ग्रहेण लेखितव्या इति विषयो वर्ग-घनमूल-त्रिभुजादिगणितविषयाः, कालविभाग-नक्षत्रगति-भगण-भूभ्रमण-दिनरात्र्यादिविषयाः चापि विस्तृतया विवेचिता वर्तन्ते। अयं शून्याविष्कारेण जगति प्रसिद्धिम् अवाप्नोत्। अद्य यद् वयं शून्यम् इति प्रयुञ्महे तद् आर्यभटीयं गणनाविषयकं योगदानम् अस्ति।

वराहमिहिरः

वराहमिहिरः प्रसिद्धः वेदज्ञः, ज्यौतिषिकः गणितज्ञश्च आसीत्। अयं उज्जयिनीसमीपे कपित्थके (कायथा) ग्रामे अजायत। स पितुः आदित्यदासाद् गणितं ज्योतिषशास्त्रं च अधिजगे। वराहमिहिरेण बृहत्संहिता, बृहज्जातकम्, लघुजातकम्, पञ्चसिद्धान्तिका इति ग्रन्थाः प्रणीताः। एतेषु ग्रन्थेषु अनेन न केवलं खगोलज्ञानम् उपादिशत्, अपि तु भूमेः गोलत्वम्, गुरुत्वाकर्षणसिद्धान्तम्, पर्यावरणविज्ञानम्, जलविज्ञानम्, उदकार्गलविज्ञानम्, भूविज्ञानमपि सविस्तरं प्रत्यपादयत्। जम्बूप्रभृतयः पादपाः वल्मीकाश्च भूमेः अन्तस्थं जलं प्रदर्शयन्ति इति अस्य महर्षेः वचनमस्ति। पञ्चसिद्धान्तिकायां वराहमिहिरेण पूर्वकाले प्रचलितानां पञ्च सिद्धान्तान् पितामह-पौलिश-रोमक-वसिष्ठ-सूर्य-सिद्धान्तान् आश्रित्य विस्तृतं विवरणं प्रदत्तमस्ति। समयमापकस्य घटीयन्त्रस्य निर्माणे, वेधशालानिर्माणे च अस्य महद् योगदानं वर्तते। अद्यतनी पास्कलत्रिकोणमितिः वराहमिहिरस्य त्रिकोणमितिम् अनुगच्छति। बृहत्संहितायां वास्तुविद्याम्, भवन-निर्माणम्, वायुमण्डलम्, मेघलक्षणम्, वृष्टिविज्ञानम्, मुहूर्तविज्ञानम्, वृक्षायुर्वेदं च अधिकृत्य विशिष्टं वैज्ञानिकं चिन्तनं विहितम्। आधुनिकानां वैज्ञानिकानां कृते अपि अस्य अनेके सिद्धान्ताः अद्यापि प्रेरकाः सन्ति।

महर्षिः कणादः

प्रसिद्धः वैज्ञानिकः महर्षिः कणादः वैशेषिकसूत्राणि व्यरचयत्। ईसवीयवर्षतः ५०० वर्षेभ्यः पूर्वं परमाणुः, द्व्यणुकम्, त्र्यणुकम्, ततश्च उत्पत्तिप्रक्रियायाम्, परमाणुः एव सूक्ष्मतमः भागः इति च व्याचख्यौ। वेगसिद्धान्तम्, गतिसिद्धान्तं च प्रतिपादितवान्। अयं महर्षिः पृथिव्याः गुरुत्वाकर्षणशक्तेः अन्वेष्टा अस्ति।

महर्षिः अथर्वा

अग्निः सर्वेषां विज्ञानाविष्काराणां मूलम् अस्ति। आधुनिकस्य भौतिकशास्त्रस्य, रसायनशास्त्रस्य, लौहशास्त्रस्य अन्येषां विज्ञानानां च प्रयोगमूलम् अग्निः एव। अग्निवायुजलजनिताभिः शक्तिभिः चालितानि यन्त्राणि आधुनिकयुगस्य मानकानि सन्ति। तादृशस्य अग्नेः प्रथमः द्रष्टा अस्ति महर्षिः अथर्वा। "त्वामग्ने पुष्करादध्यथर्वा निरमन्थत् (ऋग्वेदे ६.१६.१३)। अथर्वा त्वा प्रथमो निरमन्थदग्ने" इत्थं वेदमन्त्रश्रवणात्।

महर्षिः भृगुः

महाभारतस्य शान्तिपर्वणः १८४ तमे अध्याये महर्षेः भारद्वाजस्य भृगोः च संवादे भृगुः भारद्वाजस्य कृते उत्तरं प्रददाति यद् वृक्षाः न चैतन्यविहीनाः, ते चैतन्यवन्त एव, तेषु जीवं वयं पश्याम इति च। महर्षिः चरकः अपि 'तच्चेतनावद् चेतनञ्च' इति आह। तदुक्तम् -

सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात्।
जीवं पश्यामि वृक्षाणां चैतन्यं न विद्यते॥ इति।

भृगोः सिद्धान्तेन सदृशतया वृक्षाणां चैतन्यविषये प्रयोगशालासु प्रयोगाः कृताः। जगदीशचन्द्रबसुमहोदयेन नोबेलपुरस्कारः लब्धश्च। अतः महर्षेः भृगोः चिन्तनस्य महत्त्वं वयं ज्ञातुं शक्नुमः॥

महर्षिः चरकः

महर्षिः चरकः जगति वैद्यशास्त्रविद् विविधरोगाणाम् औषधानां च अभिज्ञ इति लब्धख्यातिः वर्तते। महर्षिः चरकः चिकित्सायाः विधानानि वैद्यकशास्त्रे चरकसंहितायां न्यरूपयत्। असौ अग्निवेशाद् गुरोः प्राप्तं वैद्यज्ञानं वैद्यशास्त्रसंहितायां समायोजयत्। सा च 'चरकसंहिता' इति नाम्ना प्रसिद्धिम् अवाप। अत्र विंशत्युत्तरैकशतम् (१२०) अध्यायाः, अष्टौ स्थानानि च सन्ति। सूत्र-निदान-विमान-शरीर-इन्द्रिय-चिकित्सा-कल्प-सिद्धिस्थानाख्यानि अष्टौ सन्ति विभागाः। तत्र कर्णसम्बद्धाः, नेत्रसम्बद्धाः, नासिकासम्बद्धाः, मुखसम्बद्धाः, कण्ठसम्बद्धाः च रोगाः तथा बालानां रोगाणां चिकित्सा (कौमारभृत्यम्), पुनरुज्जीवनम्, द्रव्यगुणवैद्यविज्ञानम्, वाजीकरणम् इत्येते चिकित्साविषयाः सन्ति। महर्षिचरकः पञ्चविंशतिविधान् (२५) ज्वरान्, उदरस्य बहुविधान् रोगान्, कामलारोगम्, मूत्रसम्बद्धान् रोगान्, मधुमेहम्, कुष्ठरोगम्, श्वासकोशस्य क्षयरोगम्, हृदयसम्बद्धान् रोगांश्च अवर्णयत्।

महर्षिः सुश्रुतः

महर्षिरयं शल्यचिकित्सायाः जनकत्वेन जगति प्रख्यातः वर्तते। 'सुश्रुतसंहिता' इति अधुना प्रसिद्धम्, धन्वन्तरेः सकाशात् प्राप्तं ज्ञानं ग्रन्थे विलिख्य तत्र शस्त्रचिकित्साविधानम् अवोचत्। अत्र सूत्र-निदान-शारीर-चिकित्सा-कल्पस्थानाख्यानि पञ्च सन्ति विभागाः, १२० अध्यायाश्च। अत्र शल्यक्रियार्थं महर्षिः पञ्चविंशत्यधिकैकशतम् (१२५) उपकरणानि निरदिशत्, तानि प्रायुङ्क्त च शल्यक्रियायाम्। शवच्छेदनेन सह शस्त्रक्रियाभ्यासः भवति स्म। महर्षिः सुश्रुतः त्रिशताधिकानां शल्यक्रियाणाम् उपदेशं कृतवान्। नासिकासन्धानशल्यक्रियायाः प्रमाणानि च उपलभ्यन्ते।

आचार्यः पालकाप्यः

आचार्यः पालकाप्यः हस्त्यायुर्वेदस्य कर्ता। हस्त्यायुर्वेदः गजशास्त्रम् इति पालकाप्यमुनिना प्रणीतौ प्राचीनतमौ ग्रन्थौ स्तः। ऋषयः समस्तानां प्राणिनां कल्याणं मनसि निधाय ज्ञानं विज्ञानं च आविश्चक्रुः। पशुषु रोगाणां दूरीकरणाय, मनुष्याणां कृते आयुर्वेद इव पशूनां कृते अपि चिकित्सा उपदिष्टा ऋषिभिः। हस्त्यायुर्वेदः अत्र चिकित्साक्रमे महत्त्वपूर्णः वैद्यशास्त्रग्रन्थः विद्यते। तत्र ग्रन्थे गजानां वयः, तेषु जलवायुप्रभावः, तेषां स्वभावः, तेषु उत्पन्ना विकाराः, विकारकारणानि, लक्षणानि, ३१५ सङ्ख्याकाः हस्तिरोगाः, तेषाम् उपचारः, औषधनिर्माणप्रक्रिया च वर्णिता विद्यन्ते। हस्त्यायुर्वेदः हस्तिनां शरीर-विज्ञानम्, हस्तिनां शल्यक्रियाविज्ञानं च अस्ति। हस्त्यायुर्वेदसंहितायां चत्वारः खण्डाः षष्ट्युत्तरैकशतम्(१६०) अध्यायाः, द्वादश सहस्रं श्लोकाः च सन्ति। सहदेवो गवायुर्वेदम्, शालिहोत्रः अश्वायुर्वेदं च प्रणिन्यतुः। आधुनिक-कालिकस्य "वेटेरनेरी सायन्स" (पशुचिकित्साविज्ञानम्) इत्यस्य पूर्वभावि इदं हस्त्यायुर्वेदविज्ञानं भारतीयानाम् ऋषीणां मूलभूतं चिन्तनं प्रस्तौति।

महर्षिः भरद्वाजः

वायुप्रवाहतः समुद्भूतम् ऊर्जः, सौरम् ऊर्जः, इतरेन्धनोर्जः च उपयुज्य सञ्चार्यमाणानि रथादीनि तदा आसन्। भरद्वाजमहर्षेः 'यन्त्रसर्वस्वम्', 'अंशुमत्तन्त्रं' च इत्येतौ द्वौ ग्रन्थौ यन्त्रशास्त्रसम्बद्धौ स्तः। महर्षिणा भरद्वाजेन ग्रन्थद्वयेऽस्मिन् यन्त्राणां विषये बहुविधा नियमाः वर्णिताः सन्ति। आत्रेय-पुनर्वसवे कायचिकित्सां महर्षिः भरद्वाजः उपदिदेश इति चरकसंहितायाम् उल्लेखो वर्तते।

मुनिः पाराशरः

वृक्षायुर्वेदः इति कृषिपाराशरः इति वा प्रसिद्धं वैज्ञानिकं कृषिशास्त्रं महामुनिः पाराशरः रचयामास। अस्मिन् पुस्तके षड्काण्डाः सन्ति (१) बीजोत्पत्तिकाण्डम् (२) वानस्पत्यकाण्डम् (३) गुल्मकाण्डम् (४) वनस्पतिकाण्डम् (५) वीरुत्-वल्लीकाण्डम् (६) चिकित्साकाण्डम् इति च। सम्पूर्णस्य कृषिविज्ञानस्य वैज्ञानिककृषिपद्धतेः च सुविस्तृतं चिन्तनम् अस्मिन् ग्रन्थे उपलभ्यते। प्रथमे अध्याये बीजोत्पत्तिनामके महर्षिः पाराशरः बीजाद् वृक्षपर्यन्तं विस्तृतिप्रक्रियां प्रास्तौत्। तथा हि -

आपो हि कललं भूत्वा यत् पिण्डस्थानकं भवेत्।
तदेवं व्यूहमानत्वात् बीजत्वमधिगच्छति॥ इति

कृषिपाराशरग्रन्थस्य प्रेरणया उपवनविनोदादयः सस्यविज्ञानस्य कृषिविज्ञानस्य च ग्रन्थाः संरचिताः अभूवन्।

भास्कराचार्यः

भास्कराचार्यः प्राचीनभारतस्य सुप्रसिद्धः एकः गणितज्ञः ज्यौतिषिकश्च आसीत्। अनेन विरचितः प्रधानो ग्रन्थो भवति सिद्धान्तशिरोमणिः इति। यत्र लीलावती, बीजगणितम्, ग्रहगणितम्, गोलाध्यायः चेति एते चत्वारो भागाः सन्ति। एषु चतुर्षु भागेषु अङ्कगणितम्, बीजगणितम्, ग्रहगतिगणितम्, गोलसम्बद्धं गणितं च सम्यक् चिन्तितानि वर्तन्ते।

नागार्जुनः

असौ रसायनशास्त्री इति धातुविज्ञानविद् इति च विश्वस्मिन् विश्वे प्रसिद्धिमवाप्तवान्। रसरत्नाकरः, जीवसूत्रम्, रसवैशेषिकसूत्रम्, योगशतकम्, कक्षपुटः, योगरत्नमाला च इमे ग्रन्थाः नागार्जुनेन प्रणीताः। अस्य जन्म एकत्रिंशदुत्तरनवशततमे(९३१) वर्षे सौराष्ट्रस्य सोमनाथस्य निकटं दैहकनामके दुर्गे बभूव। अयं रसायनप्रक्रियायाः कृते आवश्यकानि यन्त्राणि - कोष्ठिकायन्त्रम्, वक्रनालम्, गर्भयन्त्रम्, लौहपत्रम् आदीनाम् उपयोगम् अकरोत्। पारदस्य औषधरूपेण प्रयोगः सर्वप्रथमं भारत एव समभूदिति तु विशेषः।

बोधायनाचार्यः

आचार्यः बोधायनः भारतवर्षस्य प्राचीनेषु गणितज्ञेषु अन्यतमः, बोधायनशुल्बसूत्रस्य बोधायनश्रौतसूत्रस्य च प्रणेता बभूव। भारतीयरेखागणितज्ञो बोधायनाचार्यो ज्यामितेः

महत्त्वपूर्णान् नियमान् प्रत्यपादयत्। रेखागणितज्ञरूपेण अयमाचार्यः आविश्वं ख्यातिं लेभे। बोधायनस्य शुल्बसूत्रेषु यज्ञकुण्डनिर्माणे रेखागणितानुसारं रज्जुप्रयोगो दृश्यते। बोधायनश्रौतसूत्रे श्रुत्युक्तकर्मणां चिन्तने वैज्ञानिकानि चिन्तनानि दृश्यन्ते।

अन्ये विज्ञानग्रन्थरचयितार आचार्याः

भृगुशिल्पसंहितायां षोडशानां विज्ञानविषयाणां चतुष्षष्टेः प्रौद्योगिकीसम्बद्धानां च विषयाणाम् उल्लेखो विद्यते। 'कश्यपशिल्पम्' इति शिल्पशास्त्रसम्बद्धो ग्रन्थो विद्यते। अन्येषु विश्वकोशे, मेदिनीकोशे, अमरकोशे, शंखस्मृतौ, शिल्पदीपिकायाम्, वास्तुराजवल्लभे, मयमते, मानसारे, अपराजितपृच्छायाम्, समराङ्गणसूत्रधारे, कश्यपसंहितायाम्, शिग्रु, सौरसूक्ते, नरपतिजयचर्योदये, मनुष्यालयचंद्रिकायाम्, राजगृहनिर्माणे, दुर्गविधाने, युद्धजयार्णवे, शार्ङ्गधरपद्धतौ, मानसोल्लासे, बसवभूपालीय-शिवतत्त्वरत्नाकरे, रत्नपरीक्षायाम्, लोहार्णवे, धातुकल्पे, लोहप्रदीपे, महावज्रभैरवतन्त्रे, पाषाणविचारे च विविधा विज्ञानविषयाः विज्ञानवेत्तृभिराचार्यैः योजिताः सन्ति।

इत्थं नैके विज्ञानविदः ऋषयः आचार्याश्च नानाविधेषु विषयेषु अन्वेषणं विधाय बहून् विज्ञानग्रन्थान् प्रणिन्युः। ते सर्वे ग्रन्थाः संस्कृतभाषया एव विरचिताः आसन्। ईदृशा ग्रन्था अद्यत्वेऽपि अनुसन्धातॄन् वैज्ञानिकान् भृशं प्रेरयन्ति। तेषां ग्रन्थानाम् अध्ययनेन भारतीया विज्ञानपरम्परा विज्ञानक्षेत्रे भारतीयानाम् ऋषीणां योगदानं च ज्ञायते।

विद्यार्थिनः आचार्याणां मार्गनिर्देशनेन भारतीयविज्ञानविषयान् तद्रचितान् ग्रन्थांश्च सुष्ठु अधीत्य, तान् विचारान् प्रयोगपथं नीत्वा च समाजस्य राष्ट्रस्य च विकासाय वैज्ञानिकतथ्यानामन्वेषणाय च अग्रेसराः स्युः।

शब्दार्थाः

वरीवर्ति	अतिशयेन भवति
ज्योतिर्विद्	ज्योतिषं जानाति यः
विचारयामास	विचारम् अकरोत्
प्रयुञ्महे	प्रयोगं कुर्मः
अवाप्नोत्	प्राप्तवान्
ज्यौतिषिकः	ज्योतिषज्ञः

अजायत	जन्म लब्धवान्
अधिजगे	अधीतवान्
उपादिशत्	उपदिष्टवान्
प्रत्यपादयत्	प्रतिपादितवान्
मानकानि	प्रमाणानि
चैतन्यवन्तः	चेतनायुक्तः
वैद्यशास्त्रवित्	वैद्यः
न्यरूपयत्	निरूपितवान्
निरदिशत्	निर्दिष्टवान्
प्रायुङ्क	प्रयोगं कृतवान्
आविश्चक्रुः	आविष्कारम् अकुर्वन्
सञ्चार्यमाणानि	उड्डीयमानानि
गुल्मकाण्डम्	लताविषयकम्
प्रास्तौत्	प्रस्तुतवान्
मयमते	मयदानवस्य मते
प्रणिन्युः	रचितवन्तः

अभ्यासः

१. **अधोलिखिताः प्रश्नाः संस्कृतभाषया समाधेयाः -**

(क) वैज्ञानिकः इति शब्दः केन प्रत्ययेन निष्पद्यते ?

(ख) अग्नेः प्रथमः द्रष्टा कः कुत्र च उल्लिखितः ?

(ग) वृक्षाणां चैतन्यविषये केन उक्तं कुत्र च प्रयोगाः कृताः?

(घ) वैषेशिकसूत्राणि कः व्यरचयत् ?

(ङ) प्राचिनवैज्ञानिकः दैवज्ञश्च कः आसीत् ?

२. पूर्णवाक्येन उत्तरं देयम् -

(क) शून्यस्य आविष्कारेण जगति प्रसिद्धिं कः आप्नोत् ?

(ख) शल्यचिकित्सायाः जनकः कः ?

(ग) चरकसंहितायां कति स्थानानि सन्ति ? तानि च कानि ?

(घ) हस्त्यायुर्वेदं कः प्रणिनाय ?

(ङ) बीजाद् वृक्षपर्यन्तं विस्तृतिप्रक्रियां कः प्रास्तौत् ?

(च) सिद्धान्तशिरोमणौ कति भागाः सन्ति ? के च ते ?

(छ) रसायनशास्त्री कः उच्यते ?

३. प्रस्तुतानां शब्दानां सन्धिविच्छेदपूर्वं सन्धिसूत्राणि निर्दिशत -

		सन्धिविच्छेदः	सूत्राणि
(क)	इत्यस्मिन्नर्थे	..... + ... + ...	.....
(ख)	धर्मो विवर्धते	..... + ...	.....
(ग)	ग्रन्थेऽस्मिन्	..... + ...	.....
(घ)	आविश्चक्रुः	..... + ...	.....
(ङ)	ग्रन्थांश्च	..... +.....	.....
(च)	बीजोत्पत्तिः	..... + ...	.....
(छ)	पञ्चविंशत्यधिकैकशतम्	..... + ... + ...	.....

४. शून्यस्थानं पूरयत -

(क) बोधायनस्य ..... रेखागणितानुसारं रज्जुप्रयोगः दृश्यते।

(ख) नागार्जुनः रसायनप्रक्रियायाः ..... आदीनाम् उपयोगम् अकरोत्।

(ग) ..... महामुनिः पाराशरः रचयामास।

(घ) आत्रेय-पुनर्वसवे ..... भरद्वाज उपदिदेश।

(ङ) ऋषयः ..... ज्ञानं विज्ञानं च आविश्चक्रुः।

५. अधोलिखितानां शब्दानां विग्रहवाक्यनिर्देशपुरस्सरं समासं लिखत -

		विग्रहः	समासः
(क)	नवीनतथ्यानाम्	.....	.....

(ख) वेधशालानिर्माणम् ....

(ग) सुखदुःखयोः ....

(घ) लब्धख्यातिः ....

(ङ) आविश्वम् ....

६. रेखाङ्कितपदानि आदाय प्रश्ननिर्माणं कुरुत -

(क) अद्य यद् वयं शून्यमिति प्रयुञ्महे तद् आर्यभटीयं योगदानम् अस्ति।

(ख) वराहमिहिरः पितुः आदित्यदासाद् गणितं ज्योतिषशास्त्रं च अधिजगे।

(ग) शवच्छेदनेन सह शल्यक्रियाभ्यासो भवति स्म।

(घ) आत्रेय-पुनर्वसवे कायचिकित्सां महर्षिः भरद्वाजः उपदिदेश।

(ङ) ऋषयः समस्तानां प्राणिनां कल्याणं मनसि निधाय ज्ञानं विज्ञानं च आविश्चक्रुः।

(च) जगदीशचन्द्रबसुमहोदयः नोबेलपुरस्कारं लेभे।

७. प्रयोगपरिवर्तनं क्रियताम् -

(क) विद्यार्थिनः प्रेरणामवाप्य नवीनतथ्यानाम् उन्मोचने दत्तमनस्काः भवेयुः।

(ख) अग्निः सर्वेषां विज्ञानाविष्काराणां मूलम् अस्ति।

(ग) महर्षिणा पाराशरेण बीजाद् वृक्षपर्यन्तं विस्तृतिप्रक्रिया प्रास्तूयत।

(घ) महर्षिः सुश्रुतः त्रिंशताधिकानां शल्यक्रियाणाम् उपदेशं कृतवान्।

(ङ) बोधायनश्रौतसूत्रे श्रुत्युक्तकर्मणां चिन्तने वैज्ञानिकानि चिन्तनानि दृश्यन्ते।

८. कोष्ठकाद् उचितपदानि चित्वा शून्यस्थानं भरत -

(क) विज्ञानशब्दात् ठक्-प्रत्यये ..... इति शब्दो निष्पद्यते। (विज्ञानम्/वैज्ञानिकः)

(ख) आर्यभट्टः वैज्ञानिकः ..... वयसि एव आर्यभटीयं विरचयामास।
(त्रयोविंशे/पञ्चविंशे)

(ग) वराहमिहिरेण बृहत्संहिता, बृहज्जातकम्, ... पञ्चसिद्धान्तिका इति ग्रन्थाः प्रणीताः। (यन्त्रसर्वस्वं/लघुजातकं)

(घ) शल्यक्रियार्थं महर्षिः सुश्रुतः ..... उपकरणानि निरदिशत्। (१२५/१३५)

(ङ) शुल्बसूत्रस्य श्रौतसूत्रस्य च ..... प्रणेता बभूव। (बोधायनः/नागार्जुनः)

९. समुचितं समायोजयत -

(क) नागार्जुनः यन्त्रसर्वस्वम्

(ख) भास्कराचार्यः — जीवसूत्रम्

(ग) महर्षिः पाराशरः — शल्यचिकित्सा

(घ) महर्षिः भरद्वाजः — वनस्पतिकाण्डम्

(ङ) महर्षिः सुश्रुतः — अग्नेः प्रथमः द्रष्टा

(च) महर्षिः अथर्वा — सिद्धान्तशिरोमणिः

१०. प्राचीनानां वैज्ञानिकानाम् आविष्कारविषये स्वकीयैः वचोभिः भावार्थं विशदयत।

योग्यताविस्तारः

भारतीयसंस्कृतौ विज्ञानस्य परम्परा वैदिककालादेव प्रचलिता आसीत्। वैदिककाले अस्माकम् ऋषयः महर्षयश्च मन्त्राणां दर्शनं कृत्वा एकत्रीकृतम्। तदनु भाष्यकारैः तत्रस्थवैज्ञानिकतत्त्वानि अन्विष्य वेदे संकलितानि। अतः वक्तुं शक्यते यत् अस्माकं प्राचीनाः वैज्ञानिकाः वेदानां भाष्यकाराः सायणादयः आचार्याः भवन्ति। तत्र सायणाचार्यः वेदानां याज्ञिकव्याख्यां कृत्वा यज्ञस्थवैज्ञानिकतां प्रतिपादितवान्। तथैव अन्येऽपि भाष्यकाराः महीधरः, उव्वटः, स्कन्दस्वामी, यास्कादायः आचार्याः अपि वेदस्थवैज्ञानिकतत्त्वानि अन्विष्य स्वस्वभाष्ये उपस्थापितवन्तः। ये विषयाः भारतस्य वैज्ञानिकतत्त्वानि पोषयन्ति द्योतयन्ति च। अतः ते एव अस्माकं प्राचीनाः वैज्ञानिकाः विज्ञानवादस्याधारस्तम्भाः वर्तन्ते। तदनन्तरं स्मृतिसाहित्ये मनुयाज्ञवल्क्यादयः आचार्याः अपि वैज्ञानिकाः आसन्निति वक्तुं शक्यते। एतस्य कारणं मनुस्मृत्यादिस्मृतिग्रन्थेऽपि पर्यावरणसंरक्षणविषयाः याज्ञिकविषयाश्च वर्णिताः सन्ति।

षोडशः पाठः

वेदगणितज्ञः

गणितविषये भारतवर्षस्य योगदानं विश्वस्मिन्नस्ति अतुलनीयम्। गणितीय-गवेषणायाः प्रारम्भो भारते एव सञ्जातः। शून्य-स्थानीयमान-अङ्कगणित-ज्यामिति-बीजगणितादीनां प्रारम्भिकं कार्यं भारते एव सम्पन्नम् इति विश्वमिदं सर्वदा अङ्गीकरोति। भारतीयगणितपरम्परा अतीवव्यवस्थिता प्राचीना चास्ति। वेदेषु तात्कालिकेषु ग्रन्थेषु च विशिष्य गणितीयांशानां सन्निवेशो दृश्यते। आर्यभट्ट-भास्कर-वराहमिहिरादयो महतीं प्रसिद्धिं प्राप्नुवन्। आधुनिकेषु गणितवित्सु वेदगणितस्य साक्षात्कर्ता आसीत् श्रीमान् भारतीकृष्णतीर्थस्वामिमहोदयः। 'धार्मिकग्रन्थेष्वपि वैज्ञानिकविषयाः सन्निविष्टाः सन्ति' इति सर्वप्राथम्येन स्वामिमहोदयेन भणितम्।

गणितवेत्ता स्वामिवर्यः चतुरशीत्युत्तराष्टादशशततमे (१८८४) वर्षे मार्च-मासस्य चतुर्दशे (१४) दिनाङ्के तमिलनाडुप्रदेशस्य तिरुन्नवल्लीनामके ग्रामे जन्म अलभत। एषः बाल्यादेव मेधावी, तीक्ष्णबुद्धिः श्रद्धालुः, कक्ष्यासु सर्वदा प्रथमः, जिज्ञासुः च बभूव। गुरुं श्रीवेङ्कटराजशास्त्रिणम् उपेत्य सुष्ठु संस्कृतम् अधीतम् अनेन स्वामिवर्येण। अयं यदा दशमीपरीक्षाम् उत्तीर्णवान् तदा मद्राससंस्कृतसङ्घेन एतस्य पाण्डित्यं दृष्ट्वा 'सरस्वती' इत्युपाधिना विभूषितः। ततः पश्चात् पदवीशिक्षणं समाप्य अमेरिका-महाविविद्यालयस्य मुम्बयिकेन्द्रे उन्नतश्रेण्याम् आचार्यपरीक्षाम् उदतरत्। तत्र गणितम्, संस्कृतम्, इतिहासः, दर्शनम्, आङ्ग्लभाषा, विज्ञानं, तत्त्वज्ञानम् इति सप्तविषयेषु सः आचार्यमकरोत्। विंशतितमे वर्षे ईदृशं ज्ञानं सम्प्राप्य शैक्षणिकजगति सम्प्रत्यपि अविस्मरणीयं स्थानं लब्धं तेन।

अध्ययनात् परमेष महान् विद्वान् राजमहेन्द्रनगरस्य राष्ट्रियमहाविद्यालये प्राध्यापकत्वेन कार्यम् अकरोत्। आध्यात्मिकविषये समाकृष्टोऽयं शृङ्गेरिस्थं शारदापीठमागम्य श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीनां गुरूणां सन्निधौ अध्ययनं प्रारभत। ततः नवनवत्युत्तरनवदशशततमे (१९९९) वर्षे संन्यासाश्रमः स्वीकृतः। तत्र शृङ्गगिरावेव अष्ट वर्षाणि यावदरण्ये तपः आचरितवता अनेन ध्यानावस्थायां वैदिकगणितस्य सूत्राणां साक्षात्कारो जातः। तदनन्तरम् अयम् अथर्ववेदे गणितविषये विद्यमानान् विविधान् शब्दान् उपयुज्य

षोडशमुख्यसूत्राणि संशोधयामास। इमानि सूत्राणि उपयुज्य बीजगणितस्य अङ्कगणितस्य रेखागणितस्य च विविधाः समस्याः अनायासेन समाधातुं शक्यन्ते।

पञ्चविंशत्युत्तरनवदशशततमे (१९२५) वर्षे पुर्यां गोवर्धनपीठस्य श्रीमधुसूदनानन्दतीर्थ-स्वामिवर्यः आमयापन्नः अभवत्। तदा श्रीभारतीकृष्णतीर्थस्वामिवर्यः भक्तानाम् अपेक्षानुसारं गोवर्धनपीठम् अलञ्चकार। ततः देशस्य परिभ्रमणं कृत्वा भारतीयसनातनधर्मस्य प्रचारः प्रसारश्च कृतः। अष्टापञ्चाशदधिकनवदशशततमे (१९५८) वर्षे अमेरिकाविश्वविद्यालये वैदिकगणितविषयं धार्मिकविषयं भारतीयसंस्कृतिविषयञ्च उपन्यस्य द्वितीयविवेकानन्दः इति प्रसिद्धिमाप्नोत्। यदा गुरुवर्यः भारतं प्रत्याजगाम तदा स्वविरचितो विवरणात्मकः षोडशसूत्रव्याख्यानग्रन्थः अनश्यत् इति विषयम् अवागच्छत्। पुनः निरन्तरप्रयासं परिश्रमञ्च विधाय पुनरेकं ग्रन्थं रचयामास। सम्प्रत्यपि "वैदिक् मेथमेटिक्" इति आङ्ग्लभाषायाम् एष ग्रन्थः उपलभ्यते।

शब्दार्थाः

विश्वस्मिन्	जगति
अङ्गीकरोति	उरीकरोति
गणितवेत्ता	गणितज्ञः
अलभत	प्राप्नोत्
जिज्ञासुः	ज्ञातुमिच्छुः
बभूव	अभवत्
सम्प्रति	इदानीम्
साक्षात्कारः	आत्मसात्कारः
उपयुज्य	उपयोगं कृत्वा
षोडशमुख्यसूत्राणि	षोडशसंख्यकानि मुख्यानि सूत्राणि
उपलभ्यते	प्राप्यते

अभ्यासः

१. अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत -

(क) गणितविषये कस्य योगदानं वर्तते ?

(ख) गणितीयान्वेषणस्य प्रारम्भः कुत्र सञ्जातः ?

(ग) भारतीयगणितपरम्परा कीदृशी अस्ति ?

(घ) गणितीयांशानां सन्निवेशः कुत्र दृश्यते ?

(ङ) गणितवेत्ता कदा जन्म अलभत ?

२. पूर्णवाक्येन प्रश्नान् समाधत्त -

(क) स्वामिवर्यः केन उपाधिना विभूषितः ?

(ख) स्वामिवर्यः कतिषु विषयेषु आचार्यम् अकरोत् ?

(ग) अयं महोदयः कस्मिन् महाविद्यालये प्राध्यापकः आसीत् ?

(घ) भारतीयकृष्णतीर्थस्वामिवर्यः कति वर्षाणि अरण्ये तपः आचरितवान् ?

(ङ) वैदिकगणितस्य मुख्यसूत्राणि कति सन्ति ?

३. अधोलिखितपदानां लिङ्गविभक्तिवचनानि लिखत -

		लिङ्गम्	विभक्तिः	वचनम्
(क)	विश्वस्मिन्	.....	.....	.....
(ख)	भारतीयगणितपरम्परा	.....	.....	.....
(ग)	गणितवेत्ता	.....	.....	.....
(घ)	जन्म	.....	.....	.....
(ङ)	गणितवित्सु	.....	.....	.....
(च)	पुर्याम्	.....	.....	.....
(छ)	देशस्य	.....	.....	.....
(ज)	अयम्	.....	.....	.....
(झ)	एषः	.....	.....	.....
(ञ)	आङ्ग्लभाषायाम्	.....	.....	.....

४. अधो विद्यमानानां पदानां लकारपुरुषवचनानि लिखत -

		लकारः	पुरुषः	वचनानि
(क)	अकरोत्	.....	.....	.....
(ख)	स्त	.....	.....	.....
(ग)	आसीत्	.....	.....	.....
(घ)	बभूव	.....	.....	.....
(ङ)	शक्यन्ते	.....	.....	.....
(च)	असि	.....	.....	.....
(छ)	अभवत्	.....	.....	.....
(ज)	अलञ्चकार	.....	.....	.....
(झ)	अवागच्छत्	.....	.....	.....
(ञ)	उपलभ्यते	.....	.....	.....

५. अधोलिखितपदैः वाक्यानि रचयत -

(क) अङ्गीकरोति	(ख) अस्ति
(ग) विभूषितः	(घ) उत्तीर्णवान्
(ङ) दृश्यते	(च) गणितम्
(छ) योगदानम्	(छ) उपेत्य
(ज) गणितवेत्ता	(झ) उपलभ्यते।

६. सन्धिं विभज्य सन्धेः नाम लिखत -

		सन्धिविच्छेदः	सन्धिनाम
(क)	चास्ति	.....+.....	.....
(ख)	बाल्यादेव	.....+.....	.....
(ग)	इत्युपाधिना	.....+.....	.....
(घ)	सम्प्रत्यपि	.....+.....	.....
(ङ)	भारत एव	.....+.....	.....

७. अधोलिखितपदानां विरुद्धार्थकपदं लिखत -

(क) प्राचीना ..... (ख) विशिष्य .....

(ग) गणितम् ..... (घ) सुष्ठु .....

८. रेखाङ्कितपदमुद्दिश्य प्रश्ननिर्माणं कुरुत -

(क) स्वामिवर्यः तिरुन्नवल्लीग्रामे जन्म अलभत।

(ख) गणितविषये भारतस्य योगदानं वर्तते।

(ग) गणेषणायाः प्रारम्भो भारते सञ्जातः।

(घ) परिहरत वाक्यदोषम्।

(ङ) भारतीयगणितपरम्परा प्राचीनास्ति।

(च) सप्तविषयेषु आचार्यम् अकरोत्।

९. श्रीभारतीकृष्णतीर्थस्वामिवर्यस्य दशवाक्यैः संस्कृतभाषया, मातृभाषया वा विद्याभ्यास--विषयं विवृणुत।

१०. षोडश सूत्राणि अवलम्ब्य वैदिकगणितस्य वैशिष्ट्यं प्रतिपादयत।

योग्यता-विस्तारः

वेदगणितस्य षोडशसूत्राणि

१. एकाधिकेन पूर्वेण।
२. निखिलं नवतः चरमं दशतः।
३. ऊर्ध्वतिर्यग्भ्याम्।
४. परावर्त्य योजयेत्।
५. शून्यं साम्यसमुच्चये ।
६. आनुरूप्ये शून्यमन्यत्।
७. सङ्कलनव्यवकलनाभ्याम्।
८. पूरणापूरणाभ्याम् ।
९. चलनकलनाभ्याम्।
१०. यावदूनम्।
११. व्यष्टिसमष्टिः।
१२. शोषाण्यङ्केन चरमेण।
१३. सोपान्त्यद्वयमन्त्यम्।
१४. एकन्यूनेन पूर्वेण।
१५. गुणितसमुच्चयः।
१६. गुणकसमुच्चयः।

उपसूत्राणि

१. आनुरूप्येण।
२. शिष्यते शीषसंज्ञः।
३. आद्यमाद्येनान्त्यमन्त्येन ।
४. केवलैः सप्तकं गुण्यात्।
५. वेष्टनम्।
६. यावदूनं तावदूनम्।
७. यावदूनं तावदूनीकृत्य वर्गं च योजयेत्।
८. अन्त्ययोर्दशकेऽपि।
९. अन्त्ययोरेव।
१०. समुच्चयगुणितः।
११. लोपनस्थापनाभ्याम्।
१२. विलोकनम्।
१३. गुणितसमुच्चयः समुच्चयगुणितः।
१४. ध्वजाङ्कः।

उदाहरणम् -

एकाधिकेन पूर्वेण संख्यायाः अन्ते पञ्च सङ्ख्या यत्र भवति तत्रैव वर्ग (SQUARE) करणार्थमिदं सूत्रमुपयुज्यते -

35^2	=	$3 \times (3 + 1)$	5^2
		3×4	5×5
		12	25
उत्तरम्	=	1225	
205^2	=	$20 \times (20 + 1)$	2
		20×21	$5 \times$
		420	25
उत्तरम्	=	42025	

ऊर्ध्वतिर्यग्भ्याम् इदं सूत्रं गुणनक्रियायामुपयुज्यते। ऊर्ध्व (Vertion) तिर्यक् (Cross)

	3 4	(5×3)	$(5 \times 4 + 2 \times 3)$	(2×4)
×	52	15		
		15	26	8
1768				
×	6 7	(6×8)	$(6 \times 6) + (7 \times 8)$	7×6

48 92 42

5762

हे राजन् तव मन्दिरे यदि नरो यं कञ्चनाङ्कं वदेत् तं रामैर्गुणितं विलोचनयुतं दिग्भिर्हतं कारयेत्। तिथ्याप्तञ्च पुनश्च शेषमिहतं तद्वि शतिघ्नं कुरु तावत्त्वं धनधान्यसन्ततियुतराज्यं चिरं पालयेः।

ऊहितः अङ्कः -

4 × 3	रामैः गुणितम्	=	12
12 + 2	विलोचनयुतम्	=	14
14 × 10	दिग्भिः हृतम्	=	140
140 × 15	तिथ्याप्तम्	=	05 (शेषम्)
05 × 20	विंशतिघ्नम्	=	100

सप्तदशः पाठः

संविधाननिर्माता अम्बेडकरमहोदयः

डाँ. भीमराव-अम्बेडकर-महोदयः जन्म एकनवत्यधिकाष्टादशशततमस्य (१८९१) वर्षस्य अप्रैलमासस्य चतुर्दशे दिनाङ्के (१४.४.१८९१) मध्यप्रान्तस्य महु इति स्थाने अलभत। भीमरावस्य पिता रामजी माता च भीमाबाई आस्ताम्। दम्पत्या एतया सततं कृतायाः भगवत्प्रार्थनायाः, निर्मलभावस्य, सरलतायाः, भक्तेः, आदर्शाचरणस्य च फलानुरूपं भीममहोदयस्य जन्म अभवत्। अस्य पिता रामजी यद्यपि निर्धन आसीत्, तथापि कर्तव्यपरायणः, सत्यवादी, धर्मरतश्चासीत्। अतः समये समये रामायणकथावाचनम्, महाभारतकथावाचनम्, विविधसंकीर्तनादिकञ्च सश्रद्धं कारयति स्म। ते एव विशिष्टाः गुणाः, धार्मिकभावश्च पुत्रस्य सुसंस्कारं वर्धयितुं प्रमुखाः हेतवः अभवन्। पिता एव बाल्यकाले भीमम् आङ्ग्लभाषां गणितञ्च पाठयति स्म।

भीमः पितुः सकाशात् उद्यमशीलताम्, अन्यायं प्रति विरुध्य प्रतिरोधकरणम्, शोषितेषु असहायकेषु च साहाय्यकरणं च शिक्षितवान्। भीमस्य अध्ययनकाले महाविद्यलये 'अम्बावाडेकरः' नामकः एकः अध्यापकः आसीत्। दयाशीलः साधुस्वभाववान् स अध्यापकः भीमं पठनाय भोजनाय यथोचितावश्यकतायै च वात्सल्येन साहाय्यमकरोत् । भीमस्य अध्यापकं प्रति गौरवं स्नेहश्च अवर्तत। वात्सल्यातिशयेन अध्यापकः भीमनाम्ना सह अम्बावाडेकरः इति पदं व्यवहृतवान्। ततः परं भीमरावः अम्बेडकरनाम्ना प्रसिद्धो बभूव। अम्बेडकरः बाल्यकालादेव प्रतिभासम्पन्न आसीत्।

भीमरावः १९०८ तमे वर्षे मुम्बई-विश्वविद्यालयात् अत्युच्चश्रेण्यां दशमीं- मेट्रिक्युलेशन् इति संज्ञिताम् उत्तीर्णवान्। १९१२ वर्षे राजनीतिशास्त्रे अर्थशास्त्रे च मुम्बई-विश्वविद्यालयस्य एल्फिन्स्टन्-महाविद्यालयात् स्नातकोपाधिं भीमरावः प्राप्नोत्, वडोदरा-नगरे भीमरावमहोदयः सेवायां नियुक्तः। एतस्मिन् समये तस्य पिता दिवङ्गतः। ततः परम् अम्बेडकरमहोदयः वडोदरा-महाराजात् अमेरिका-देशे उच्चतराध्ययनाय अध्येतृवृत्तिं प्राप्य तत्र प्रसिद्धे कोलम्बिया-विश्वविद्यालये अध्ययनम् अकरोत्। अमेरिकादेशे भीमः एकैकं क्षणमपि व्यर्थं नाकरोत्।

सुखार्थिनः त्यजेद्विद्यां विद्यार्थिनः त्यजेत्सुखम्।

सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम्॥

इत्युक्तरीत्या उच्चविचारं मनसि निधाय सरलं जीवनम् अयापयत्।

असौ अध्ययनान्ते 'पुरातनभारतीयवाणिज्यम्' इति लेखं विलिख्य १९१५ वर्षे स्नातकोत्तरपदवीम् अलभत। एवं 'ब्रिटिश-भारते प्रादेशिकायस्य ऐतिहासिकं विवरणात्मकञ्च अध्ययनम्' इति महाप्रबन्धं विरचय्य कोलम्बिया-विश्वविद्यालयात् पिएच्.डि इति उपाधिमलभत। एषः लण्डननगरं गत्वा न्यायशास्त्रे 'व्यारिष्टर' पदवीं च अलभत। अम्बेडकरमहोदयस्य अध्ययने प्रगाढा रुचिरासीत्। अतः देशान्तरं गत्वा विविधविषयाणां वैश्विकं ज्ञानं समाप्नोत्। अम्बेडकरमहोदयः 1923 वर्षस्य अप्रैल मासे भारतं प्रत्यागच्छत्। तथा जातिगतस्य अस्पृश्यभावस्य दूरीकरणाय, शोषितजनानां क्लेशपरिहाराय च सन्नद्धः अभूत्। स तदा जातिगतम् अस्पृश्यभावं सर्वदा विरुणद्धि स्म।

संविधानसभायाः सदस्यत्वेन वङ्गप्रदेशतः चितः अम्बेडकरमहोदयः, भारतसर्वकारस्य प्रथमः विधिमन्त्री अभूत्, संविधान-निर्माण-सभायाः अपि अध्यक्षत्वेन चितश्च। सर्वेषां भारतीयानां प्रतिनिधीभूय अग्रेसरो भूत्वा स भारतीयसंविधानम् व्यरचयत्। तत्र भारतीयसंविधाने अम्बेडकरमहोदयो व्यक्तेः गरिम्णः स्वातन्त्र्यस्य च, देशैक्यस्य, सर्वेषां मानवानां समानतायाः, विविधानां मूलाधिकाराणां, सामाजिकन्यायस्य, संघीयव्यवस्थायाः च सम्यक् उपोद्बलनं कृतवान्। सामाजिके आर्थिके, राजनैतिके च क्षेत्रे जनतन्त्रस्य समर्थनम् अकरोत्। 'आधुनिक-भारतस्य न्यायशास्त्र-प्रणेता' इति सम्मानञ्च अलभत।

अम्बेडकरमहोदयो भारतीयसंविधानस्य सप्तदशे अनुच्छेदे कथमपि अस्पृश्यतायाः अनुसरणं दण्डनीयः अपराध इति निरदिशत्। पञ्चविंशाद् अनुच्छेदात् अष्टाविंशानुच्छेदपर्यन्तं धार्मिकस्वतन्त्रतायाः विधानं, अष्टाविंशाद् अनुच्छेदात् त्रिंशानुच्छेदपर्यन्तं शिक्षायाः, संस्कृतेः संरक्षणाय च मूलाधिकारविधानम् अकरोत्। बाल्यकाले सर्वान् क्लेशान् अनुभूय, वयःप्राप्ते सम्यगधीत्य, निम्नवर्गाणां, शोषितजनानां च क्लेशान् परिहृत्य च जीवनसंग्रामे यशः प्राप्नोत्। परमात्मनः दृष्टौ सर्वे मानवाः समानाः, कश्चित् जन्मना न उच्चः, न वा कश्चित् निम्नः, सर्वे समानाः मानवाः इति उद्घुष्य, तस्य संविधाने कार्यान्वयनं कृत्वा डॉ. अम्बेडकरमहोदयः भारतदेशे आदर्शनायकः बभूव।

अम्बेडकरमहोदस्य विशिष्टां देशसेवां परिगणय्य भारतसर्वकारः भारतरत्नम् इत्युपाधिना जन्मशताब्दसमये सममानयत्। डाँ भीमरावः अम्बेडकरमहोदयः श्रेष्ठः राष्ट्रनायकः। हिन्दुसमाजस्थस्य निम्नवर्गाणां, शोषितजनानां च समुद्धाराय, विकासाय, उन्नतये च सततं प्रायतत् सर्वैः सुज्ञातः विषयः अस्ति।

नानाभाषाणां ज्ञाता डा. अम्बेडकरमहोदयः संस्कृतभाषायाः गरिमाणमपि सम्यक् जानाति स्म। अम्बेडकरमहोदयः संस्कृतग्रन्थानां स्वाध्यायमपि सम्यक् अकरोत् इत्येतदपि ऐतिहासिकं सत्यमस्ति। सर्वग्राहिणी सर्वभाषापोषिणी च संस्कृतभाषा स्वतन्त्रभारतस्य राष्ट्रभाषा भवितुम् अर्हति। अनया भाषयैव भारतस्य अखण्डत्वं राष्ट्रैक्यं च सम्भवति, अन्यथा विविधप्रदेशेषु विविधभाषाकलहाः भवेयुः इति तस्य विचारः आसीत्।

१९४९ तमवर्षस्य सितम्बरमासस्य एकादशदिनाङ्के 'नैशनल हेरल्ड' इति पत्रिकायां संस्कृतभाषासमर्थकः डाँ. भीमरावः इति शीर्षकं प्रकाशितमासीत्। संस्कृतभाषा राजभाषा भवेदिति प्रस्तावयितृषु सर्वप्रथमः हस्ताक्षरकर्ता डा. अम्बेडकरमहोदयः आसीत्। तत्र पण्डितः लक्ष्मीकान्तमैत्रः, पण्डितः टी.टी. कृष्णमाचारी इत्यादयः अनेके आसन्। वेदानां, पुराणानां, उपनिषदां वा अध्ययनं भारतस्य सांस्कृतिकमध्ययनम् अस्ति, चिरात् सर्वत्र भारते संस्कृतिः इति अध्ययनं प्रवर्तते। अत एव धार्मिकाध्ययनम् इति व्याजेन सर्वकारीयविद्यालयेषु वेदानां, पुराणानां, उपनिषदां वा अध्ययनस्य निषेधः न कर्तुं शक्यते इति डॉ. अम्बेडकरमहोदयः संविधानसभायाम् उत्तरम् अदात्। अतः संस्कृतस्य वेदादीनां शुभचिन्तकः सः डा. अम्बेडकरमहोदयः आसीत् इति ज्ञायते।

निम्नवर्गाणां, शोषितजनानां च कृते सामाजिकन्यायस्य प्रदाता, व्यक्तिस्वातन्त्र्यस्य प्रतिपादकः डा. अम्बेडकरमहोदयः १४ अक्तूबर १९५६ दिनाङ्के बौद्धधर्मं स्वीचकार, ६ दिसम्बर १९५६ दिनाङ्के महापरिनिर्वाणं च जगाम।

डा. अम्बेडकरमहोदयः स्वचिन्तनेन, संविधाने प्रजानां कृते प्रदत्तैः अधिकारैश्च इदानीमपि अस्माभिः सदा स्मरणीयः अग्रणीः राष्ट्रनायकः वर्तते ।

शब्दार्थाः

उद्यमशीलता	उद्योगस्य स्वभावता
अध्येतृवृत्तिम्	छात्रवृत्तिम्
सन्नद्धः	सज्जः
विधिमन्त्री	न्यायमन्त्री
उद्धुष्य	उद्घोषणां कृत्वा
प्रस्तावयितृषु	प्रस्तावकर्तृषु
व्याजेन	अन्यमुद्दिश्य अन्यप्रतिपादनेन
महापरिनिर्वाणम्	दिवङ्गतम्
अग्रणीः	अग्रेसरः
प्राप्नोत्	प्राप्तवान्
सततम्	निरन्तरम्/अनुस्यूततया
विरुणद्धि	विरोधं करोति/प्रतिकारं करोति
उपोद्बलनम्	समर्थनम्

अभ्यासः

१. **एकवाक्येन प्रश्नाः समाधेयाः -**

(क) भीमरावस्य पित्रोः नाम किम् ?

(ख) भीमरावस्य सुसंस्कारवर्धकाः हेतवः के अभवन् ?

(ग) अम्बावाडेकरः क आसीत् ?

(घ) भारतसर्वकारस्य प्रथमो विधिमन्त्री क आसीत् ?

(ङ) भारतीय संविधानस्य कतमे अनुच्छेदे अस्पृश्यताया अनुसरणं दण्डनीयः अपराधः इति परिगण्यते ?

२. पूर्णवाक्येन उत्तरत -

(क) भीमरावमहोदयस्य जन्मदिनाङ्कं लिखत।

(ख) अम्बेडकरमहोदयः कस्मिन् विश्वविद्यालये अध्ययनमकरोत् ?

(ग) भीमरावमहोदयः कं लेखं विलिख्य स्नातकोत्तरपदवीम् अलभत ?

(घ) अम्बेडकरमहोदयः सर्वदा किं विरुणद्धि स्म ?

(ङ) संस्कृतभाषा राजभाषा भवेदिति प्रस्तावयितृषु कः हस्ताक्षरम् अकरोत् ?

३. अधोलिखितानां शब्दानां प्रकृतिप्रत्ययौ विभजत -

	प्रकृतिः	प्रत्ययः
(क) वर्धयितुम्	.....+.....।	
(ख) उत्तीर्णवान्	.....+.....।	
(ग) गत्वा	.....+.....।	
(घ) सन्नद्ध	.....+.....।	
(ङ) उपोद्बलनम्	.....+.....।	
(च) अधीत्य	.....+.....।	
(छ) नायकः	.....+.....।	

४. रिक्तस्थानानि पूरयत -

(क) धार्मिकाध्ययनम् इति व्याजेन ..... निषेधो न कर्तुं शक्यते।

(ख) सर्वग्राहिणी सर्वभाषापोषिणी च ..... अर्हति।

(ग) अष्टाविंशाद् .....मूलाधिकारविधानम् अकरोत्।

(घ) ..... इति सम्मानञ्च अलभत।

(ङ) भीमस्य अध्यापकं प्रति ..... अवर्तत।

(च) अतः समये समये .....सश्रद्धं कारयति स्म।

५. सन्धिविच्छेदं कृत्वा सन्धिसूत्राणि लिखत।

	सन्धिविच्छेदः	सन्धिसूत्राणि
(क) धर्मरतश्चासीत्	.....+.....	.....।

(ख) सोऽध्यापकः .....+..... .....।

(ग) देशैक्यम् .....+..... .....।

(घ) अध्ययनान्ते .....+..... .....।

(ङ) उपोद्बलनम् .....+..... .....।

(च) इत्युपाधिना .....+..... .....।

६. समुचितं युङ्क्ष्व -

(क) भीमस्य जन्मस्थानम्	मध्यप्रान्तस्य महु इति स्थाने
(ख) मुम्बई विश्वविद्यालयात्	संस्कृतभाषासमर्थकः
(ग) उच्चतराध्ययनम्	वङ्गप्रदेशतः
(घ) लण्डननगरम्	कोलम्बियाविश्वविद्यालयः
(ङ) सदस्यत्वेन चितः	व्यारिष्टारपदवीम्
(च) नैशनल हेरल्ड	दशमीं मैट्रिकुलेशन्

७. अधोलिखितानि पदान्याश्रित्य कारकविभक्ती निर्णयत।

(क) अस्य पिता कर्तव्यपरायण आसीत्।

(ख) सुखार्थिनः त्यजेद् विद्याम्।

(ग) अध्यापकः भीमनाम्ना सह अम्बावाडेकर इति व्याहृतवान्।

(घ) एल्फिन्स्टन-महाविद्यालयात् भीमरावः स्नातकोपाधिं प्राप्नोत्।

(ङ) नानाभाषाणां ज्ञाता अम्बेडकमहोदयः संस्कृतगरिमाणं जानाति स्म।

(च) अम्बेडकरमहोदयो भारतदेशे आदर्शनायको बभूव।

८. प्रोयगपरिवर्तनं कुरुत।

(क) संस्कृतस्य वेदादीनां शुभचिन्तकः स डॉ. अम्बेडकरमहोदय आसीत्।

(ख) तेन सर्वदा जातिगतः अस्पृश्यभावः विरुध्यते स्म।

(ग) संस्कृतेः संरक्षणाय मूलाधिकारविधानमकरोत्।

(घ) अम्बावाडेकरनामकेन एकेन अध्यापकेन अभूयत।

९. संस्कृतभाषाविषये डॉ. भीमराव-अम्बेडकरमहोदयस्य संस्कृतगिरा चिन्तनं प्रकटयत।

१०. अधस्तनश्लोकस्य भावार्थं लिखत।

सुखार्थिनः त्यजेद्विद्यां विद्यार्थिनः त्यजेत्सुखम्।

सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम्॥

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

माध्यमेन सञ्चालिता प्रस्तावित च राष्ट्रीयादर्शवेदविद्यालयः



महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी (म.प्र.)

(भारतसर्वकारस्य शिक्षामन्त्रालयः)

वेदविद्या मार्ग, चिन्तामण, पो. ऑ. जवासिया, उज्जैन - 456006 (म.प्र.)

Phone : (0734) 2502266, 2502254, E-mail : msrvvpujn@gmail.com, website - www.msrvvp.ac.in